Sahasranama

and


Sanatsujatiya

Bhashyas



	PAGE.
VISHNUSAHASRANAMA BHASHYA.	1
SANATSUJATIYA BHASHYA	
Chapter 1.	171
Chapter 2.	235
Chapter 3.	271
Chapter 4.	287




THE WORKS OF
SRI SANKARACHARYA.
VOLUME
13
SRI VANI VILAS PRESS
SRIRANGAM



पृष्ठम्

विष्णुसहस्रनामभाष्यम् ... १


सनत्सुजातीयभाष्यम्

अध्यायः १. ... ... १७१

अध्यायः २. ... ... २३५

अध्यायः ३. ... ... २७१

अध्यायः ४. ... ... २८७



विष्णुसहस्रनामभाष्यम्

सनत्सुजातीयभाष्यम्

च

॥ श्रीः ॥

॥ विषयानुक्रमणिका ॥

पृष्ठम्

विष्णुसहस्रनामस्तोत्रम्

भीष्माचार्यं प्रति युधिष्ठिरेण कृताः षट् प्रश्नाः ... १
भीष्माचार्येणोक्त तदुत्तरम् ... ४
नामसहस्रम् ... ३३
सहस्रनामश्रवणादिफलम् ... १६०

सनत्सुजातीयम्

प्रथमोऽध्यायः १७१

धृतराष्ट्रकृतो मृत्युसदसद्भावप्रश्नः १७६
सनत्सुजातेन दर्शितं तदुत्तरम् .. १७७
मृत्योरभावे मतभेदः ... १७७
मृत्युस्वरूपम् .. १७८
प्रमादस्य मृत्युस्वरूपत्वम् ... १७८
प्रमादस्य ससारहेतुत्वम् १७८
केषाचिदभिमत यमस्य मृत्युरूपत्वम् .. १८१
प्रमादस्य रागादिकार्यद्वारेण बन्धहेतुत्वम् .. १९२

ज्ञानिनो मृत्युभयाभावः ... २०१
पुण्यलोकसाधनत्वेनाम्नातानां विद्वदनुष्ठेयत्वात्कर्मणां शङ्का धृतराष्ट्रस्य ... २०२
तेषामविद्वद्विषयत्वेनोत्तर सनत्सुजातस्य ... २०३
ईश्वरस्य जगत्सर्गादौ नियोजकप्रयोजनादिप्रश्नः ... २०५
तत्रोत्तरम् ... २०६
धर्माधर्मयोः कस्येतरप्रतिघातकत्वमिति प्रश्नः ... २१८
तत्रोत्तरम् ... २१८
धर्मस्याधिकारिभेदेन स्वर्गादिफलसाधनत्वं ज्ञानसाधनत्वं च ... २२१
ज्ञानिचर्या २२३
मानमौनयोर्विभिन्नफलकत्वम् ... २३२
शमादीना ब्रह्मलक्ष्मप्रवेशद्वारता ... २३४

द्वितीयोऽध्यायः **२३५**

मौनविषयकप्रश्नोत्तरे ... २३७
वेदाध्यायिनोऽपि क्रियमाणपापैर्लेपावश्यिकत्वम् ... २३९
वेदाना पापालेपकत्वाभावे नैरर्थक्याक्षेपः, तत्परिहारश्च ... २४०
विद्वदविद्वदपेक्षया कर्मणा फलवैषम्यम् ... २४५
निष्कल्मषस्य तपसः केवलत्वम् .. २४६
तपसः कल्मषाणि क्रोधादयो द्वादश ... २४७

नृशससप्तकम् ... २५०
तपोगुणा ज्ञानादयो द्वादश ... २५१
अनृतादयोऽष्टादश दमदोषाः २५२
अष्टादश मददोषाः ... २५३
त्यागषट्कम् ... २५४
अप्रमादस्याष्टौ गुणाः ... २५५
सर्वस्य इन्द्रियार्थवैमुख्यस्य च प्राधान्यम् ... २५६
पञ्चवेदिचतुर्वेदित्रिवेदिद्विवेद्येकवेद्यनृक्षु सत्यभूतब्रह्म-
विदः श्रेष्ठत्वम् ... २५८

तृतीयोऽध्यायः **२७१**

ब्रह्मविद्याया ब्रह्मचर्येणैव लभ्यता ... २७३
ब्रह्मचर्यविवरणम् ... २७५
ब्रह्मणो ज्ञानैकप्राप्यत्वम् ... २८२
ब्रह्मस्वरूपम् ... २८३

चतुर्थोऽध्यायः **२८७**

पूर्वाध्यायान्ते प्रक्रान्त ब्रह्मणो योगिदृश्य रूपम् ... २८९
तादृश ब्रह्म पश्यतः अमृतत्वम् ... ३०७
तादृशब्रह्मविषये स्वपरानुभवप्रदर्शनम् ... ३०८

॥ श्रीः ॥

शांकरभाष्यस्थानां

विशेषविषयाणामनुक्रमणिका ॥

———*———

विष्णुसहस्रनामभाष्यम्

	पृष्ठम्
ध्यानस्तुतिनमस्कारेषु क्रमेण मानसवाचिककायिकेष्वर्चनेषु स्तुतिलक्षणस्यार्चनस्य सर्वधर्मेभ्यधिकत्वम्...	६
विष्णोः परमपवित्रत्वस्य प्रमाणैः समर्थनम् ...	६
देवस्य विष्णोरेकत्वसमर्थनम् ...	९
सिद्धरूपेऽप्यात्मनि वेदस्य प्रामाण्यम्, रागस्यैव प्रवर्तकत्वं च ...	५१
अन्यपराणामपि मन्त्रार्थवादाना प्रामाण्यम् ...	५१
आत्मज्ञानस्य श्रद्धेयता ...	५३
सहस्रनामजपानुरूपं मानसस्नानम्	५४
गुणक्रियादिप्रवृत्तिनिमित्तकानामपि शब्दाना परमपुरुषाभिधायकत्वम् ...	५७
आदित्यादिशब्दाना प्रसिद्धार्थपराणामपि विष्णुस्तुतित्वम् ...	५७

विष्ण्वादिशब्दाना श्रीपतिमाधवादिशब्दाना च यौ-
नरुक्त्यपरिहारः .. ५८
सहस्रनाममु दृष्टस्य लिङ्गत्रयस्योपपत्तिः ... ५८
विश्वशब्दस्य प्रणवपरत्वम्, तेन ब्रह्माभिधानफल च... ५९
हिंसादिरहितस्य वैष्णवस्य विष्णुस्तुतिनमस्कारादा-
वधिकारः ... ६३
स्तुतिनमस्कारादेः श्रद्धापूर्वकमनुष्ठेयत्वम् ... ६८
आत्मान विष्णु ध्यायतः स्तुतिनमस्कारादावधिका-
रः, वासुदेवनिन्दाप्रवृत्तावतिदेशे वा निषेधः ... ६८
श्रद्धाभक्त्यपुरस्कृतस्यापि विष्णुनाममकीर्तनस्य दुरि-
तहरत्वम ... ६६
स्मरणध्यानयोर्नाममकीर्तनेऽन्तर्भावः ... ६६
विष्णुनाममकीर्तनस्य सम्यग्ज्ञानहेतुत्वे श्रुतिः ... ६७
पुरुषोत्तमशब्दे षष्ठीसमासोपपत्तिः ... ७१
जपकर्मणो ज्ञानद्वारा मोक्षहेतुत्वम् ... १६३
शूद्रस्य श्रवणमात्रेऽधिकारः ... १६४

सनत्सुजातीयभाष्यम्

सग्रहेण वेदान्तमर्यादाप्रदर्शनम् ... १७३
ब्रह्मत्रैवर्णिकाधिकारिकत्वम् ... १७४
ज्ञानाज्ञानयोरेव साक्षाद्बन्धमोक्षहेतुत्वम् ... १८१
कर्मानुष्ठाने अधिकारिनिर्णयः ... १८३

योगानुष्ठाने अधिकारी, योगानुष्ठानप्रकारश्च	...	१८८
सगुणब्रह्मोपासकस्यापुनरावृत्तिः	...	२०३
जीवपरैक्ये आक्षेपपरिहाराः	...	२०५
मुमुक्षोः सर्वकर्मसंन्यासाधिकारः	...	२१३
वेदशब्दार्थः	...	२५९



॥ श्रीः ॥

विष्णुसहस्रनामभाष्यम्

श्रीमच्छंकरभगवत्पादैः

विरचितम् ।



॥ श्रीः ॥

विष्णुसहस्रनामस्तोत्रम्

श्रीमच्छंकरभगवत्पादविरचितेन

भाष्येण सहितम् ।

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥ १ ॥

कृष्णद्वैपायनं व्यासं सर्वभूतहिते रतम् ।
वेदाब्जभास्करं वन्दे शमादिनिलयं मुनिम् ॥ २ ॥

सहस्रमूर्तेः पुरुषोत्तमस्य सहस्रनेत्राननपादबाहोः ।
सहस्रनाम्नां स्तवनं प्रशस्तं निरुच्यते जन्मजरादिशान्त्यै ॥ ३ ॥

श्रीवैशम्पायन उवाच—

श्रुत्वा धर्मानशेषेण
पावनानि च सर्वशः ।

युधिष्ठिरः शांतनवं
पुनरेवाभ्यभाषत ॥ १ ॥

श्रीवैशम्पायनः जनमेजयं प्रत्युवाच— धर्मान् अभ्युदयनिःश्रेयसोत्पत्तिहेतुभूतान् चोदनालक्षणान् अशेषेण कात्स्न्र्येन पावनानि पापक्षयकराणि धर्मरहस्यानि च सर्वशः सर्वैः प्रकारैः श्रुत्वा युधिष्ठिरो धर्मपुत्रः शांतनवं शंतनुपुत्रं भीष्मं सकलपुरुषार्थसाधनं सुखसंपाद्यम् अल्पप्रयासम् अनल्पफलम् अनुक्तमिति कृत्वा पुनः भूय एव अभ्यभाषत प्रश्नं कृतवान् ॥

युधिष्ठिर उवाच—

किमेकं दैवतं लोके
किं वाप्येकं परायणम् ।
स्तुवन्तः कं कमर्चन्तः
प्राप्नुयुर्मानवाः शुभम् ॥ २ ॥

किमेकं दैवतं देव इत्यर्थः, स्वार्थे तद्धितप्रत्ययविधानात्, लोके लोकनहेतुभूते समस्तविद्यास्थाने उक्तमिति प्रथमः प्रश्नः । किं वाप्येकं परायणं तस्मिन् लोके एकं परायणं च किम्?

परम् अयनं प्राप्तव्यं स्थानं परायणम् । यदाज्ञया प्रवर्तन्ते सर्वे; यस्मिन्नधिगते हृदयग्रन्थिर्भिद्यते, 'भिद्यते हृदयग्रन्थि-श्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे' इति श्रुतेः; यस्य विज्ञानमात्रेण आनन्दलक्षणो मोक्षः प्राप्यते; यद्विद्वान्न बिभेति कुतश्चन; यत्प्रविष्टस्य न विद्यते पुनर्भवः; यस्य च वेदनात्तदेव भवति, 'ब्रह्म वेद ब्रह्मैव भवति' इति श्रुतेः; यद्विहायापरः पन्थाः नृणां नास्ति, 'नान्यः पन्था विद्यतेऽयनाय' इति श्रुतेः; तदुक्तम् एकं परायणम् । लोके तत्किम् इति द्वितीयः प्रश्नः । कं कतमं देवं स्तुवन्तः गुणकीर्तनं कुर्वन्तः, कं कतमं देवम् अर्चन्तः बाह्यमा-भ्यन्तरं वा अर्चनं बहुविधं कुर्वन्तः मानवाः मनुसुताः शुभं कल्याणं स्वर्गापवर्गादि फलं प्राप्नुयुः लभेरन् इति पुनः प्रश्न-द्वयम् ॥

को धर्मः सर्वधर्माणां
भवतः परमो मतः ।
किं जपन्मुच्यते जन्तु-
र्जन्मसंसारबन्धनात् ॥ ३ ॥

को धर्मः पूर्वोक्तलक्षणः सर्वधर्माणां सर्वेषां धर्माणां

मध्ये भवतः परमः प्रकृष्टो धर्मः मतः अभिप्रेतः इति पञ्चमः प्रश्नः । किं जप्यं जपन् उच्चोपांशुमानसलक्षणं जपं कुर्वन् जन्तुः जननधर्मा । अनेन जन्तुशब्देन जपार्चनस्तवनादिषु यथायोग्यं सर्वप्राणिनामधिकारं सूचयति । जन्मसंसारबन्धनात् जन्म अज्ञानविजृम्भितानामविद्याकार्याणाम् उपलक्षणम्, संसारः अविद्या, ताभ्यां जन्मसंसाराभ्यां यत् बन्धनं तस्मात् मुच्यते मुक्तो भवति इति षष्ठः प्रश्नः । मुच्यते जन्मसंसारबन्धनात् इति इदमुपलक्षणम् इतरेषां फलानामपि । एतद्ग्रहणं तु मोक्षस्य प्राधान्यख्यापनार्थम् ॥

षट् प्रश्नाः कथिताः । तेषु पाश्चात्योऽनन्तरो जप्यविषयः षष्ठः प्रश्नः अनेन श्लोकेन परिह्रियते—

श्रीभीष्म उवाच—

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥ ४ ॥

सर्वेषां बहिरन्तःशत्रूणां भयहेतुः भीष्मः मोक्षधर्मादीनां प्रवक्ता सर्वज्ञः ॥

जगत् जङ्गमाजङ्गमात्मकम् तस्य प्रभुः स्वामी तम्, देवदेवं

देवानां ब्रह्मादीनां देवम्, अनन्तं देशतः कालतः वस्तुतश्चापरिच्छिन्नम्, पुरुषोत्तमं क्षराक्षराभ्यां कार्यकारणाभ्यामुत्कृष्टम्, नामसहस्रेण नाम्नां सहस्रेण स्तुवन् गुणसंकीर्तनं कुर्वन् सततोत्थितः निरन्तरमुद्युक्तः पुरुषः— पुरे शयनाद्वा पूर्णत्वाद्वा पुरुषः— 'सर्वदुःखातिगो भवेत्' इति सर्वत्र संबध्यते ॥

उत्तरेण श्लोकेन चतुर्थः प्रश्नः परिहियते—

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायन्स्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ ५ ॥

तमेव चार्चयन् बाह्यम् अभ्यर्चनं कुर्वन् नित्यं सर्वेषु कालेषु भक्तिः भजनं तात्पर्यं तया भक्त्या पुरुषम् अव्ययं विनाशविक्रियारहितम्, तमेव च ध्यायन् आभ्यन्तरार्चनं कुर्वन्, स्तुवन्, पूर्वोक्तरीत्या भक्त्या नमस्यंश्च नमस्कारं कुर्वन्,—पूजाशेषभूतमुभयं स्तुतिनमस्कारलक्षणम्— यजमानः पूजकः फलभोक्ता । अथवा, अर्चयन्नित्यनेनोभयविधमर्चनमुच्यते । ध्यायन्स्तुवन्नमस्यंश्चेत्यनेन मानसं वाचिकं कायिकं चोच्यते ॥

तृतीयं प्रश्नं परिहरति त्रिभिरुत्तरैः पादैः—

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥

अनादिनिधनं षड्भावविकारशून्यम्, विष्णुं व्यापकम्, सर्वस्य लोक्यत इति लोकः दृश्यवर्गो लोकः तस्य नियन्तृणां ब्रह्मादीनामपि ईश्वरत्वात् सर्वलोकमहेश्वरम्, लोकं दृश्यवर्गं स्वाभाविकेन बोधेन साक्षात्पश्यतीति लोकाध्यक्षः, तं नित्यं निरन्तरं स्तुवन्, सर्वदुःखातिगो भवेत् इति त्रयाणां साधारणं फलवचनम् । सर्वाण्याध्यात्मिकादीनि दुःखान्यतीत्य गच्छतीति सर्वदुःखातिगः भवेत् स्यात् ॥

पुनरपि तमेव स्तुत्यं विशिनष्टि—

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ ७ ॥

ब्रह्मण्यं ब्रह्मणे स्रष्ट्रे ब्राह्मणाय तपसे श्रुतये वा हितम्, सर्वान् धर्मान् जानातीति सर्वधर्मज्ञः तम्, लोकानां प्राणिनां कीर्तयो यशांसि ताः स्वशक्त्यनुप्रवेशेन वर्धयतीति तम्, लोकैर्नाध्यते याच्यते लोकानुपतपति आशास्ते लोकानामीष्टे

इति वा लोकनाथः तम्, महत् ब्रह्म—विश्वोत्कर्षेण वर्तमानत्वात्, भूतं परमार्थसत्यम्, सर्वभूतभवोद्भवं सर्वभूतानां भवः संसारः यत्सकाशादुद्भवति तम् ॥

पञ्चमं प्रश्नं परिहरति—

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ॥ ८ ॥

सर्वेषां चोदनालक्षणानां धर्माणाम् एषः वक्ष्यमाणो धर्मः अधिकतमः इति मे मम मतः अभिप्रेतः, यद्भक्त्या तात्पर्येण पुण्डरीकाक्षं हृदयपुण्डरीके प्रकाशमानं वासुदेवं स्तवैः गुणसंकीर्तनलक्षणैः स्तुतिभिः सदा अर्चेत् सत्कारपूर्वकमर्चनं करोति नरः मनुष्यः इति यत् एष धर्मः इति संबन्धः ॥

अस्य स्तुतिलक्षणस्यार्चनस्य आधिक्ये किं कारणम् ? उच्यते— हिंसादिपुरुषान्तरद्रव्यान्तरदेशकालादिनियमानपेक्षत्वम् आधिक्ये कारणम् । 'ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम्' इति विष्णुपुराणवचनात् । 'जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते'

इति मनुवचनात् । 'जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते । अहिंसया च भूतानां जपयज्ञः प्रवर्तते' इति महाभारते । 'यज्ञानां जपयज्ञोऽस्मि' इति भगवद्वचनम् । एतत्सर्वमभिप्रेत्य 'एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः' इत्युक्तम् ॥

द्वितीयं प्रश्नं समाधत्ते--

परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ ९ ॥

परमं प्रकृष्टं महत् बृहत् तेजः चैतन्यलक्षणं सर्वावभासकम्, 'येन सूर्यस्तपति तेजसेद्धः' 'तं देवा ज्योतिषां ज्योतिः' 'न तत्र सूर्यो भाति न चन्द्रतारकम्' इत्यादिश्रुतेः; 'यदादित्यगतं तेजः' इत्यादिस्मृतेश्च । परमं तपः तपति आज्ञापयतीति तपः । 'य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरो यमयति' इत्यन्तर्यामिब्राह्मणे सर्वनियन्तृत्वं श्रूयते । 'भीषास्माद्वातः पवते' इत्यादि तैत्तिरीयके । तपति ईष्टे इति वा तपः । तस्यैश्वर्यमनवच्छिन्नमिति महत्त्वम्, 'एष सर्वेश्वरः' इत्यादिश्रुतेः । परमं सत्यादिलक्षणं परं ब्रह्म महनीयतया महत् । परमं प्रकृष्टं पुनरावृत्तिशङ्कावर्जितम् । परायणं परम् अयनं परायणम् । परमग्रहणात् सर्वत्र

अपरं तेजः आदित्यादिकं व्यावर्त्यते । सर्वत्र यो देवः इति विशेष्यते— यो देवः परमं तेजः परमं तपः परमं ब्रह्म परमं परायणम्, स एकः सर्वभूतानां परायणमिति वाक्यार्थः ॥

प्रथमप्रश्नस्योत्तरमाह—

पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥

पवित्राणां पावनानां तीर्थादीनां पवित्रम् । परमस्तु पुमान् ध्यातो दृष्टः कीर्तितः स्तुतः संपूजितः स्मृतः प्रणतः पाप्मनः सर्वानुन्मूलयतीति परमं पवित्रम् । संसारबन्धहेतुभूतं पुण्यापुण्यात्मकं कर्म तत्कारणं च अज्ञानं सर्वं नाशयति स्वयाथात्म्यज्ञानेनेति वा पवित्राणां पवित्रम् ॥

रूपमारोग्यमर्थांश्च भोगांश्चैवानुषङ्गिकान् ।
ददाति ध्यायतो नित्यमपवर्गप्रदो हरिः ॥

चिन्त्यमानः समस्तानां क्लेशानां हानिदो हि यः ।
समुत्सृज्याखिलं चिन्त्यं सोऽच्युतः किं न चिन्त्यते ॥

ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु ।
प्रायश्चित्तं हि सर्वस्य दुष्कृतस्येति वै श्रुतिः ॥

संसारसर्पसंदष्टनष्टचेष्टैकभेषजम् ।
कृष्णेति वैष्णवं मन्त्रं श्रुत्वा मुक्तो भवेन्नरः ॥

अतिपातकयुक्तोऽपि ध्यायन्निमिषमच्युतम् ।
भूयस्तपस्वी भवति पङ्क्तिपावनपावनः ॥

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥

हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः ।
ओमित्येवं सदा विप्राः पठत ध्यात केशवम् ॥

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।

यन्नामकीर्तनं भक्त्या विलापनमनुत्तमम् ।
मैत्रेयाशेषपापानां धातूनामिव पावकः ॥

अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ।
पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥

ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् ।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥

ज्ञानतोऽज्ञानतो वापि वासुदेवस्य कीर्तनात् ।
तत्सर्वं विलयं याति तोयस्थं लवणं यथा ॥

यस्मिन्नयस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशितात्ममनसो ब्राह्मोऽपि लोकोऽल्पकः ।

मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किं चित्रं तदघं प्रयाति विलयं तत्राच्युते कीर्तिते ॥

शमायालं जलं वह्नेस्तमसो भास्करोदयः ।
शान्तिः कलौ ह्यघौघस्य नामसंकीर्तनं हरेः ॥

हरेर्नामैव नामैव नामैव मम जीवनम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥

स्तुत्वा विष्णुं वासुदेवं विपापो जायते नरः ।
विष्णोः संपूजनान्नित्यं सर्वपापं प्रणश्यति ॥

सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ।
येषां हृदिस्थो भगवान्मङ्गलायतनं हरिः ॥

नित्यं संचिन्तयेद्देवं योगयुक्तो जनार्दनम् ।
सास्य मन्ये परा रक्षा को हिनस्त्यच्युताश्रयम् ॥

गङ्गास्नानसहस्रेषु पुष्करस्नानकोटिषु ।
यत्पापं विलयं याति स्मृते नश्यति तद्धरौ ॥

मुहूर्तमपि यो ध्यायेन्नारायणमनामयम् ।
सोऽपि सिद्धिमवाप्नोति किं पुनस्तत्परायणः ।

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम् ।
प्रयाति विलयं सद्यः सकृद्यत्रानुसंस्मृते ॥

सकृत्स्मृतोऽपि गोविन्दो नृणां जन्मशतैः कृतम् ।
पापराशिं दहत्याशु तूलराशिमिवानलः ॥

यथाग्निरुद्धतशिखः कक्षं दहति सानिलः ।
तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषम् ॥

एकस्मिन्नप्यतिक्रान्ते मुहूर्ते ध्यानवर्जिते ।
दस्युभिर्मुषितेनेव युक्तमाक्रन्दितुं भृशम् ॥

जनार्दनं भूतपतिं जगद्गुरुं
स्मरन्मनुष्यः सततं महामुने ।
दुःखानि सर्वाण्यपहन्ति साधय-
त्यशेषकार्याणि च यान्यभीप्सते ॥

एवमेकाग्रचित्तः सन्संस्मरन्मधुसूदनम् ।
जन्ममृत्युजराग्राहं संसाराब्धिं तरिष्यति ॥

कलावत्रापि दोषाढ्ये विषयासक्तमानसः ।
कृत्वापि सकलं पापं गोविन्दं संस्मरञ्शुचिः ॥

वासुदेवे मनो यस्य जपहोमार्चनादिषु ।
तस्यान्तरायो मैत्रेय देवेन्द्रत्वादिकं फलम् ॥

लोकत्रयाधिपतिमप्रतिमप्रभाव-
मीषत्प्रणम्य शिरसा प्रभविष्णुमीशम् ।
जन्मान्तरप्रलयकल्पसहस्रजात-
माशु प्रणाशमुपयाति नरस्य पापम् ॥

एकोऽपि कृष्णे सुकृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥

अतसीपुष्पसंकाशं पीतवाससमच्युतम् ।
ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥

शाठ्येनापि नमस्कारः प्रयुक्तश्चक्रपाणये ।
संसारमूलबन्धानामुद्वेजनकरो हि सः ॥

इत्यादिश्रुतिस्मृतीतिहासपुराणवचनेभ्यः ।

मङ्गलानां च मङ्गलं मङ्गलं सुखं तत्साधनं तज्ज्ञापकं च, तेषामपि परमानन्दलक्षणं परं मङ्गलमिति मङ्गलानां च मङ्गलम् । दैवतं देवतानां च देवानां देवः, द्योतनादिभिः समुत्कर्षेण वर्तमानत्वात् । भूतानां यः अव्ययः व्ययरहितः पिता जनकः यो देवः, सः एकं दैवतं लोके इति वाक्यार्थः ॥

एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च ॥

यो ब्रह्माणं विदधाति पूर्वं
यो वै वेदांश्च प्रहिणोति तस्मै ।

तꣳ ह देवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये ॥

इति श्वेताश्वतराणां मन्त्रोपनिषदि ।

'सेयं देवतैक्षत' 'एकमेवाद्वितीयम्' इति च्छान्दोग्ये ॥

ननु कथम् एको देवः, जीवपरयोर्भेदात्? न; 'तत्सृष्ट्वा तदेवानुप्राविशत्' 'स एष इह प्रविष्ट आ नखाग्रेभ्यः' इत्यादिश्रुतिभ्योऽविकृतस्य परस्य बुद्धितद्वृत्तिसाक्षित्वेन प्रवेशश्रवणादभेदः ॥

प्रविष्टानामितरेतरभेदात् परात्मैकत्वं कथमिति चेत्, न; 'एको देवो बहुधा संनिविष्टः' 'एकः सन्बहुधा विचारः' 'त्वमेकोऽसि बहूननुप्रविष्टः' इत्येकस्यैव बहुधा प्रवेशश्रवणात् प्रविष्टानां परस्य च न भेदः । 'हिरण्यगर्भः' इत्यष्टौ मन्त्राः 'कस्मै देवाय' इत्यत्र एकारलोपेन एकदेवत्वप्रतिपादकाः तैत्तिरीयके ।

अग्निर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च ॥

वायुर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभून्तरात्मा
रूपं रूपं प्रतिरूपो बहिश्च ॥

सूर्यो यथा सर्वलोकस्य चक्षु-
र्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा
न लिप्यते लोकदुःखेन बाह्यः ॥

एको वशी सर्वभूतान्तरात्मा
एकं रूपं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरा-
स्तेषां सुखं शाश्वतं नेतरेषाम् ॥

नित्यो नित्यानां चेतनश्चेतनाना-
मेको बहूनां यो विदधाति कामान् ।
तमात्मस्थं येऽनुपश्यन्ति धीरा-
स्तेषां शान्तिः शाश्वती नेतरेषाम् ॥

इति कठवल्लीषु ।

'ब्रह्म वा इदमग्र आसीत्तदेकं सन्न व्यभवत्' 'नान्योऽतोऽस्ति द्रष्टा' इत्यादि बृहदारण्यके । 'अनेजदेकं मनसो जवीयः ....तत्र को मोहः कः शोक एकत्वमनुपश्यतः'

इतीशावास्ये । 'सर्वेषां भूतानामान्तरः पुरुषः सम आत्मेति विद्यात्' 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किञ्चन' 'एकं सद्विप्रा बहुधा वदन्ति' 'एकं सन्तं बहुधा कल्पयन्ति' 'एको विममे त्रिभिरित्पदेभिः' 'एको दाधार भुवनानि विश्वा' 'एक एवाग्निर्बहुधा समिद्धः' इति ऋग्वेदे । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति च्छान्दोग्ये ।

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥

विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ॥

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥

यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ।
क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

इति भगवद्गीतासु ।

हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः ।
ओमित्येवं सदा विप्राः पठध्वं ध्यात केशवम् ॥

आश्चर्यं खलु देवानामेकस्त्वं पुरुषोत्तम ।
धन्यश्चासि महाबाहो लोके नान्योऽस्ति कश्चन ॥

इति हरिवंशे ।

मनुना चोक्तम्—

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति ॥ इति ॥

सृष्टिस्थित्यन्तकरणीं ब्रह्मविष्णुशिवात्मिकाम् ।
स संज्ञां याति भगवानेक एव जनार्दनः ॥

तस्मान्न विज्ञानमृतेऽस्ति किंचि-
त्कचित्कदाचिद्द्विज वस्तुजातम् ।
विज्ञानमेकं निजकर्मभेदा-
द्विभिन्नचित्तैर्बहुधाभ्युपेतम् ॥

ज्ञानं विशुद्धं विमलं विशोक-
मशेषलोभादिनिरस्तसङ्गम् ।
एकः सदैकः परमः परेशः
स वासुदेवो न यतोऽन्यदस्ति ॥

यदा समस्तदेहेषु पुमानेको व्यवस्थितः ।
तदा हि को भवान्सोऽहमित्येतद्विफलं वचः ॥

सितनीलादिभेदेन यथैकं दृश्यते नभः ।
भ्रान्तदृष्टिभिरात्मापि तथैकः सन्पृथक्पृथक् ॥

एकः समस्तं यदिहास्ति किंचि-
त्तदच्युतो नास्ति परं ततोऽन्यत् ।
सोऽहं स च त्वं स च सर्वमेत-
दात्मस्वरूपं त्यज भेदमोहम् ।
इतीरितस्तेन स राजवर्य-
स्तत्याज भेदं परमार्थदृष्टिः ॥

सकलमिदमहं च वासुदेवः परमपुमान्परमेश्वरः स एकः ।
इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान्विहाय दूरात् ॥

यदाह वसुधा सर्वं सत्यमेतद्दिवौकसः ।
अहं भवो भवन्तश्च सर्वे नारायणात्मकम् ॥

विभूतयस्तु यास्तस्य तासामेव परस्परम् ।
आधिक्यन्यूनता बाध्यबाधकत्वेन वर्तते ॥

भवानहं च विश्वात्मन्नेक एव हि कारणम् ।
जगतोऽस्य जगत्यर्थे भेदेनावां व्यवस्थितौ ॥

त्वया यदभयं दत्तं तदत्तमभयं मया ।
मत्तोऽविभिन्नमात्मानं द्रष्टुमर्हसि शंकर ॥

सोऽहं स त्वं जगच्चेदं सदेवासुरमानुषम् ।
अविद्यामोहितात्मानः पुरुषा भिन्नदृष्टयः ॥

इति श्रीविष्णुपुराणे ॥

विष्णोरन्यं तु पश्यन्ति ये मां ब्रह्माणमेव वा ।
कुतर्कमतयो मूढाः पच्यन्ते नरकेष्वधः ॥
ये च मूढा दुरात्मानो भिन्नं पश्यन्ति मां हरेः ।
ब्रह्माणं च ततस्तस्मात् ब्रह्महत्यासमं त्वघम् ॥

इति भविष्यत्पुराणे श्रीमहेश्वरवचनम् ।

आदिस्त्वं सर्वभूतानां मध्यमन्तस्तथा भवान् ।
त्वत्तः समभवद्विश्वं त्वयि सर्वं प्रलीयते ॥
अहं त्वं सर्वगो देव त्वमेवाहं जनार्दन ।
आवयोरन्तरं नास्ति शब्दैरर्थैर्जगत्पते ॥
नामानि तव गोविन्द यानि लोके महान्ति च ।
तान्येव मम नामानि नात्र कार्या विचारणा ॥
त्वदुपासा जगन्नाथ सैवास्तु मम गोपते ।
यश्च त्वां द्वेष्टि भो देव स मां द्वेष्टि न संशयः ॥
त्वद्विस्तारो यतो देव ह्यहं भूतपतिस्ततः ।
न तदस्ति विना देव यत्ते विरहितं क्वचिन् ॥
यदासीद्वर्तते यच्च यच्च भावि जगत्पते ।
सर्वं त्वमेव देवेश विना किंचित्त्वया न हि ॥

इति हरिवंशे कैलासयात्रायां महेश्वरवचनम् ।

अपि च— 'आत्मेति तूपगच्छन्ति ग्राहयन्ति च'

आत्मेत्येवं शास्त्रोक्तलक्षणः परमात्मा प्रतिपत्तव्यः। तथा हि परमात्मप्रक्रियायां जाबाला आत्मत्वेनैवैनमभ्युपगच्छन्ति—'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि' इति। तथान्येऽपि— 'यदेवेह तदमुत्र यदमुत्र तदन्विह'। 'स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः' 'तदात्मानमेवावेदहं ब्रह्मास्मीति' 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म' 'स वा एष महानज आत्माजरोऽमरोऽमृतोऽभयो ब्रह्म' इत्येवमादयः आत्मत्वोपगमा द्रष्टव्याः। ग्राहयन्ति च बोधयन्ति चात्मत्वेनेश्वरं वेदान्तवाक्यानि— 'एष त आत्मान्तर्याम्यमृतः' 'यन्मनसा न मनुते येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' 'तत्सत्यं स आत्मा तत्त्वमसि' इत्येवमादीनि॥

ननु प्रतीकदर्शनमिदं विष्णुप्रतिमान्यायेन भविष्यति— तदयुक्तम्, गौणत्वप्रसङ्गात्, वाक्यवैरूप्याच्च। यत्र हि प्रतीकदृष्टिरभिप्रेयते सकृदेव तत्र वचनं भवति। यथा— 'मनो ब्रह्म' 'आदित्यो ब्रह्म' इति। इह पुनः 'त्वमहमस्मि अहं वै त्वमसि' इत्याह। अतः प्रतीकश्रुतिवैरूप्यादभेदप्रतिपत्तिः। भेददृष्ट्यपवादाच्च। तथा हि— 'अथ योऽन्यां

देवतामुपास्ते अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' 'यथोदकं दुर्गे वृष्टं पर्वतेषु विधावति । एवं धर्मान्पृथक्पश्यंस्तानेवानुविधावति' 'द्वितीयाद्वै भयं भवति' 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषो मन्वानस्य' 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' इत्येवमाद्या भूयसी श्रुतिर्भेददृष्टिमपवदति । तथा 'आत्मैवेदं सर्वम्' 'आत्मनि विज्ञाते सर्वमिदं विज्ञातं भवति' 'इदं सर्वं यदयमात्मा' 'ब्रह्मैवेदं सर्वम्' इति श्रुतिः । तथा स्मृतिरपि 'यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पाण्डव । येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि' क्षेत्रज्ञेश्वरैकत्वं सर्वोपनिषत्प्रसिद्धं द्रक्ष्यसीत्यर्थः । 'सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्' इति अद्वैतात्मज्ञानं सम्यग्दर्शनमित्युक्तं भगवतापि । तस्मादात्मन्येवेश्वरे मनो दधीत ॥

'आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः' इति च ।
'अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ॥' इति च ।

अविद्योपाधिपक्षेऽपि प्रमाणवादः समस्ति—

एक एव महानात्मा सोऽहंकारोऽभिधीयते ।
स जीवः सोऽन्तरात्मेति गीयते तत्त्वचिन्तकैः ॥

तथा श्रीविष्णुपुराणे—

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

परात्मनो मनुष्येन्द्र विभागोऽज्ञानकल्पितः ।
क्षये तस्यात्मपरयोर्विभागोऽभाग एव हि ॥ इति ।

विष्णुधर्मे—

यथैकस्मिन्घटाकाशे रजोधूमादिभिर्युते ।
नान्ये मलिनतां यान्ति दूरस्थाः कुत्रचित्कचित् ॥

तथा द्वन्द्वैरनेकैस्तु जीवे च मलिने कृते ।
एकस्मिन्नापरे जीवा मलिनाः सन्ति कुत्रचित् ॥ इति ।

ब्रह्मयाज्ञवल्क्ये—

आकाशमेकं हि यथा घटादिषु पृथग्भवेत् ।
तथात्मैकोऽप्यनेकेषु जलाधारेष्विवांशुमान् ॥

'क्षरात्मानावीशते देव एकः' इति श्वेताश्वतरे । छान्दोग्ये—'स एकधा भवति' इत्यादि । 'स तत्र पर्येति' 'स वा एष एतेन दैवेन चक्षुषा मनसैतान्कामान्पश्यन्रमते'

'परो विकृत एवात्मा स्वात्मायं जीवः' इति श्रुतेः । 'स एष इह प्रविष्टः' इति बृहदारण्यकश्रुतिः । 'आत्मेत्येवोपासीत' इति । 'तदेतद्ब्रह्मापूर्वम्' इत्यादि । 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति विज्ञाता' इत्यादि । 'स वा एष महानज आत्मा योऽयं विज्ञानमयः' इत्यादि । 'अथ योऽन्यां देवतामुपास्ते,' 'ऐतदात्म्यमिदं सर्वम्' इति । 'क्षेत्रज्ञं चापि मां विद्धि' इति ।

निश्चरन्ति यथा लोहपिण्डात्तप्तात्स्फुलिङ्गकाः ।
सकाशादात्मनस्तद्वत्प्रभवन्ति जगन्ति हि ॥
योगयाज्ञवल्क्ये ।

अजः शरीरग्रहणात्स जात इति कीर्त्यते । इति ब्राह्मे ।
सर्पवद्रज्जुखण्डस्तु निशायां वेश्ममध्यगः ।
एको हि चन्द्रो द्वौ व्योम्नि तिमिराहतचक्षुषः ॥
आभाति परमात्मा च सर्वोपाधिषु संस्थितः ।
नित्योदितः स्वयंज्योतिः सर्वगः पुरुषः परः ॥
अहंकाराविवेकेन कर्ताहमिति मन्यते । इति ।

'एवमेवायं पुरुषः प्राज्ञेनात्मना' इति । 'सता सोम्य तदा संपन्नो भवति' इति ।

स्वमायया स्वमात्मानं मोहयन्द्वैतमायया ।
गुणाहतं स्वमात्मानं लभते च स्वयं हरिः ॥ इति ।

'उत्क्रामन्तं स्थितं वापि' इति। 'अज्ञानेनावृतं ज्ञानम्' इति। 'अव्यक्तादिविशेषान्तमविद्यालक्षणं स्मृतम्' 'आसीदिदं तमोभूतम्' इति।

'वाचारम्भणम्' इत्यादि। 'यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति। यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत् तत्केन कं जिघ्रेत्' 'यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥'

'यत्र नान्यत्पश्यति नान्यत्' इत्यादि। 'भेदोऽयमज्ञाननिबन्धनः' इति। 'नेह नानास्ति किंचन'। 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' इति। 'विश्वतश्चक्षुः' इत्यादि। 'यो योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः' इति च। 'अजामेकां लोहितशुक्लकृष्णाम्' इत्यादि। 'अजो ह्येको जुषमाणोऽनुशेते' 'देवात्मशक्तिं विदधे' इति। 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' इत्यादि। 'एक एव रुद्रो न द्वितीयाय तस्थे'।

मनोविजृम्भितं चैतद्यत्किंचित्सचराचरम्।
मनसो ह्यात्मनीभावे द्वैताभावात्तदाप्नुयात्॥

यद्यद्वैतं प्रपञ्चस्य तन्निवर्त्य हि चेतसा ।
मनोवृत्तिमयं द्वैतमद्वैतं परमार्थतः ॥
यथा स्वप्ने द्वयाभासं चित्तं चलति मायया ।
तथा जाग्रद्द्वयाभासं चित्तं चलति मायया ॥
इत्यादि गौडपादे ।

तर्केणापि प्रपञ्चस्य मनोमात्रत्वमिष्यताम् ।
दृश्यत्वात्सर्वभूतानां स्वप्नादिविषयो यथा ॥

'द्वितीयाद्वै भयं भवति' इति च । 'ज्ञाते त्वात्मनि नास्त्येतत् कार्यकारणतात्मनः' इति च । 'एको देवः सर्वभूतेषु गूढः' इति । 'असङ्गो ह्ययं पुरुषः' इति च ।

विस्तारः सर्वभूतस्य विष्णोः संर्वमिदं जगत् ।
द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ॥
सर्वत्र दैत्याः समतामुपेत्य समत्वमाराधनमच्युतस्य ॥
सर्वभूतात्मके तात जगन्नाथे जगन्मये ।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः ॥

'तत्त्वमसि' 'अहं ब्रह्मास्मि' 'इदं सर्वं यदयमात्मा' 'अयमात्मा ब्रह्म' 'तरति शोकमात्मवित्' इति । 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इत्यादिश्रुतिस्मृतीतिहासपुराणलौकिकेभ्यश्च ।

सिद्धेऽर्थेऽपि वेदस्य प्रामाण्यमेष्टव्यम्—'स्वपक्षसाधनैरकार्यमर्थजातमाह चेत् । तथा परोऽपि वेद चेच्छ्रुतिः परात्मदृङ् न किम् ।' इत्यभियुक्तैरुक्तम् । अन्यान्वितस्वार्थे पदानां सामर्थ्यं न कार्यान्वितस्वार्थे, तथा सत्यर्थवादानामनन्वयप्रसङ्गात् अन्वयबुद्धेः स्तुतित्वात् । न हि भवति 'वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता' इति । रागस्यैव प्रवर्तकत्वम्, न नियोगस्य । तथा च श्रुतिः—'अथो खल्वाहुः काममय एवायं पुरुषः इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म तदभिसंपद्यते' । तथा च स्मृतिरपि—'अकामतः क्रिया काचिद्दृश्यते नेह कस्यचित् । यद्यद्धि कुरुते कर्म तत्तत्कामस्य चेष्टितम् ।' इति । 'काम एष क्रोध एषः' इति । अन्यपराणामपि मन्त्रार्थवादानां प्रामाण्यमङ्गीकर्तव्यम् । तेषामप्रामाण्यकथनेन उरगत्वं गतवान्नहुषः । तत्कथम् ?—

ऋषयस्तु परिश्रान्ता वाह्यमाना दुरात्मना ।
देवर्षयो महाभागास्तथा ब्रह्मर्षयोऽमलाः ॥

पप्रच्छुः संशयं ते तु नहुषं पापचेतसम् ।
य इमे ब्रह्मणा प्रोक्ता मन्त्रा वै प्रोक्षणे गवाम् ॥

एते प्रमाणं भवत उताहो नेति वासव ।
नहुषो नेति तानाह सहसा मूढचेतनः ॥

ऋषय ऊचुः—

अधर्मे संप्रवृत्तस्त्वं धर्मं च विजिघृक्षसि ।
प्रमाणमेतदस्माकं पूर्वं प्रोक्तं महर्षिभिः ॥

अगस्त्य उवाच—

ततो विवदमानः सन् ऋषिभिः सह पार्थिवः ।
अथ मामस्पृशन्मूर्ध्नि पादेनाधर्मपीडितः ॥

तेनाभूद्धतचेताः सन्निःश्रीकश्च शचीपते ।
ततस्तमहमुद्विग्नमवोचं भयपीडितम् ॥

यस्मात्पूर्वैः कृतं मार्गं महर्षिभिरनुष्ठितम् ।
अदुष्टं दूषयसि वै यच्च मूर्ध्न्यस्पृशः पदा ॥

यच्चापि त्वमृषीन्मूढ ब्रह्मकल्पान्दुरासदान ।
वाहान्कृत्वा वाहयसि तेन स्वर्गाद्धतप्रभः ॥

त्वं स्वपापपरिभ्रष्टः क्षीणपुण्यो.महीपते ।
दश वर्षसहस्राणि सर्परूपधरो महीम् ॥

विचरिष्यसि तीर्णश्च पुनः स्वर्गमवाप्स्यसि ।
दृष्ट्वा युधिष्ठिरं नाम तव वंशसमुद्भवम् ॥

इति श्रीमहाभारते ।

अतः श्रद्धेयमात्मज्ञानम्—'अश्रद्दधानाः पुरुषा धर्मस्यास्य परंतप। अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि' इति श्रीभ-

गवद्वचनात् । ऐतरेयके च 'एष पन्था एतत्कर्मैतद्ब्रह्मैतत्सत्यं तस्मान्न प्रमाद्येत्तन्नातीयान्न ह्यत्यायन्पूर्वे येऽत्यायंस्ते पराबभूवुः' । तदुक्तमृषिणा— 'प्रजा ह तिस्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे । बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आविवेश' इति ।

'प्रजा ह तिस्रो अत्यायमीयुरिति या वै ता इमाः प्रजाः तिस्रोऽत्यायमीयुस्तानीमानि वयांसि वङ्गा वगधाश्चेरपादाः' इति श्रुतम् । वङ्गा वनगाः वृक्षाः । वगधाः ओषधयश्च । इरपादा उरःपादाः सर्पादयः । तथा च ईशावास्ये अविद्वन्निन्दार्थो मन्त्रः— 'असुर्या नाम ते लोका अन्धेन तमसा वृताः । ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः' इति । 'असन्नेव स भवति । असद्ब्रह्मेति वेद चेत्' इति तैत्तिरीये । तथा शकुन्तलोपाख्याने— 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥' इत्यलमतिप्रसङ्गेन ॥

सहस्रनामजपस्य अनुरूपं मानसस्नानमुच्यते—

यस्मिन्देवाश्च वेदाश्च पवित्रं कृत्स्नमेकताम् ।
व्रजेत्तन्मानसं तीर्थं तत्र स्नात्वामृतो भवेत् ॥

ज्ञानह्रदे ध्यानजले रागद्वेषमलापहे ।
यः स्नाति मानसे तीर्थे स याति परमां गतिम् ।
सरस्वती रजोरूपा तमोरूपा कलिन्दजा ।
सत्त्वरूपा च गङ्गा च न यान्ति ब्रह्म निर्गुणम् ॥

आत्मा नदी संयमतोयपूर्णा
सत्यह्रदा शीलतटा दयोर्मिः ।
तत्रावगाहं कुरु पाण्डुपुत्र
न वारिणा शुध्यति चान्तरात्मा ॥ इति महाभारते ।

'मानसं स्नानं विष्णुचिन्तनम्' इति विष्णुस्मृतौ ।
जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥
इति मानवं वचनम् ।

जपस्तु सर्वधर्मेभ्यः परमो धर्म उच्यते ।
अहिंसया च भूतानां जपयज्ञः प्रवर्तते ॥ इति ।

'यज्ञानां जपयज्ञोऽस्मि ।' इति श्रीगीतासु ।
'अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः' इत्यादि ।

यदेकं दैवतं प्रस्तुतं तस्योपलक्षणम् उच्यते—

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ ११ ॥

यतः यस्मात् सर्वाणि भूतानि भवन्ति उद्भवन्ति आदि-युगागमे । यस्मिंश्च प्रलयं विनाशं यान्ति पुनः भूयः एव इत्यवधारणार्थः; नान्यस्मिन्नित्यर्थः । युगक्षये महाप्रलये । चकारात् मध्येऽपि यस्मिन् तिष्ठन्ति, 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतेः ॥

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् ॥१२॥

तस्य एवंलक्षणलक्षितस्य एकस्य दैवतस्य लोकप्रधानस्य लोकनहेतुभिः विद्यास्थानैः प्रतिपाद्यमानस्य जगन्नाथस्य जगतां नाथः स्वामी मायाशवलः परमात्मा निर्लेपश्च तस्य भूपते महीपाल, विष्णोः व्यापनशीलस्य नामसहस्रं नाम्नां सहस्रं पापं भयं चापहन्तीति पापभयापहं त्वं मे मम मत्तः शृणु एकाग्रमना भूत्वा अवधारय ॥

एकस्यैव समस्तस्य ब्रह्मणो द्विजसत्तम ।
नाम्नां सहस्रं लोकानामुपकारकरं शृणु ॥
निमित्तशक्तयो नाम्नां भेदिन्यस्तदुदीरणात् ।
विभिन्नान्येव साध्यन्ते फलानि द्विजसत्तम ॥
यच्छक्ति नाम यत्तस्य तत्तस्मिन्नेव वस्तुनि ।
साधकं पुरुषव्याघ्र सौम्यक्रूरेषु वस्तुषु ॥ इति विष्णुधर्मे ।

यद्यपि परस्य ब्रह्मणः षष्ठीगुणक्रियाजातिरूढीनां शब्द-प्रवृत्तिहेतुभूतानां निमित्तशक्तीनां चासंभवः, तथापि सगुणे ब्रह्मणि सविकारे च सर्वात्मकत्वात् तेषां शब्दप्रवृत्तिहेतूनां संभवात् सर्वे शब्दाः परस्मिन पुंसि प्रवर्तन्ते ॥

तत्र—

यानि नामानि गौणानि
विख्यातानि महात्मनः ।
ऋषिभिः परिगीतानि
तानि वक्ष्यामि भूतये ॥ १३ ॥

यानि नामानि गौणानि गुणसंबन्धीनि गुणयोगात् प्रवृत्तानि तेषु च यानि विख्यातानि प्रसिद्धानि ऋषिभिः मन्त्रैः तद्दर्शिभिश्च परिगीतानि परितः समन्ततः परमेश्वराख्यानेषु तत्र तत्र गीतानि । महांश्चासावात्मा चेति महात्मा—'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह । यच्चास्य संततो भावस्तस्मादात्मेति कीर्त्यते' इति वचनात् । अयमेव महानात्मेति महात्मा । तस्याचिन्त्यप्रभावस्य तानि वक्ष्यामि भूतये पुरुषार्थचतुष्टयसिद्धये पुरुषार्थचतुष्टयार्थिनामिति ॥

अत्र नामसहस्रे आदित्यादिशब्दानाम् अर्थान्तरे प्रसि-

द्धानां आदित्याद्यर्थानां तद्विभूतित्वेन तदभेदात् तस्यैव स्तुतिरिति प्रसिद्धार्थग्रहणेऽपि तत्स्तुतित्वम् ।

भूतात्मा चेन्द्रियात्मा च प्रधानात्मा तथा भवान् ।
आत्मा च परमात्मा च त्वमेकः पञ्चधा स्थितः ॥
ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ॥
इति विष्णुपुराणे ।

'आदित्यानामहं विष्णुः' इत्यारभ्य 'एकांशेन स्थितो जगत्' इतिपर्यन्तं गीतासु । 'पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्' इत्यादिश्रुतिश्च । विष्ण्वादिशब्दानां पुनरुक्तानामपि वृत्तिभेदेनार्थभेदात् न पौनरुक्त्यम् । 'श्रीपतिर्मांधवः' इत्यादीनां वृत्त्येकत्वेऽपि शब्दभेदान्न पौनरुक्त्यम् । अर्थैकत्वेऽपि न पौनरुक्त्यं दोषाय, 'नाम्नां सहस्रस्य किमेकं दैवतम्' इति प्रष्टेः एकदेवताविषयत्वात् ॥

यत्र पुंलिङ्गशब्दप्रयोगः, तत्र विष्णुर्विशेष्यः; यत्र स्त्रीलिङ्गशब्दः तत्र देवता विशेष्यते; यत्र नपुंसकलिङ्गशब्दः तत्र ब्रह्मेति विशेष्यते ॥

'यतः सर्वाणि भूतानि' इत्यारभ्य जगदुत्पत्तिस्थितिलयकारणस्य ब्रह्मण एकदेवतात्वेनाभिहितत्वादादावुभयविधं

ब्रह्म विश्वशब्देनोच्यते—

विश्वं विष्णुर्वषट्कारो
भूतभव्यभवत्प्रभुः ।
भूतकृद्भूतभृद्भावो
भूतात्मा भूतभावनः ॥ १४ ॥

विश्वस्य जगतः कारणत्वेन विश्वम् इत्युच्यते ब्रह्म । आदौ तु विश्वमिति कार्यभूतविश्वशब्देन कारणग्रहणं कार्यभूतविरिञ्च्यादिनामभिरपि उपपन्ना स्तुतिर्विष्णोः इति दर्शयितुम् । यद्वा, परस्मात् पुरुषात् न भिन्नमिदं विश्वं परमार्थतः तेन विश्वमित्यभिधीयते ब्रह्म, 'ब्रह्मैवेदं विश्वम्' 'पुरुष एवेदं विश्वम्' 'विश्वमेवेदम्' इत्यादिश्रुतिभ्यः । तद्भिन्नं न किंचित् परमार्थतः सदस्ति । अथवा, विशतीति विश्वं ब्रह्म, 'तत्सृष्ट्वा तदेवानुप्राविशत्' इति श्रुतेः । किंच, संहृतौ विशन्ति विश्वानि भूतानि अस्मिन्निति विश्वं ब्रह्म, 'यत् प्रयन्त्यभिसंविशन्ति' इति श्रुतेः । तथा हि— सकलं जगत्कार्यभूतमेष विशति, अत्र अखिलं विश्वं विशतीत्युभयथापि विश्वं ब्रह्म इति, श्रुतेः । 'अन्यत्र धर्मादन्यत्राधर्मात्' इत्यारभ्य 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च

यद्वदन्ति । यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि । ओमित्येतत् । एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम् । एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्' इति काठके । 'एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः' इत्युपक्रम्य 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' इति प्रश्नोपनिषदि । 'ओमिति ब्रह्म । ओमितीदं सर्वम्' इति यजुर्वेदारण्यके । 'तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक् संतृण्णा । ओंकार एवेदं सर्वम् ।' इति च्छान्दोग्ये । 'ओमित्येतदक्षरम्' इत्युपक्रम्य

प्रणवो ह्यपरं ब्रह्म प्रणवश्च परः स्मृतः ।
अपूर्वोऽनन्तरो बाह्यो न परः प्रणवोऽव्ययः ॥
सर्वस्य प्रणवो ह्यादिः मध्यमन्तस्तथैव च ।
एवं हि प्रणवं ज्ञात्वा व्यश्नुते तदनन्तरम् ॥
प्रणवं हीश्वरं विन्द्यात्सर्वस्य हृदये स्थितम् ।
सर्वव्यापिनमोंकारं ज्ञात्वा धीरो न शोचति ॥
अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ।
ओंकारो विदितो येन स मुनिर्नेतरो जनः ॥ इति ।

'ओं तद्ब्रह्म । ओं तद्वायुः । ओं तदात्मा । ओं तत्स-

त्यम्' इत्यादिभ्यः श्रुतिभ्यः ।

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन्देहं स याति परमां गतिम् ॥

यदक्षरं वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥

रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ।
प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥

.....गिरामस्म्येकमक्षरम् ॥

आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन्प्रतिष्ठिता ।
एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ॥

ओंकारः स्वर्गद्वारं तस्माद्ब्रह्माध्येष्यमाण एतदादि प्रतिपद्येत । विकथां चान्यां कृत्वा एवं लौकिक्या वाचा व्यावर्तते ब्रह्म' । 'प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः । वाङ्मयं प्रणवः सर्वं तस्मात्प्रणवमभ्यसेत्' इत्यादिस्मृतिभ्यश्च विश्वशब्देन ओंकारोऽभिधीयते । वाच्यवाचकयोरत्यन्तभेदाभावात् विश्वमित्योंकार एव ब्रह्मेत्यर्थः । 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' इति । एतदुक्तं भवति— यस्मात्सर्वमिदं विकारजातं ब्रह्म तज्जत्वात् तल्लत्वात् तद-

नत्वाच्च । न च सर्वस्यैकात्मत्वे रागादयः संभवन्ति । 'तस्माच्छान्त उपासीत' इति श्रुतेः,

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम् ।
आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन ।
सुखं वा यदि वा दुःखं स योगी परमो मतः ॥

निर्गुणः परमात्मात्र देहे व्याप्य व्यवस्थितः ।
तमहं ज्ञानविज्ञेयं नावमन्ये न लङ्घये ॥

यद्यागमैर्न विन्देयं तमहं भूतभावनम् ।
क्रमेयं त्वां गिरिं चेमं हनुमानिव सागरम् ॥

बद्धवैराणि भूतानि द्वेषं कुर्वन्ति चेत्ततः ।
शोच्यान्यहोऽतिमोहेन व्याप्तानीति मनीषिणाम् ।
एते भिन्नदृशां दैत्या विकल्पाः कथिता मया ॥

कृत्वाभ्युपगमं तत्र संक्षेपः श्रूयतां मम ।
विस्तारः सर्वभूतस्य विष्णोः सर्वमिदं जगत् ॥

द्रष्टव्यमात्मवत्तस्मादभेदेन विचक्षणैः ।
समुत्सृज्यासुरं भावं तस्माद्यूयं तथा वयम् ॥

तथा यत्नं करिष्यामो यथा प्राप्स्याम निर्वृतिम् ।
सर्वत्र दैत्याः समतामुपेताः समत्वमाराधनमच्युतस्य ॥

न मन्त्रादिकृतस्तात न च नैसर्गिको मम ।
प्रभाव एष सामान्यो यस्य यस्याच्युतो हृदि ॥

अन्येषां यो न पापानि चिन्तयत्यात्मनो यथा ।
तस्य पापागमस्तात हेत्वभावान्न विद्यते ॥

कर्मणा मनसा वाचा परपीडां करोति यः ।
तद्बीजं जन्म फलति प्रभूतं तस्य चाशुभम् ॥

सोऽहं न पापमिच्छामि न करोमि वदामि वा ।
चिन्तयन्सर्वभूतस्थमात्मन्यपि च केशवम् ॥

शारीरं मानसं वाग्जं दैवं भूतभवं तथा ।
सर्वत्र समचित्तस्य तस्य मे जायते कुतः ॥

एवं सर्वेषु भूतेषु भक्तिरव्यभिचारिणी ।
कर्तव्या पण्डितैर्ज्ञात्वा सर्वभूतमयं हरिम् ॥

साम चोपप्रदानं च भेददण्डौ तथापरौ ।
उपायाः कथिता ह्येते मित्रादीनां च साधने ॥

तानेवाहं न पश्यामि मित्रादींस्तात मा क्रुधः ।
साध्याभावे महाबाहो साधनैः किं प्रयोजनम् ॥

सर्वभूतात्मके तात जगन्नाथे जगन्मये ।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः ॥

जडानामविवेकानामशूराणामपि प्रभो ।
भाग्यभोग्यानि राज्यानि सन्त्यनीतिमतामपि ॥

तस्माद्यतेत पुण्येषु य इच्छेन्महतीं श्रियम् ।
यतितव्यं समत्वेन निर्वाणमपि चेच्छता ॥

देवा मनुष्याः पशवः पक्षिवृक्षसरीसृपाः ।
रूपमेतदनन्तस्य विष्णोर्भिन्नमिव स्थितम् ॥

एतद्विजानता सर्वं जगत्स्थावरजङ्गमम् ।
द्रष्टव्यमात्मवद्विष्णुर्यतोऽयं विश्वरूपधृक ॥

एवं ज्ञाते स भगवाननादिः परमेश्वरः ।
प्रसीदत्यच्युतो यस्मिन्प्रसन्ने क्लेशसंक्षयः ॥

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

इत्यादिवचनैश्च हिंसादिरहितेन स्तुतिनमस्कारादि कर्तव्यमिति दर्शयितुं विश्वशब्देन ब्रह्माभिधीयत इति वा ॥

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ॥ इति ।

न चलति निजवर्णधर्मतो यः
सममतिरात्मसुहृद्विपक्षपक्षे ।
न हरति न च हन्ति किंचिदुच्चैः
सितमनसं तमवेहि विष्णुभक्तम् ॥

विमलमतिरमत्सरः प्रशान्तः
शुभचरितोऽखिलसत्त्वमित्रभूतः ।

प्रियहितवचनोऽस्तमानमायो
वसति सदा हृदि तस्य वासुदेवः ॥

वसति हृदि सनातने च तस्मि-
न्भवति पुमाञ्जगतोऽस्य सौम्यरूपः ।
क्षितिरसमतिरम्यमात्मनोऽन्तः
कथयति चारुतयैव सालपोतः ॥

सकलमिदमहं च वासुदेवः
परमपुमान्परमेश्वरः स एकः ।
इति मतिरचला भवत्यनन्ते
हृदयगते व्रज तान्विहाय दूरात् ॥

यमनियमविधूतकल्मषाणा-
मनुदिनमच्युतसक्तमानसानाम् ।
अपगतमदमानमत्सराणां
व्रज भट दूरतरेण मानवानाम् ॥

इत्यादिवचनैर्वैष्णवलक्षणस्य एवंप्रकारत्वाच्च हिंसादिरहि-
विष्णोः स्तुतिनमस्कारादि कर्तव्यमिति । 'श्रद्धया दे-
अश्रद्धयादेयम्' 'श्रद्धयाग्निः समिध्यते' इति श्रुतेः,

मश्रोत्रियं श्राद्धमधीतमव्रत-
मदक्षिणं यज्ञमनृत्विजा हुतम् ।

अश्रद्धया दत्तमसंस्कृतं हवि-
भागाः षडेते तव दैत्यसत्तम ॥

पुण्यं मद्वेषिणां यच्च मद्भक्तद्वेषिणां तथा ।
क्रयविक्रयसक्तानां पुण्यं यच्चाग्निहोत्रिणाम् ॥

अश्रद्धया च यद्दानं यजतां ददतां तथा ।
तत्सर्वं तव दैत्येन्द्र मत्प्रसादाद्भविष्यति ॥

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥

इत्यादिस्मृतिभ्यश्च श्रद्धया स्तुतिनमस्कारादि कर्तव्यम्, नाश्रद्धया । 'ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति भगवद्वचनात् स्तुतिनमस्कारादिकं कर्मासात्त्विकं विगुणमपि श्रद्धापूर्वकं ब्रह्मणोऽभिधानत्रयप्रयोगेण सगुणं सात्त्विकं संपादितं भवति । आत्मानं विष्णुं ध्यात्वा स्तुतिनमस्कारादि कर्तव्यम् ।

नाविष्णुः कीर्तयेद्विष्णुं नाविष्णुर्विष्णुमर्चयेत् ।
नाविष्णुः संस्मरेद्विष्णुं नाविष्णुर्विष्णुमाप्नुयात् ॥
इति महाभारते कर्मकाण्डे ।

सर्वाण्येतानि नामानि परस्य ब्रह्मणोऽनघ ।
एवमेतानि नामानि देवदेवस्य कीर्तयेत् ॥

यं यं काममभिध्यायेत्तं तमाप्नोत्यसंशयम् ।
सर्वान्कामानवाप्नोति समाराध्य जगद्गुरुम् ॥

तन्मयत्वेन गोविन्दमित्येतद्दालभ्य नान्यथा ।
तन्मयो वाञ्छितान्कामान्पदमाप्नोति मानवः ॥
इति विष्णुधर्मे ।

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥
इति भगवद्गीतासु ।

अहं हरिः सर्वमिदं जनार्दनो
नान्यत्ततः कारणकार्यजातम् ।
ईदृङ्मनो यस्य न तस्य भूयो
भवोद्भवा द्वन्द्वगदा भवन्ति ॥ इति विष्णुपुराणे ।

गुरोर्यत्र परीवादो निन्दा वापि प्रवर्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥

'तस्माद्ब्रह्मैवाचार्यरूपेणावतिष्ठते' इति व्यासस्मृतेः ।
वरं हुतवहज्वालापुञ्जस्यान्तर्व्यवस्थितिः ।
न शौरिचिन्ताविमुखजनसंवासवैशसम् ॥

इति कात्यायनवचनात् यत्र देशे वासुदेवनिन्दा तत्र वासो न कर्तव्यः । एतदुक्तं भवति—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इति श्वेताश्वतरोपनिषन्मन्त्रवर्णात् हरौ गुरौ च परा भक्तिः कार्येति ॥

अवशेनापि यन्नाम्नि कीर्तिते सर्वपातकैः ।
पुमान्विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव ॥

ज्ञानतोऽज्ञानतो वापि वासुदेवस्य कीर्तनात् ।
तत्सर्वं विलयं याति तोयस्थं लवणं यथा ॥

कलिकल्मषमत्युग्रं नरकार्तिप्रदं नृणाम् ।
प्रयाति विलयं सद्यः सकृद्यत्रानुसंस्मृते ॥

सकृत्स्मृतोऽपि गोविन्दो नृणां जन्मशतैः कृतम् ।
पापराशिं दहत्याशु तूलराशिमिवानलः ॥

सेयं वदनवल्मीकवासिनी रसनोरगी ।
या न गोविन्द गोविन्द गोविन्देति प्रभाषते ॥

पापवल्ली मुखे तस्य जिह्वारूपेण तिष्ठति ।
या न वक्ति दिवारात्रौ गुणान्गोविन्दसंभवान् ॥

सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ।
बद्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥

एकोऽपि कृष्णे सुकृतः प्रणामो
दशाश्वमेधावभृथेन तुल्यः ।

दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय ॥

इत्यादिवचनैः श्रद्धाभक्त्योरभावेऽपि नामसंकीर्तनं समस्तं दुरितं नाशयतीत्युक्तम् । किमुत श्रद्धादिपूर्वकं सहस्रनाम-संकीर्तनं नाशयतीति ।

'मनसा वा अग्रे संकल्पयत्यथ वाचा व्याहरति', 'यद्धि मनसा ध्यायति तद्वाचा वदति' इति श्रुतिभ्यां स्मरणं ध्यानं च नामसंकीर्तनेऽन्तर्भूतम् ।

यस्मिन्न्यस्तमतिर्न याति नरकं स्वर्गोऽपि यच्चिन्तने
विघ्नो यत्र निवेशिते च मनसि ब्राह्मोऽपि लोकोऽल्पकः ।
मुक्तिं चेतसि यः स्थितोऽमलधियां पुंसां ददात्यव्ययः
किं चित्रं यदघं प्रयाति विलयं तत्राच्युते कीर्तिते ॥
इति विष्णुपुराणे श्रीपराशरेणोपसंहृतम् ।

आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥
इति महाभारतान्ते भगवता श्रीवेदव्यासेनोपसंहृतम् ।

हरिरेकः सदा ध्येयो भवद्भिः सत्त्वसंस्थितैः ।
ओमित्येवं सदा विप्राः पठत ध्यात केशवम् ॥

इति हरिवंशे कैलासयात्रायां हरिरेको ध्यातव्य इत्युक्तं

श्रीमहेश्वरेणापि। एतत्सर्वमभिप्रेत्य 'एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः' इत्याधिक्यमुक्तम्। 'किमेकं दैवतम्' इत्यारभ्य 'किं जपन्मुच्यते जन्तुः' इति षट्प्रश्नेषु 'यतः सर्वाणि' इति प्रश्नोत्तराभ्यां यद्ब्रह्मोक्तं तद्विश्वशब्देनोच्यत इति व्याख्यातं **विश्वम्**। तत्किमित्याकाङ्क्षायामाह— विष्णुः इति। तथा च ऋग्वेदे— 'आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे' इत्यादिवाक्यैर्विष्णोः नामसंकीर्तनेन सम्यग्ज्ञानप्राप्तिर्विहिता। वेवेष्टि व्याप्नोतीति **विष्णुः**। विषेर्व्याप्त्यभिधायिनो नुक्प्रत्ययान्तस्य रूपम्। देशकालवस्तुपरिच्छेदशून्य इत्यर्थः। 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इत्यादिश्रुतेः। विशतेर्वा नुक्प्रत्ययस्य रूपं विष्णुरिति।

यस्माद्विष्टमिदं सर्वं तस्य शक्त्या महात्मनः।
तस्माद्विष्णुरिति ख्यातो विशेर्धातोः प्रवेशनात्॥

इति विष्णुपुराणे।

व्याप्ते मे रोदसी पार्थ क्रान्तिश्चाभ्यधिका स्थिता।
क्रमणाच्चाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः॥

इति महाभारते।

यदुद्देशेनाध्वरे वषट्क्रियते सः **वषट्कारः**। यस्मिन

यज्ञे वा वषट्क्रिया, 'यज्ञो वै विष्णुः' इति श्रुतेः । येन वषट्कारादिमन्त्रात्मना वा देवान् प्रीणयति स वषट्कारः । देवता वा, 'प्रजापतिश्च वषट्कारश्च' इति श्रुतेः । 'चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च । हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु' इत्यादिस्मृतेश्च । **भूतभव्यभवत्प्रभुः** भूतं भव्यं भवच्चेति भूतभव्यभवन्ति तेषां प्रभुः । कालभेदमनादृत्य सन्मात्रप्रतियोगिकमैश्वर्यं तस्येति प्रभुत्वम् । रजोगुणं समाश्रित्य विरिञ्चिरूपेण भूतानि करोतीति **भूतकृत्** ; तमोगुणमास्थाय स रुद्रात्मना भूतानि कृन्तति कृणोति हिनस्तीति **भूतकृत्** । सत्त्वगुणमधिष्ठाय भूतानि बिभर्ति पालयति धारयति पोषयतीति वा **भूतभृत्** । प्रपञ्चरूपेण भवतीति, केवलं भवतीत्येव वा **भावः** । भवनं भावः सत्तात्मको वा । **भूतात्मा** भूतानामात्मा अन्तर्यामी, 'एष त आत्मा अन्तर्याम्यमृतः' इति श्रुतेः । भूतानि भावयति जनयति वर्धयतीति वा **भूतभावनः** ॥

भूतकृदित्यादिभिः गुणतन्त्रत्वं प्राप्तं प्रतिषिध्यते—

पूतात्मा परमात्मा च
मुक्तानां परमा गतिः ।

अव्ययः पुरुषः साक्षी
क्षेत्रज्ञोऽक्षर एव च ॥ १५ ॥

पूत आत्मा यस्य सः **पूतात्मा**, 'केवलो निर्गुणश्च' इति श्रुतेः। गुणोपरागः स्वेच्छातः पुरुषस्येति कल्प्यते। परमश्चासावात्मा चेति **परमात्मा** कार्यकारणविलक्षणो नित्यशुद्धबुद्धमुक्तस्वभावः। मुक्तानां परमा प्रकृष्टा गतिर्गन्तव्या देवता पुनरावृत्त्यसंभवात्तद्गतस्येति **मुक्तानां परमा गतिः**; 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इति भगवद्वचनम्। नास्य व्ययो विनाशो विकारो वा विद्यत इति **अव्ययः**, 'अजरोऽमरोऽव्ययः' इति श्रुतेः। पुरं शरीरं तस्मिन् शेते इति **पुरुषः**। 'नवद्वारं पुरं पुण्यमेतैर्भावैः समन्वितम्। व्याप्य शेते महात्मा यस्तस्मात्पुरुष उच्यते' इति महाभारते। यद्वा, अस्तेर्व्यत्यस्ताक्षरयोगात् आसीत्पुरा पूर्वमेवेति विग्रहं कृत्वा व्युत्पादितः **पुरुषः**, 'पूर्वमेवाहमिहासमिति, तत्पुरुषस्य पुरुषत्वम्' इति श्रुतेः। अथवा पुरुषु उत्कर्षशालिषु सीदतीति, पुरूणि फलानि सनोति ददातीति वा, पूरूणि भुवनानि संहारसमये स्यति अन्तं करोतीति वा पूरणात्सदनाद्वा **पुरुषः**। 'पूरणात्सदनाच्चैव ततोऽसौ पुरुषोत्तमः' इति पञ्चमवेदे। साक्षादव्यवधानेन

स्वरूपबोधेन ईक्षते पश्यति सर्वमिति **साक्षी** । 'साक्षाद्द्रष्टरि संज्ञायाम्' इति पाणिनिवचनादिनिप्रत्ययः । क्षेत्रं शरीरं जानातीति **क्षेत्रज्ञः**; 'आतोऽनुपसर्गे कः' इति कप्रत्ययः । 'क्षेत्रज्ञं चापि मां विद्धि' इति भगवद्वचनात् । 'क्षेत्राख्यानि शरीराणि तेषां चैव यथासुखम् । तानि वेत्ति स योगात्मा ततः क्षेत्रज्ञ उच्यते' इति ब्रह्मपुराणे । स एव न क्षरतीति **अक्षरः** परमात्मा । अश्नोतेर्वा सरप्रत्ययान्तस्य रूपमक्षर इति । एवकारात् क्षेत्रज्ञाक्षरयोरभेदः परमार्थतः, 'तत्त्वमसि' इति श्रुतेः । चकाराद्व्यावहारिको भेदश्च, प्रसिद्धेरप्रमाणत्वात् ॥

योगो योगविदां नेता
प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमा-
न्केशवः पुरुषोत्तमः ॥ १६ ॥

'ज्ञानेन्द्रियाणि सर्वाणि निगृह्य मनसा सह । एकत्वभावना योगः क्षेत्रज्ञपरमात्मनोः' तदवाप्यतया **योगः** इति योगविदो विदुः । योगं विदन्ति विचारयन्ति, जानन्ति, लभन्त इति वा योगविदः । तेषां नेता ज्ञानिनां योगक्षेमवहनादि-

नेति **योगविदां नेता**, 'तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्' इति भगवद्वचनात्। प्रधानं प्रकृतिर्माया ; पुरुषो जीवः; तयोरीश्वरः **प्रधानपुरुषेश्वरः** । नरस्य सिंहस्य चावयवा यस्मिन् लक्ष्यन्ते तद्वपुर्यस्य सः **नारसिंहवपुः**। यस्य वक्षसि नित्य वसति श्रीः सः **श्रीमान्** । अभिरूपाः केशाः यस्य सः **केशवः**। 'केशाद्वोऽन्यतरस्याम्' इति वप्रत्ययः प्रशंसायाम्। यद्वा, कश्च अश्च ईशश्च त्रिमूर्तयः केशाः ते यद्वशे वर्तन्ते सः **केशवः** । केशिवधाद्वा **केशवः** । 'यस्मात्त्वयैष दुष्टात्मा हत. केशी जनार्दन । तस्मात्केशवनाम्ना त्वं लोके ख्यातिं गमिष्यसि' इति विष्णुपुराणे श्रीकृष्णं प्रति नारदवचनम् । पृषोदरादित्वाच्छब्दसाधुत्वकल्पना । पुरुषाणामुत्तमः **पुरुषोत्तमः** । अत्र 'न निर्धारणे' इति षष्ठीसमासप्रतिषेधो न भवति, जात्याद्यनपेक्षया समर्थत्वात् । यत्र पुनः जातिगुणक्रियापेक्षया पृथक्क्रिया तत्रासमर्थत्वान्निषेधः प्रवर्तते ; यथा—मनुष्याणां क्षत्रियः शूरतमः, गवां कृष्णा संपन्नक्षीरतमा, अध्वगानां धावन् शीघ्रतम इति । अथवा पञ्चमीसमासः । तथा च भगवद्वचनम्— 'यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः । अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः' इति ॥

सर्वः शर्वः शिवः स्थाणु-
भूतादिर्निधिरव्ययः ।
संभवो भावनो भर्ता
प्रभवः प्रभुरीश्वरः ॥ १७ ॥

'असतश्च सतश्चैव सर्वस्य प्रभवाप्ययात् । सर्वस्य सर्वदा ज्ञानात् सर्वमेनं प्रचक्षते' इति भगवद्व्यासवचनात् **सर्वः**। शृणाति संहारसमये संहरति संहारयति सकलाः प्रजाः इति **शर्वः** । निस्त्रैगुण्यतया शुद्धत्वात् **शिवः** । 'स ब्रह्मा स शिवः' इत्यभेदोपदेशात् शिवादिनामभिः हरिरेव स्तूयते । स्थिरत्वात् **स्थाणुः** । भूतानामादिकारणत्वात् **भूतादिः** । प्रलयकाले अस्मिन् सर्वं निधीयते इति **निधिः** । 'कर्मण्यधिकरणे च' इति किप्रत्ययः । स एव निधिर्विशेष्यते— **अव्ययः** अनश्वरो निधिरित्यर्थः । स्वेच्छया समीचीनं भवनमस्येति **संभवः**, 'धर्मसंस्थापनार्थाय संभवामि युगे युगे' इति भगवद्वचनात् । 'अथ दुष्टविनाशाय साधूनां रक्षणाय च । स्वेच्छया संभवाम्येवं गर्भदुःखविवर्जितः' इति च । सर्वेषां भोक्तृणां फलानि भावयतीति **भावनः** । सर्वफलदातृत्वम् 'फलमत उपपत्तेः' इत्यत्र उपपादितम् । प्रपञ्चस्याधि-

ष्ठानत्वेन भरणात् **भर्ता** । प्रकर्षेण महाभूतानि अस्माज्जायन्त इति **प्रभवः**; प्रकृष्टो भवो जन्मास्येति वा । सर्वासु क्रियासु सामर्थ्यातिशयात् **प्रभुः** । निरुपाधिकमैश्वर्यमस्येति **ईश्वरः**, 'एष सर्वेश्वरः' इति श्रुतेः ॥

स्वयंभूः शंभुरादित्यः
पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता
विधाता धातुरुत्तमः ॥ १८ ॥

स्वयमेव भवतीति **स्वयंभूः** । 'स एव स्वयमुद्भौ' इति मानवं वचनम् । सर्वेषामुपरि भवति, स्वयं भवतीति वा स्वयंभूः । येषामुपरि भवति यश्चोपरि भवति तदुभयात्मना स्वयमेव भवतीति वा, 'परिभूः स्वयंभूः' इति मन्त्रवर्णात् । अथवा, **स्वयंभूः** परमेश्वरः स्वयमेव स्वतन्त्रो भवति न परतन्त्रः, 'पराञ्चि खानि व्यतृणत्स्वयंभूः' इति मन्त्रवर्णात् । शं सुखं भक्तानां भावयतीति शंभुः । आदित्यमण्डलान्तःस्थो हिरण्मयः पुरुषः **आदित्यः** । द्वादशादित्येषु विष्णुर्वा, 'आदित्यानामहं विष्णुः' इत्युक्तः । अदितेरखण्डिताया मह्या अयं पतिरिति वा, 'इयं वा अदितिः'

'महीं देवीं विष्णुपत्नीम्' इति श्रुतेः। यथा आदित्य एक एवानेकेषु जलभाजनेषु अनेकवत्प्रतिभासते, एवमनेकेषु शरीरेषु एक एव आत्मा अनेकवत्प्रतिभासत इति आदित्यसाधर्म्याद्वा **आदित्यः**। पुष्करेणोपमिते अक्षिणी यस्येति **पुष्कराक्षः**। महान्पूजितः स्वनो नादो वा श्रुतिलक्षणो यस्य सः **महास्वनः**। 'सन्महत्' इत्यादिना समासे कृते 'आन्महतः समानाधिकरणजातीययोः' इत्यादिना आत्त्वम्। 'अस्य महतो भूतस्य नि.श्वसितमेतदृग्वेदो यजुर्वेदः' इति श्रुतेः। आदिर्जन्म; निधनं विनाशः; तद्वयं यस्य न विद्यते सः **अनादिनिधनः**। अनन्तादिरूपेण विश्वं बिभर्तीति **धाता**। कर्मणां तत्फलानां च कर्ता **विधाता**; अनन्तादीनामपि धारकत्वाद्विशेषेण दधातीति वा। **धातुरुत्तमः** इति नामैकं सविशेषणं सामानाधिकरण्येन; धातुर्विरिञ्चादुत्कृष्ट इति वा वैयधिकरण्येन; नामद्वयं वा; सर्वधातुभ्यः पृथिव्यादिभ्यः उत्कृष्टश्चिद्धातुरित्यर्थः। कार्यकारणप्रपञ्चधारणाच्चिदेव **धातुः**। **उत्तमः** सर्वेषामुद्गतानाम् अतिशयेनोद्गतत्वादुत्तमः॥

अप्रमेयो हृषीकेशः
पद्मनाभोऽमरप्रभुः।

विश्वकर्मा मनुस्त्वष्टा
स्थविष्ठः स्थविरो ध्रुवः ॥ १९ ॥

शब्दादिरहितत्वान्न प्रत्यक्षगम्यः । नाप्यनुमानगम्यः, तद्व्याप्तलिङ्गाभावात् । नाप्युपमानसिद्धः, निर्भागत्वेन सादृश्याभावात् । नाप्यर्थापत्तिग्राह्यः, तद्विनानुपपद्यमानस्यासंभवात । नाप्यभावगोचरः, भावरूपत्वात्, अभावसाक्षित्वाच्च । नापि शास्त्रप्रमाणवेद्यः, प्रमाणजन्यातिशयाभावात् । यद्येवम, शास्त्रयोनित्वं कथम ? उच्यते— प्रमाणादिसाक्षित्वेन प्रकाशस्वरूपस्य प्रमाणाविषयत्वेऽपि अध्यस्तातद्रूपनिवर्तकत्वेन शास्त्रप्रमाणकत्वमिति **अप्रमेयः**, साक्षिरूपत्वात् । हृषीकाणि इन्द्रियाणि; तेषामीशः क्षेत्रज्ञरूपभाक् । यद्वा, इन्द्रियाणि यस्य वशे वर्तन्ते स परमात्मा **हृषीकेशः** । यस्य वा सूर्यरूपस्य चन्द्ररूपस्य च जगत्प्रीतिकरा हृष्टाः केशा रश्मयः सः **हृषीकेशः**, 'सूर्यरश्मिर्हरिकेशः पुरस्तात्' इति श्रुते. । पृषोदरादित्वात्साधुत्वम् । यथोक्तं मोक्षधर्मे—

सूर्याचन्द्रमसौ शश्वदंशुभिः केशसंज्ञितैः ।
बोधयन्स्वापयंश्चैव जगदुत्तिष्ठते पृथक् ॥
बोधनात्स्वापनाच्चैव जगतो हर्षणं भवेत् ।
अग्नीषोमकृतैरेवं कर्मभिः पाण्डुनन्दन ॥

हृषीकेशोऽहमीशानो वरदो लोकभावनः । इति ।

सर्वजगत्कारणं पद्मं नाभौ यस्य सः **पद्मनाभः**, 'अजस्य नाभावध्येकमर्पितम्' इति श्रुतेः । अमराणां प्रभुः **अमरप्रभुः** । विश्वं कर्म क्रिया यस्य सः **विश्वकर्मा** । क्रियते इति जगत् कर्म विश्वं कर्म यस्येति वा विचित्रनिर्माणशक्तिमत्त्वाद्वा **विश्वकर्मा**; त्वष्ट्रा सादृश्याद्वा । मननात **मनुः** । 'नान्योऽतोऽस्ति मन्ता' इति श्रुतेः । मन्त्रो वा, प्रजापतिर्वा **मनुः** । संहारसमये सर्वभूततनूकरणत्वात् **त्वष्टा** । त्वक्षतेस्तनूकरणार्थात् तृच्प्रत्ययः । अतिशयेन स्थूलः **स्थविष्ठः** । पुराणः स्थविरः 'त्वेषं ह्यस्य स्थविरस्य नाम' इति बह्वृचाः; वयोवचनो वा । स्थिरत्वात् ध्रुवः । **स्थविरो ध्रुव** इत्येकं नाम सविशेषणम् ॥

अग्राह्यः शाश्वतः कृष्णो
लोहिताक्षः प्रतर्दनः ।
प्रभूतस्त्रिककुब्धाम
पवित्रं मङ्गलं परम् ॥ २० ॥

कर्मेन्द्रियैः न गृह्यत इति **अग्राह्यः**, 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह' इति श्रुतेः । शश्वत् सर्वेषु

कालेषु भवतीति **शाश्वतः**, 'शाश्वतं शिवमच्युतम्' इति श्रुतेः । सच्चिदानन्दात्मकः **कृष्णः**, 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः । विष्णुस्तद्भावयोगाच्च कृष्णो भवति शाश्वतः' इति व्यासवचनात्; कृष्णवर्णात्मकत्वाद्वा, 'कृष्णो वर्णश्च मे यस्मात्तस्मात्कृष्णोऽहमर्जुन' इति महाभारते । लोहिते अक्षिणी यस्येति **लोहिताक्षः**, 'स मा वृषभो लोहिताक्षः' इति श्रुतेः । प्रलये भूतानि प्रतर्दयति हिनस्तीति **प्रतर्दनः** । ज्ञानैश्वर्यादिगुणैः संपन्नः **प्रभूतः** । ऊर्ध्वाधोमध्यभेदेन तिसृणां ककुभामपि धामेति **त्रिककुब्धाम** इत्येकं नाम । येन पुनाति यो वा पुनाति ऋषिर्देवता वा तत् **पवित्रम्** । 'पुवः संज्ञायाम्' 'कर्तरि चर्षिदेवतयोः' इति पाणिनिस्मरणात् इत्रप्रत्ययः । 'अशुभानि निराचष्टे तनोति शुभसंततिम् । स्मृतिमात्रेण यत्पुंसां ब्रह्म तन्मङ्गलं विदुः' इति विष्णुपुराणवचनात्, कल्याणरूपत्वाद्वा मङ्गलम् । परं सर्वभूतेभ्यः उत्कृष्टं ब्रह्म । **मङ्गलं परम्** इत्येकमिदं नाम सविशेषणम ॥

ईशानः प्राणदः प्राणो
ज्येष्ठः श्रेष्ठः प्रजापतिः ।

हिरण्यगर्भो भूगर्भो
माधवो मधुसूदनः ॥ २१ ॥

सर्वभूतनियन्तृत्वात् **ईशानः** । प्राणान् ददाति चेष्टयतीति **प्राणदः**, 'को ह्येवान्यात्कः प्राण्यात्' इति श्रुतेः । यद्वा, प्राणान् कालात्मना द्यति खण्डयतीति, प्राणान् दापयति शोधयतीति वा, प्राणान् दाति लुनातीति वा, **प्राणदः** । प्राणितीति **प्राणः** क्षेत्रज्ञः परमात्मा वा, 'प्राणस्य प्राणम्' इति श्रुतेः मुख्यप्राणो वा । वृद्धतमो **ज्येष्ठः** 'ज्य च' इत्यधिकारे 'वृद्धस्य च' इति वृद्धशब्दस्य ज्यादेशविधानात् । प्रशस्यतमः **श्रेष्ठः**, 'प्रशस्यस्य श्रः' इति श्रादेशविधानात् । 'प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च' इति श्रुतेः मुख्यप्राणो वा, 'श्रेष्ठश्च' इत्यधिकरणसिद्धत्वात् । सर्वकारणत्वाद्वा **ज्येष्ठः** । सर्वातिशयत्वाद्वा **श्रेष्ठः** । ईश्वरत्वेन सर्वासां प्रजानां पतिः **प्रजापतिः** । हिरण्मयाण्डान्तर्वर्तित्वात् **हिरण्यगर्भो** ब्रह्मा विरिञ्चिः तदात्मा, 'हिरण्यगर्भः समवर्तताग्रे' इति श्रुतेः । भूः गर्भे यस्य सः **भूगर्भः** । मायाः श्रियाः धवः पतिः **माधवः** ; मधुविद्याववोध्यत्वाद्वा । 'मौनाद्ध्यानाच्च योगाच्च विद्धि भारत माधवम्' इति व्यास-

वचनाद्वा माधवः । मधुनामानमसुरं सूदितवानिति **मधुसूदनः** ।

कर्णमिश्रोद्भवं चापि मधुनाममहासुरम् ।
ब्रह्मणोपचितिं कुर्वञ्जघान पुरुषोत्तमः ॥
तस्य तात वधादेव देवदानवमानवाः ।
मधुसूदन इत्याहुर्ऋषयश्च जनार्दनम् ॥

इति महाभारते ॥

ईश्वरो विक्रमी धन्वी
मेधावी विक्रमः क्रमः ।
अनुत्तमो दुराधर्षः
कृतज्ञः कृतिरात्मवान् ॥ २२ ॥

सर्वशक्तिमत्तया **ईश्वरः** । विक्रमः शौर्यम्, तद्योगात् **विक्रमी** । धनुरस्यास्तीति **धन्वी** । व्रीह्यादित्वात् इनिः । 'रामः शस्त्रभृतामहम्' इति भगवद्वचनम् । मेधा बहुग्रन्थधारणसामर्थ्यम्, सा यस्यास्ति सः **मेधावी** । 'अस्मायामेधास्रजो विनिः' इति विनिप्रत्ययः । विचक्रमे जगद्विश्वं तेन **विक्रमः**; विना गरुडेन पक्षिणा क्रमाद्वा । क्रमणात्, क्रमहेतुत्वाद्वा **क्रमः**, 'क्रान्ते विष्णुम्' इति मनुवचनात् । अवि-

द्यमानः उत्तमो यस्मात् सः **अनुत्तमः** । 'यस्मात्परं नापरमस्ति किंचित्' इति श्रुतेः, 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति स्मृतेश्च । दैत्यादिभिः धर्षयितुं न शक्यत इति **दुराधर्षः** । प्राणिनां पुण्यापुण्यात्मकं कर्म कृतं जानातीति **कृतज्ञः** । पत्रपुष्पाद्यल्पमपि प्रयच्छतां मोक्षं ददातीति वा । पुरुषप्रयत्नः **कृतिः**, क्रिया वा; सर्वात्मत्वात्तदाधारतया वा लक्ष्यते कृत्येति वा **कृतिः** । स्वमहिमप्रतिष्ठितत्वात् **आत्मवान्** । 'स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि' इति श्रुतेः ॥

सुरेशः शरणं शर्म
विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः
प्रत्ययः सर्वदर्शनः ॥ २३ ॥

सुराणां देवानामीशः **सुरेशः** । सूपपदो वा राधातुः शोभनदातृणाम् ईशः **सुरेशः** । आर्तानामार्तिहरणत्वात् **शरणम्** । परमानन्दरूपत्वात् **शर्म** । विश्वस्य कारणत्वात् **विश्वरेताः** । सर्वाः प्रजा यत्सकाशादुद्भवन्ति स **प्रजाभवः** । प्रकाशरूपत्वात् **अहः** । कालात्मना स्थितो विष्णुः **संवत्स-**

रः इत्युक्त. । व्यालवद्ग्रहीतुमशक्यत्वात् **व्यालः** । प्रतीतिः प्रज्ञा **प्रत्ययः**, 'प्रज्ञानं ब्रह्म' इति श्रुतेः । सर्वाणि दर्शनात्मकानि अक्षीणि यस्य सः **सर्वदर्शनः** । सर्वात्मकत्वात् 'विश्वतश्चक्षुः' 'विश्वाक्षम्' इति श्रुतेः ॥

अजः सर्वेश्वरः सिद्धः
सिद्धिः सर्वादिरच्युतः ।
वृषाकपिरमेयात्मा
सर्वयोगविनिःसृतः ॥ २४ ॥

न जायत इति **अजः**, 'न जातो न जनिष्यते' इति श्रुतेः । 'न हि जातो न जायेय न जनिष्ये कदाचन । क्षेत्रज्ञः सर्वभूतानां तस्मादहमजः स्मृतः' इति महाभारते । सर्वेषामीश्वराणामीश्वरः **सर्वेश्वरः**, 'एष सर्वेश्वरः' इति श्रुतेः । नित्यनिष्पन्नरूपत्वात् **सिद्धः** । सर्ववस्तुषु संविद्रूपत्वात्, निरतिशयरूपत्वाद्वा **सिद्धिः** । स्वर्गादीनां विनाशित्वादफलत्वम् । सर्वभूतानामादिकारणत्वात् **सर्वादिः** । स्वरूपसामर्थ्यात् न च्युतो न च्यवते न च्यविष्यते इति **अच्युतः**, 'शाश्वतꣳ शिवमच्युतम्' इति श्रुतेः । तथा

च भगवद्वचनम्— 'यस्मान्न च्युतपूर्वोऽहमच्युतस्तेन कर्मणा' इति ॥

इति नाम्नां प्रथमं शतं विवृतम् ॥

वर्षणात् सर्वकामाणां धर्मो वृषः; कात् तोयात् भूमिमपादिति कपिर्वराहः; वृषरूपत्वात्कपिरूपत्वाच्च **वृषाकपिः** । 'कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते । तस्माद्वृषाकपिं प्राह काश्यपो मां प्रजापतिः' इति महाभारते । इयानिति मातुं परिच्छेत्तुं न शक्यते आत्मा अस्येति **अमेयात्मा** । सर्वसंबन्धविनिर्गतः **सर्वयोगविनिःसृतः**, 'असङ्गो ह्ययं पुरुष.' इति श्रुतेः । नानाशास्त्रोक्ताद्योगादपगतत्वाद्वा ॥

वसुर्वसुमनाः सत्यः
समात्मासंमितः समः ।
अमोघः पुण्डरीकाक्षो
वृषकर्मा वृषाकृतिः ॥ २५ ॥

वसन्ति सर्वभूतानि अत्र, तेषु अयमपि वसतीति वा **वसुः**; 'वसूनां पावकश्चास्मि' इत्युक्तो वा **वसुः** । वसुशब्देन धनवाचिना प्राशस्त्यं लक्ष्यते । प्रशस्तं मनो

यस्य सः **वसुमनाः**। रागद्वेषादिभिः क्लेशैर्मदादिभिरुपक्लेशैश्च यतो न कलुषितं चित्तं ततस्तन्मनः प्रशस्तम्। अवितथरूपत्वात्परमात्मा **सत्यः**, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः। मूर्तामूर्तात्मकत्वाद्वा, 'सच्च त्यच्चाभवत्' इति श्रुतेः। सदिति प्राणः, तीत्यन्नम्, यमिति दिवाकरः, तेन प्राणान्नादित्यरूपाद्वा **सत्यः**, 'सदिति प्राणास्तीत्यन्नं यमित्यसावादित्यः' इति श्रुतेः। सत्सु साधुत्वाद्वा **सत्यः**। सम आत्मा मनो यस्य रागद्वेषादिभिरदूषितः सः **समात्मा**। सर्वभूतेषु सम एक आत्मा वा, 'सम आत्मेति विद्यात्' इति श्रुतेः। **सर्वैरप्यर्थजातैः** परिच्छिन्नो मितः; सर्वैरपरिच्छिन्नोऽमित इति **असंमितः**; सर्वकालेषु सर्वविकाररहितत्वात् **समः**; मया लक्ष्म्या सह वर्तत इति वा **समः**। पूजितः स्तुतः संस्मृतो वा सर्वफलं ददाति न वृथा करोतीति **अमोघः**। अवितथसंकल्पाद्वा, 'सत्यकाम. सत्यसंकल्पः' इति श्रुतेः। हृदयस्थं पुण्डरीकमश्नुते व्याप्नोति तत्रोपलक्षित इति **पुण्डरीकाक्षः**, 'यत्पुण्डरीकं पुरमध्यसंस्थम्' इति श्रुतेः; पुण्डरीकाकारे उभे अक्षिणी अस्येति वा। धर्मलक्षणं कर्मास्येति **वृषकर्मा**। धर्मार्थमाकृतिः शरीरं यस्य सः **वृषाकृतिः**। 'धर्मसंस्थापनार्थाय संभवामि युगे युगे' इति भगवद्वचनात्॥

रुद्रो बहुशिरा बभ्रु-
र्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वतस्थाणु-
र्वरारोहो महातपाः ॥ २६ ॥

संहारकाले प्रजाः संहरन् रोदयतीति **रुद्रः** । रुदं राति ददातीति वा, रुर्दुःखं दुःखकारणं वा, द्रावयतीति वा **रुद्रः** । रोदनाद्रावणाद्वापि रुद्र इत्युच्यते, 'रुर्दुःखं दुःखहेतुं वा विद्रावयति स प्रभुः । रुद्र इत्युच्यते तस्माच्छिवः परमकारणम्' इति लिङ्गपुराणवचनात् । बहूनि शिरांसि यस्येति **बहुशिराः**, 'सहस्रशीर्षा पुरुषः' इति मन्त्रवर्णात् । बिभर्ति लोकानिति **बभ्रुः** । विश्वस्य कारणत्वात् **विश्वयोनिः** । शुचीनि श्रवांसि नामानि श्रवणीयान्यस्येति **शुचिश्रवाः** । न विद्यते मृतं मरणमस्येति **अमृतः**, 'अजरोऽमरः' इति श्रुतेः । शाश्वतश्चासौ स्थाणुश्चेति **शाश्वतस्थाणुः** । वर आरोहोऽङ्कोऽस्येति **वरारोहः** । वरमारोहणं यस्मिन्निति वा, आरूढानां पुनरावृत्त्यसंभवात्, 'न च पुनरावर्तते' इति श्रुतेः, 'यं प्राप्य न निवर्तन्ते' इति स्मृतेश्च । महत्सृज्यविषयं तपो ज्ञानमस्येति **महातपाः**, 'यस्य ज्ञानमयं तपः

इति श्रुतेः । ऐश्वर्यं प्रतापो वा तपो महदस्येति वा **महा-तपाः** ॥

सर्वगः सर्वविद्भानु-
र्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो
वेदाङ्गो वेदवित्कविः ॥ २७ ॥

सर्वत्र गच्छतीति **सर्वगः**, कारणत्वेन व्याप्तत्वात् सर्वत्र । सर्वं वेत्ति विन्दतीति वा सर्ववित्; भातीति भानुः, 'तमेव भान्तमनु भाति सर्वम्' इति श्रुतेः । 'यदादित्यगतं तेजः' इत्यादिस्मृतेश्च; सर्ववित्चासौ भानुश्चेति **सर्वविद्भानुः** । विष्वगञ्चति पलायते दैत्यसेना यस्य रणोद्योगमात्रेणेति **विष्वक्सेनः** । जनान् दुर्जनानर्दयति हिनस्ति, नरकादीन्गमयतीति वा **जनार्दनः**; जनैः पुरुषार्थमभ्युदयनिःश्रेयसलक्षणं याच्यते इति **जनार्दनः** । वेदयतीति **वेदः**, 'तेषामेवानुकम्पार्थमहमज्ञानजं तमः । नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता' इति भगवद्वचनात् । यथावत् वेदार्थं वेत्तीति वेदवित्, 'वेदान्तकृद्वेदविदेव चाहम्' इति भगवद्वचनात् ।

सर्वे वेदाः सर्वविद्याः सशास्त्राः
सर्वे यज्ञाः सर्व इज्याश्च कृष्णः ।
विदुः कृष्णं ब्राह्मणास्तत्त्वतो ये
तेषां राजन्सर्वयज्ञाः समाप्ताः ॥

इति महाभारते ।

अव्यङ्गः ज्ञानादिभिः परिपूर्णोऽविकल उच्यते; व्यङ्गो व्यक्तिर्न विद्यत इति वा **अव्यङ्गः**, 'अव्यक्तोऽयम्' इति भगवद्वचनात् । वेदा अङ्गभूता यस्य सः **वेदाङ्गः** । वेदान्विन्ते विचारयतीति **वेदवित्** । क्रान्तदर्शी **कविः** सर्वदृक्, 'नान्योऽतोऽस्ति द्रष्टा' इत्यादिश्रुतेः, 'कविर्मनीषी' इत्यादिमन्त्रवर्णात् ॥

लोकाध्यक्षः सुराध्यक्षो
धर्माध्यक्षः कृताकृतः ।
चतुरात्मा चतुर्व्यूह-
श्चतुर्दंष्ट्रश्चतुर्भुजः ॥ २८ ॥

लोकानध्यक्षयतीति **लोकाध्यक्षः** सर्वेषां लोकानां प्राधान्येनोपद्रष्टा । लोकपालादिसुराणामध्यक्षः **सुराध्यक्षः** । धर्माधर्मौ साक्षादीक्षतेऽनुरूपं फलं दातुं तस्मात् **धर्माध्यक्षः** । कृतश्च कार्यरूपेण अकृतश्च कारणरूपेणेति **कृताकृतः** ।

सर्गादिषु पृथग्विभूतयश्चतस्रः आत्मनः यस्य सः **चतुरात्मा** ।

ब्रह्मा दक्षादयः कालस्तथैवाखिलजन्तवः ।
विभूतयो हरेरेता जगतः सृष्टिहेतवः ॥
विष्णुर्मन्वादयः कालः सर्वभूतानि च द्विज ।
स्थितेर्निमित्तभूतस्य विष्णोरेता विभूतयः ॥
रुद्रः कालोऽन्तकाद्याश्च समस्ताश्चैव जन्तवः ।
चतुर्धा प्रलयायैता जनार्दनविभूतयः ॥

इति वैष्णवपुराणे ।

'व्यूह्यात्मानं चतुर्धा वै वासुदेवादिमूर्तिभिः । सृष्ट्यादीन्प्रकरोत्येष विश्रुतात्मा जनार्दनः' इति व्यासवचनात् **चतुर्व्यूहः** । दंष्ट्राश्चतस्रो यस्येति **चतुर्दंष्ट्रः** नृसिंहविग्रहः । सादृश्याद्वा शृङ्गं दंष्ट्रेत्युच्यते, 'चत्वारि शृङ्गा' इति श्रुतेः । चत्वारो भुजा अस्येति **चतुर्भुजः** ॥

भ्राजिष्णुर्भोजनं भोक्ता
सहिष्णुर्जगदादिजः ।
अनघो विजयो जेता
विश्वयोनिः पुनर्वसुः ॥ २९ ॥

प्रकाशैकरसत्वात् **भ्राजिष्णुः** । भोज्यरूपतया प्रकृतिर्माया **भोजनम्** इत्युच्यते । पुरुषरूपेण तां **भुङ्क्ते** इति **भोक्ता** । हिरण्याक्षादीन् सहते अभिभवतीति **सहिष्णुः** । हिरण्यगर्भरूपेण जगदादावुत्पद्यते स्वयमिति **जगदादिजः** । अघं न विद्यतेऽस्येति **अनघः**, 'अपहतपाप्मा' इति श्रुतेः । विजयते ज्ञानवैराग्यैश्वर्यादिभिर्गुणैः विश्वमिति **विजयः** । यतोऽतिशेते सर्वभूतानि स्वभावतः अतः **जेता** । विश्वं योनिरस्येति, विश्वश्चासौ योनिश्चेति वा **विश्वयोनिः** । पुनः पुनः शरीरेषु वसति क्षेत्रज्ञरूपेणेति **पुनर्वसुः** ॥

उपेन्द्रो वामनः प्रांशु-
रमोघः शुचिरूर्जितः ।
अतीन्द्रः संग्रहः सर्गो
धृतात्मा नियमो यमः ॥ ३० ॥

इन्द्रमुपगतोऽनुजत्वेनेति **उपेन्द्रः**, यद्वा, उपरि इन्द्र. **उपेन्द्रः** । 'ममोपरि यथेन्द्रस्त्वं स्थापितो गोभिरीश्वरः । उपेन्द्र इति कृष्ण त्वां गास्यन्ति भुवि देवताः' इति हरिवंशे । बलिं वामनरूपेण याचितवानिति **वामनः** । संभजनीय इति वा, 'मध्ये वामनमासीनं विश्वे देवा उपासते' इति

मन्त्रवर्णात् । स एव जगत्त्रयं क्रममाणः प्रांशुरभूदिति **प्रांशुः** । 'तोये तु पतिते हस्ते वामनोऽभूदवामनः । सर्वदेवमयं रूपं दर्शयामास वै प्रभुः ॥ भूः पादौ द्यौः शिरश्चास्य चन्द्रादित्यौ च चक्षुषी' इत्यादि विश्वरूपं दर्शयित्वा 'तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे । नभः प्रक्रममाणस्य नाभ्यां तौ समवस्थितौ ॥ दिवमाक्रममाणस्य जानुमूले व्यवस्थितौ ।' इति प्रांशुत्वं दर्शितं हरिवंशे । न मोघं चेष्टितं यस्य सः **अमोघः** । स्मरतां स्तुवताम् अर्चयतां च पावनत्वात् **शुचिः** । 'अस्पर्शश्च महाञ्शुचिः' इति मन्त्रवर्णात् । बलप्रकर्षशालित्वात् **ऊर्जितः** । अतीत्येन्द्रं स्थितो ज्ञानैश्वर्यादिभिः स्वभावसिद्धैरिति **अतीन्द्रः** । सर्वेषां प्रतिसंहारात् **संग्रहः** । सृज्यरूपतया, सर्गहेतुत्वाद्वा **सर्गः** । एकरूपेण जन्मादिरहिततया धृत आत्मा येन सः **धृतात्मा** । स्वेषु स्वेष्वधिकारेषु प्रजा नियमयतीति **नियमः** । अन्तर्यच्छतीति **यमः** ॥

वेद्यो वैद्यः सदायोगी
वीरहा माधवो मधुः ।
अतीन्द्रियो महामायो
महोत्साहो महाबलः ॥ ३१ ॥

निःश्रेयसार्थिभिः वेदनार्हत्वात् **वेद्यः** । सर्वविद्यानां वेदितृत्वात् **वैद्यः** । सदा आविर्भूतस्वरूपत्वात् **सदायोगी** । धर्मत्राणाय वीरान् असुरान् हन्तीति **वीरहा** । मायाः विद्यायाः पतिः **माधवः** । 'मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान् । तस्मान्माधवनामासि धवः स्वामीति शब्दितः' इति हरिवंशे । यथा मधु परां प्रीतिमुत्पादयति अयमपि तथेति **मधुः** । 'अशब्दमस्पर्शम्' इति श्रुतेः शब्दादिरहितत्वात् इन्द्रियाणामविषय इति **अतीन्द्रियः** । मायाविनामपि मायाकारित्वान् **महामायः**, 'मम माया दुरत्यया' इति भगवद्वचनात् । जगदुत्पत्तिस्थितिलयार्थमुद्युक्तत्वात् **महोत्साहः** । बलिनामपि बलवत्त्वात् **महाबलः** ॥

महाबुद्धिर्महावीर्यो
महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमा-
नमेयात्मा महाद्रिधृक् ॥ ३२ ॥

बुद्धिमतामपि बुद्धिमत्त्वात् **महाबुद्धिः** । महदुत्पत्तिकारणमविद्यालक्षणं वीर्यमस्येति **महावीर्यः** । महती शक्तिः सामर्थ्यमस्येति **महाशक्तिः** । महती द्युतिर्बाह्याभ्यन्तरा चास्ये-

ति **महाद्युतिः**; 'स्वयं ज्योतिः' इति श्रुतेः, 'ज्योतिषां ज्योतिः' इत्यादेश्च । इदं तदिति निर्देष्टुं यन्न शक्यते परस्मै स्वसंवेद्यत्वात् तत् अनिर्देश्यं वपुरस्येति **अनिर्देश्यवपुः** । ऐश्वर्यलक्षणा समग्रा श्रीर्यस्य सः **श्रीमान्** । सर्वैः प्राणिभिरमेया बुद्धिरात्मा यस्य सः **अमेयात्मा** । महान्तमद्रिं मन्दरं गोवर्धनं च अमृतमथने गोरक्षणे च धृतवानिति **महाद्रिधृक्** ॥

महेष्वासो महीभर्ता
श्रीनिवासः सतां गतिः ।
अनिरुद्धः सुरानन्दो
गोविन्दो गोविदां पतिः ॥ ३३ ॥

महानिष्वास इषुक्षेपो यस्य सः **महेष्वासः** । एकार्णवाप्लुतां देवीं महीं बभारेति **महीभर्ता** । यस्य वक्षस्यनपायिनी श्रीर्वसति सः **श्रीनिवासः** । सतां वैदिकानां साधूनां पुरुषार्थसाधनहेतुः **सतां गतिः** । न केनापि प्रादुर्भावेषु निरुद्ध इति **अनिरुद्धः** । सुरानानन्दयतीति **सुरानन्दः** । 'नष्टां वै धरणीं पूर्वमविन्दं वै गुहागताम् । गोविन्द इति तेनाहं देवैर्वाग्भिरभिष्टुतः' इति मोक्षधर्मवचनात् **गो-**

विन्दः । 'अहं किलेन्द्रो देवानां त्वं गवामिन्द्रतां गतः । गोविन्द इति लोकास्त्वां स्तोष्यन्ति भुवि शाश्वतम्' इति । 'गौरेषा तु तथा वाणी तां च विन्दयते भवान । गोविन्दस्तु ततो देव मुनिभिः कथ्यते भवान्' इति च हरिवंशे । गौर्वाणी, तां विन्दतीति गोविदः, तेषां पतिर्विशेषेणेति **गोविदां पतिः** ॥

मरीचिर्दमनो हंसः
सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः
पद्मनाभः प्रजापतिः ॥ ३४ ॥

तेजस्विनामपि तेजस्त्वात् **मरीचिः**, 'तेजस्तेजस्विनामहम्' इति भगवद्वचनात् । स्वाधिकारात्प्रमाद्यतीः प्रजा दमयितुं शीलं यस्य वैवस्वतादिरूपेण इति **दमनः** । अहं स इति तादात्म्यभाविनः संसारभयं हन्तीति **हंसः** । पृषोदरादित्वाच्छब्दसाधुत्वम् । हन्ति गच्छति सर्वशरीरेष्विति वा, 'हꣳसः शुचिषत्' इति मन्त्रवर्णात् । शोभनपर्णत्वात् **सुपर्णः**, 'द्वा सुपर्णा' इति मन्त्रवर्णात् । भुजेन गच्छतामुत्तमो **भुजगोत्तमः** । हिरण्यमिव कल्याणी नाभिरस्येति

हिरण्यनाभः; हितरमणीयनाभित्वाद्वा । बदरिकाश्रमे नर-नारायणरूपेण शोभनं तपश्चरतीति **सुतपाः** । 'मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः' इति स्मृतेः पद्ममिव सुवर्तुला नाभिरस्येति, हृदयपद्मस्य नाभौ मध्ये प्रकाशनाद्वा **पद्मनाभः** । पृषोदरादित्वात्साधुत्वम् । प्रजानां पतिः पिता **प्रजापतिः** ॥

अमृत्युः सर्वदृक्सिंहः
संधाता संधिमान्स्थिरः ।
अजो दुर्मर्षणः शास्ता
विश्रुतात्मा सुरारिहा ॥ ३५ ॥

मृत्युर्विनाशस्तद्धेतुर्वा अस्य न विद्यते इति **अमृत्युः** प्राणिनां कृताकृतं सर्वं पश्यति स्वाभाविकेन बोधेन **सर्वदृक्** । हिनस्तीति **सिंहः** । पृषोदरादित्वात्साधुत्वम् ॥

इति नाम्नां द्वितीयं शतं विवृतम् ॥

कर्मफलैः पुरुषान संधत्त इति संधाता ।
च स एवेति **संधिमान्** । सदैकरूपत्वात् **स्थिरः** ।
गच्छति क्षिपति इति वा **अजः** ।

भिर्न शक्यते इति **दुर्मर्षणः** । श्रुतिस्मृत्यादिभिः सर्वेषाम-नुशिष्टिं करोतीति **शास्ता** । विशेषेण श्रुतः सत्यज्ञानादि-लक्षणः आत्मा अतो **विश्रुतात्मा** । सुरारीणां निहन्तृत्वात् **सुरारिहा** ॥

गुरुर्गुरुतमो धाम
सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी
वाचस्पतिरुदारधीः ॥ ३६ ॥

समस्तविद्यानामुपदेष्टृत्वात् , सर्वेषां जनकत्वाद्वा **गुरुः** । विरिञ्चयादीनामपि ब्रह्मविद्यासंप्रदायकत्वात् **गुरुतमः**, 'यो ब्रह्माणम्' इति मन्त्रवर्णात् । **धाम** ज्योतिः, 'नारयणपरो ज्योतिः' इति मन्त्रवर्णात् । सर्वकामाणामास्पदत्वाद्वा **धाम**, 'परमं ब्रह्म परं धाम' इति श्रुतेः । सत्यवचनधर्मरूपत्वात् **सत्यः**, 'तस्मात्सत्यं परमं वदन्ति' इति श्रुतेः ; सत्यस्य सत्यमिति वा, 'प्राणा वै सत्यं तेषामेव सत्यम्' इति श्रुतेः । सत्यः अवितथः पराक्रमो यस्य सः **सत्यपराक्रमः** । निमी-लिते यतो नेत्रे योगनिद्रारतस्य अतो **निमिषः** । नित्यप्रबु-द्धस्वरूपत्वात् **अनिमिषः** ; मत्स्यरूपतया वा आत्मरूपतया

वा **अनिमिषः** । भूततन्मात्ररूपां वैजयन्त्याख्यां स्रजं नित्यं बिभर्तीति **स्रग्वी** । वाचो विद्यायाः पतिः वाचस्पतिः ; सर्वार्थविषया धीर्बुद्धिरस्य इति उदारधीः ; **वाचस्पतिरुदारधीः** इत्येकं नाम ॥

अग्रणीर्ग्रामणीः श्रीमा-
न्न्यायो नेता समीरणः ।
सहस्रमूर्धा विश्वात्मा
सहस्राक्षः सहस्रपात् ॥ ३७ ॥

अग्रं प्रकृष्टं पदं नयति मुमुक्षून् इति **अग्रणीः** । भूतग्रामस्य नेतृत्वात् **ग्रामणीः** । श्रीः कान्तिः सर्वातिशयिता अस्येति **श्रीमान्** । प्रमाणानुग्राहकोऽभेदकारकस्तर्को **न्यायः** । जगद्यन्त्रनिर्वाहको **नेता** । श्वसनरूपेण भूतानि चेष्टयतीति **समीरणः** । सहस्राणि मूर्धानोऽस्येति **सहस्रमूर्धा** । विश्वस्यात्मा **विश्वात्मा** । सहस्राण्यक्षीणि यस्य सः **सहस्राक्षः** । सहस्राणि पादा अस्येति **सहस्रपात्** । 'सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात्' इति श्रुतेः ॥

आवर्तनो निवृत्तात्मा
संवृतः संप्रमर्दनः ।

अहःसंवर्तको वह्नि-
रनिलो धरणीधरः ॥ ३८ ॥

आवर्तयितुं संचारचक्रं शीलमस्येति **आवर्तनः** । संसारबन्धान्निवृत्त आत्मा स्वरूपमस्येति **निवृत्तात्मा** । आच्छादिकया अविद्यया संवृतत्वात् **संवृतः** । सम्यक् प्रमर्दयति रुद्रकालाद्याभिः विभूतिभिरिति **संप्रमर्दनः** । सम्यगह्नां प्रवर्तनात् सूर्यः **अहःसंवर्तकः** । वहनात् **वह्निः** । अनिलयः **अनिलः**, अनादित्वात् **अनिलः**, अनादानाद्वा, अननाद्वा **अनिलः** । शेषरूपेण वराहरूपेण च धरणीं धत्त इति **धरणीधरः** ॥

सुप्रसादः प्रसन्नात्मा
विश्वधृग्विश्वभुग्विभुः ।
सत्कर्ता सत्कृतः साधु-
र्जह्नुर्नारायणो नरः ॥ ३९ ॥

शोभनः प्रसादो यस्य अपकारवतामपि शिशुपालादीनां मोक्षप्रदातृत्वादिति **सुप्रसादः** । रजस्तमोभ्यामकलुषित आत्मा अन्तःकरणमस्येति **प्रसन्नात्मा** ; यद्वा, प्रसन्नस्वभावः

कारुणिक इत्यर्थः; अवाप्तसर्वकामत्वाद्वा। विश्वं धृष्णोतीति **विश्वधृक्**। ञि धृषा प्रागल्भ्ये। विश्वं भुङ्क्ते भुनक्ति पालयतीति वा **विश्वभुक्**। हिरण्यगर्भादिरूपेण विविधं भवतीति **विभुः**, 'नित्यं विभुम्' इति मन्त्रवर्णात्। सत्करोति पूजयतीति **सत्कर्ता**। पूजितैरपि पूजितः **सत्कृतः**। न्यायप्रवृत्ततया **साधुः**; साधयतीति वा; साध्यभेदानुपादानात् साध्यमात्रसाधको वा। जनान् संहारसमये अपहुते अपनयतीति **जह्नुः**; जहात्यविदुषोऽभक्तान् अपनयति परमिति वा। नर आत्मा, ततो जातान्याकाशादीनि नाराणि कार्याणि तानि कार्याणि अयं कारणात्मना व्याप्नोति; अतश्च तान्ययनमस्येति **नारायणः**, 'यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इति मन्त्रवर्णात्।

नराज्जातानि तत्त्वानि नाराणीति ततो विदुः।
तान्येव चायनं तस्य तेन नारायणः स्मृतः॥

इति महाभारते।

नाराणां जीवानामयनत्वात् प्रलये इति वा, 'यत्प्रयन्त्यभिसंविशन्ति' इति श्रुतेः। 'नाराणामयनं यस्मात्तस्मान्नारायणः स्मृतः' इति ब्रह्मवैवर्तात्, 'आपो नारा इति प्रोक्ता

आपो वै नरसूनवः । ता यदस्यायनं पूर्वं तस्मान्नारायणः स्मृतः' इति मनुवचनाद्वा **नारायणः** ।

नारायणाय नम इत्ययमेव सत्यः
संसारघोरविषसंहरणाय मन्त्रः ।
शृण्वन्तु भव्यमतयो यतयोऽस्तरागा
उच्चैस्तरामुपदिशाम्यहमूर्ध्ववाहुः ॥

इति श्रीनारसिंहपुराणे ।

नयतीति नरः प्रोक्तः परमात्मा सनातनः ।

इति व्यासवचनम् ॥

असंख्येयोऽप्रमेयात्मा
विशिष्टः शिष्टकृच्छुचिः ।
सिद्धार्थः सिद्धसंकल्पः
सिद्धिदः सिद्धिसाधनः ॥ ४० ॥

यस्मिन् संख्यानामरूपभेदादिः न विद्यत इति **असंख्येयः** । अप्रमेय आत्मा स्वरूपमस्येति **अप्रमेयात्मा** । अतिशेते सर्वम् अतो **विशिष्टः** । शिष्टं शासनं करोतीति **शिष्टकृत्** ; शिष्टान् करोति पालयतीति वा । सामान्यवचनो धातुर्विशेषवचनो दृष्टः कुरु काष्ठानीत्याहरणे यथा, तद्वदिति वा **शि-**

घृकृत्। निरञ्जनः **शुचिः**। सिद्धो निर्वृत्त अर्थ्यमानोऽर्थोऽस्येति **सिद्धार्थः**, 'सत्यकामः' इति श्रुतेः। सिद्धो निष्पन्नः संकल्पोऽस्येति **सिद्धसंकल्पः**, 'सत्यसंकल्पः' इति श्रुतेः। सिद्धिं फलं कर्तृभ्यः स्वाधिकारानुरूपतो ददातीति **सिद्धिदः**। सिद्धेः साधकत्वात् **सिद्धिसाधनः**॥

वृषाही वृषभो विष्णु-
र्वृषपर्वा वृषोदरः।
वर्धनो वर्धमानश्च
विविक्तः श्रुतिसागरः॥ ४१॥

वृषो धर्मः पुण्यम्, तदेव अहः द्वादशाहादिः क्रतुः वृषाहः; सोऽस्यास्तीति **वृषाही**। वृषाह इत्यत्र 'राजाहः-सखिभ्यष्टच्' इति टच्प्रत्ययः समासान्तः। वर्षत्येष भक्तेभ्यः कामानिति **वृषभः**। **विष्णुः** 'विष्णुर्विक्रमणात्' इति व्यासेनोक्तेः। वृषरूपाणि सोपानपर्वाणि आहुः परं धामारुरुक्षोः इत्यतो **वृषपर्वा**। प्रजाः वर्षतीव उदरमस्येति **वृषोदरः**। वर्धयतीति **वर्धनः**। प्रपञ्चरूपेण वर्धत इति **वर्धमानः**। इत्थं वर्धमानोऽपि पृथगेव तिष्ठतीति **विविक्तः**। श्रुतयः सागरे इव अत्र निधीयन्ते इति **श्रुतिसागरः**॥

सुभुजो दुर्धरो वाग्ग्मी
महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः
शिपिविष्टः प्रकाशनः ॥ ४२ ॥

शोभना भुजाः जगद्रक्षाकरा अस्येति **सुभुजः** । पृथिव्यादीन्यपि लोकधारकाण्यन्यैः धारयितुमशक्यानि धारयन न केनचिद्धारयितुं शक्यत इति **दुर्धरः** ; दुःखेन ध्यानसमये मुमुक्षुभिः हृदये धार्यत इति वा **दुर्धरः** । यतो निःसृता ब्रह्ममयी वाक् तस्मात् **वाग्ग्मी** । महांश्चासाविन्द्रश्चेति **महेन्द्रः**, ईश्वराणामपीश्वरः । वसु धनं ददातीति **वसुदः**, 'अन्नादो वसुदानः' इति श्रुतेः । दीयमानं तद्वस्वपि स एवेति **वसुः**, आच्छादयत्यात्मन. स्वरूपं माययेति वा **वसुः**; अन्तरिक्षे एव वसति नान्यत्रेति असाधारणेन वसनेन वायुर्वा **वसुः**, 'वसुरन्तरिक्षसत्' इति श्रुतेः । एकं रूपमस्य न विद्यत इति **नैकरूपः**, 'इन्द्रो मायाभिः पुरुरूप ईयते' इति श्रुतेः, 'ज्योतींषि विष्णुः' इत्यादिस्मृतेश्च । बृहत् महत् वराहादिरूपम् अस्येति **बृहद्रूपः** । शिपयः पशवः, तेषु विशति प्रतितिष्ठति

यज्ञरूपेणेति **शिपिविष्टः**. 'यज्ञो वै विष्णुः पशवः शिपिर्यज्ञ एव पशुषु प्रतितिष्ठति' इति श्रुतेः । शिपयो रश्मयः, तेषु निविष्ट इति वा ।

शैत्याच्छयनयोगाच्च शीति वारि प्रचक्षते ।
तत्पानाद्रक्षणाच्चैव शिपयो रश्मयो मताः ॥

तेषु प्रवेशाद्विश्वेशः शिपिविष्ट इहोच्यते ।

सर्वेषां प्रकाशनशीलत्वात् **प्रकाशनः** ॥

ओजस्तेजोद्युतिधरः
प्रकाशात्मा प्रतापनः ।
ऋद्धः स्पष्टाक्षरो मन्त्र-
श्चन्द्रांशुर्भास्करद्युतिः ॥ ४३ ॥

ओजः प्राणबलम्, तेजः शौर्यादयो गुणाः, द्युतिः दीप्तिः, ताः धारयतीति **ओजस्तेजोद्युतिधरः** । अथवा, **ओजः तेजः** इति नामद्वयम्, 'बलं बलवतां चाहं तेजस्तेजस्विनामहम्' इति भगवद्वचनात् । द्युतिं ज्ञानलक्षणां दीप्तिं धारयतीति **द्युतिधरः** । प्रकाशस्वरूपः आत्मा यस्य सः **प्रकाशात्मा** । सवितादिविभूतिभिः विश्वं प्रतापयतीति **प्रतापनः** ।

धर्मज्ञानवैराग्यादिभिः उपेतत्वात् **ऋद्धः** । स्पष्टम् उदात्तम् ओंकारलक्षणम् अक्षरम् अस्येति **स्पष्टाक्षरः** । ऋग्यजुःसामलक्षणो **मन्त्रः**; मन्त्रबोध्यत्वाद्वा **मन्त्रः** । संसारतापतिग्मांशुतापतापितचेतसां चन्द्रांशुरिवाह्लादकत्वात् **चन्द्रांशुः** । भास्करद्युतिसाधर्म्यात् **भास्करद्युतिः** ॥

अमृतांशूद्भवो भानुः
शशबिन्दुः सुरेश्वरः ।
औषधं जगतः सेतुः
सत्यधर्मपराक्रमः ॥ ४४ ॥

मथ्यमाने पयोनिधौ अमृतांशोश्चन्द्रस्य उद्भवो यस्मात् सः **अमृतांशूद्भवः** । भातीति **भानुः**, 'तमेव भान्तम्' इत्यादिश्रुतेः । शश इव विन्दुर्लाञ्छनमस्येति शशबिन्दु. चन्द्रः तद्वत्प्रजाः पुष्णातीति **शशबिन्दुः**, 'पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः' इति भगवद्वचनात् । सुराणां देवानां शोभनदातृणां च ईश्वरः **सुरेश्वरः** । संसाररोगभेषजत्वात् **औषधम्** । जगतां समुत्तारणहेतुत्वात् असभेदकारणत्वाद्वा सेतुवत् वर्णाश्रमादीनां जगतः सेतुः, 'एष सेतुर्विधरण एषां लोकानामसंभेदाय' इति श्रुतेः । सत्या अवि-

तथा धर्माः ज्ञानादयो गुणाः पराक्रमश्च यस्य सः **सत्यधर्मपराक्रमः** ॥

भूतभव्यभवन्नाथः
पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः
कामः कामप्रदः प्रभुः ॥ ४५ ॥

भूतभव्यभवतां भूतग्रामाणां नाथः, तैर्याच्यते तानुपतपति तेषामीष्टे शास्तीति वा **भूतभव्यभवन्नाथः** । पवत इति **पवनः**, 'पवनः पवतामस्मि' इति भगवद्वचनात् । पावयतीति **पावनः**, 'भीषास्मादातः पवते' इति श्रुतेः । अनान् प्राणान् आत्मत्वेन लातीति जीवः **अनलः** ; णलतेर्गन्धवाचिनो नञ्पूर्वाद्वा, 'अगन्धमरसम्' इति श्रुतेः ; न अलं पर्याप्तमस्य विद्यत इति वा । कामान् हन्ति मुमुक्षूणां भक्तानां हिंसकानां चेति **कामहा** । सात्त्विकानां कामान् करोतीति **कामकृत्** ; कामस्य प्रद्युम्नस्य जनकत्वाद्वा । अभिरूपतमः **कान्तः** । काम्यते पुरुषार्थाभिकाङ्क्षिभिरिति **कामः** । भक्तेभ्यः कामान् प्रकर्षेण ददातीति **कामप्रदः** । प्रकर्षेण भवनात् **प्रभुः** ॥

युगादिकृद्युगावर्तो
नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च
सहस्रजिदनन्तजित् ॥ ४६ ॥

युगादेः कालभेदस्य कर्तृत्वात् **युगादिकृत्**; युगानामादिमारम्भं करोति इति वा ॥

इति नाम्नां तृतीयं शतं विवृतम् ॥

युगानि कृतादीन्यावर्तयति कालात्मनेति **युगावर्तः** । एका माया न विद्यते बह्वीर्माया वहतीति **नैकमायः** । 'नलोपो नञः' इति नकारलोपो न भवति, अकारानुबन्धरहितस्यापि नकारस्य प्रतिषेधवाचिनो विद्यमानत्वात् । कल्पान्ते सर्वग्रसनात् महदशनमस्येति **महाशनः** । सर्वेषां बुद्धीन्द्रियाणामगम्य. **अदृश्यः** । स्थूलरूपेण व्यक्तं रूपमस्येति **व्यक्तरूपः**, स्वयं प्रकाशमानत्वात् योगिनां **व्यक्तरूपः** इति वा । सहस्राणि असुराणां युद्धे जयतीति **सहस्रजित्** । सर्वभूतानि युद्धक्रीडादिषु सर्वत्राचिन्त्यशक्तितया जयतीति **अनन्तजित्** ॥

इष्टोऽविशिष्टः शिष्टेष्टः
शिखण्डी नहुषो वृषः ।
क्रोधहा क्रोधकृत्कर्ता
विश्वबाहुर्महीधरः ॥ ४७ ॥

परमानन्दात्मकत्वेन प्रियः **इष्टः**; यज्ञेन पूजित इति वा **इष्टः** । सर्वेषामन्तर्यामित्वेन **अविशिष्टः** । शिष्टानां विदुषामिष्टः **शिष्टेष्टः**; शिष्टा इष्टा अस्येति वा, 'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः' इति भगवद्वचनात्; शिष्टैरिष्टः पूजित इति वा **शिष्टेष्टः** । शिखण्डः कलापोऽलंकारोऽस्येति **शिखण्डी** गोपवेषधरः । यतो नह्यति भूतानि मायया अतो **नहुषः** । कामानां वर्षणात् **वृषः** धर्मः । 'वृषो हि भगवान्धर्मः स्मृतो लोकेषु भारत । नैघण्टुकपदाख्यानैर्विद्धि मां वृष इत्युत' इति महाभारते । साधूनां क्रोधं हन्तीति **क्रोधहा** । असाधुषु क्रोधं करोतीति **क्रोधकृत्** । क्रियत इति कर्म जगत्, तस्य **कर्ता**, 'एतेषां पुरुषाणां यः कर्ता यस्य वै तत्कर्म स वै वेदितव्यः' इति श्रुतेः । क्रोधकृतां दैत्यादीनां कर्ता च्छेदक इत्येकं वा नाम । विश्वेषामालम्बनत्वेन, विश्वे बाहवोऽस्येति वा **विश्वबाहुः**, 'विश्वतो-

बाहुः' इति श्रुतेः । महीं पूजां धरणीं वा धरति इति **मही-धरः** ॥

अच्युतः प्रथितः प्राणः
प्राणदो वासवानुजः ।
अपां निधिरधिष्ठान-
मप्रमत्तः प्रतिष्ठितः ॥ ४८ ॥

षड्भावविकारशून्यत्वात् **अच्युतः**, 'शाश्वतं शिवमच्युतम्' इति श्रुतेः । जगदुत्पत्त्यादिकर्मभिः प्रख्यातः **प्रथितः** । सूत्रात्मना प्रजाः प्राणयतीति **प्राणः** । 'प्राणो वा अहमस्मि' इति बह्वृचाः । सुराणामसुराणां च प्राणं बलं ददाति यति वेति **प्राणदः** । अदित्यां कश्यपाद्वासवस्यानुजो जात इति **वासवानुजः** । आपो यत्र निधीयन्ते सः **अपां निधिः**, 'सरसामस्मि सागरः' इति भगवद्वचनात् । अधितिष्ठन्ति भूतानि उपादानकारणत्वेन ब्रह्म इति **अधिष्ठानम्**, 'मत्स्थानि सर्वभूतानि' इति भगवद्वचनात् । अधिकारिभ्यः कर्मानुरूपं फलं प्रयच्छन् न प्रमाद्यतीति **अप्रमत्तः** । स्वे महिम्नि स्थितः **प्रतिष्ठितः**, 'स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि' इति श्रुतेः ॥

स्कन्दः स्कन्दधरो धुर्यो
वरदो वायुवाहनः ।
वासुदेवो बृहद्भानु-
रादिदेवः पुरंदरः ॥ ४९ ॥

स्कन्दत्यमृतरूपेण स्रवति वायुरूपेण शोषयतीति वा **स्कन्दः** । स्कन्द धर्मपथं धारयतीति वा **स्कन्दधरः** । धुरं वहति समस्तभूतजन्मादिलक्षणामिति **धुर्यः** । अभिमतान् वरान् ददातीति, वरं दक्षिणां ददाति यजमानरूपेणेति वा **वरदः**, 'गौर्वै वर.' इति श्रुतेः । वहतः सप्त आवहादीन् वाहयतीति **वायुवाहनः** । वसति वासयत्याच्छादयति सर्वमिति वा वासुः, दीव्यति क्रीडते विजिगीषते व्यवहरति द्योतते सूयते गच्छतीति वा देवः, वासुश्चासौ देवश्चेति **वासुदेवः** ।

छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः ।
सर्वभूताधिवासश्च वासुदेवस्ततः स्मृतः ॥
वसनात्सर्वभूतानां वसुत्वाद्देवयोनितः ।
वासुदेवस्ततो ज्ञेयो योगिभिस्तत्त्वदर्शिभिः ॥

इति उद्योगपर्वणि ।

सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः ।
ततः स वासुदेवेति विद्वद्भिः परिपठ्यते ॥
सर्वाणि तत्र भूतानि वसन्ति परमात्मनि ।
भूतेषु च स सर्वात्मा वासुदेवस्ततः स्मृतः ॥
इति च विष्णुपुराणे ।

बृहन्तो भानवो यस्य चन्द्रसूर्यादिगामिनः । तैर्विश्वं भासयति यः सः **बृहद्भानुः** उच्यते । आदिः कारणम्, स चासौ देवश्चेति **आदिदेवः**; द्योतनादिगुणवान्देवः । सुरशत्रूणां पुरदारणात् **पुरंदरः**, 'वाचंयमपुरंदरौ च' इति पाणिनिना निपातनात् ॥

अशोकस्तारणस्तारः
शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः
पद्मी पद्मनिभेक्षणः ॥ ५० ॥

शोकादिषड्ऊर्मिवर्जितः **अशोकः** । संसारसागरात्तारयतीति **तारणः** । गर्भजन्मजरामृत्युलक्षणात् भयात् तारयतीति **तारः** । विक्रमणात् **शूरः** । शूरस्यापत्यं वसुदेवश्च सुतः **शौरिः** । जनानां जन्तूनामीश्वरो **जनेश्वरः** । आत्मत्वेन हि सर्वेषाम् **अनुकूलः** । न हि स्वस्मिन्प्रातिकूल्यं स्वय-

माचरति । धर्मत्राणाय शतमावर्तनानि प्रादुर्भावा अस्येति **शतावर्तः** ; नाडीशते प्राणरूपेण वर्तत इति वा । पद्मं हस्ते विद्यते इति **पद्मी** । पद्मनिभे ईक्षणे दृशावस्येति **पद्म-निभेक्षणः** ॥

पद्मनाभोऽरविन्दाक्षः
पद्मगर्भः शरीरभृत् ।
महर्द्धिर्ऋद्धो वृद्धात्मा
महाक्षो गरुडध्वजः ॥ ५१ ॥

पद्मस्य नाभौ मध्ये कर्णिकायां स्थित इति **पद्मनाभः** । अरविन्दसदृशे अक्षिणी अस्येति **अरविन्दाक्षः** । पद्मस्य हृदयाख्यस्य मध्ये उपास्यत्वात् **पद्मगर्भः** । पोषयन्नन्नरूपेण प्राणरूपेण वा शरीरिणां शरीराणि धारयतीति **शरीरभृत्** ; स्वमायया शरीराणि विभर्तीति वा । महती ऋद्धिर्विभूतिरस्येति **महर्द्धिः** । प्रपञ्चरूपेण वर्धमानत्वात् **ऋद्धः** । वृद्धः पुरातन आत्मा यस्येति **वृद्धात्मा** । महती अक्षिणी महान्त्यक्षीणि वा अस्येति **महाक्षः** । गरुडाङ्कः ध्वजो यस्येति **गरुडध्वजः** ॥

अतुलः शरभो भीमः
समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो
लक्ष्मीवान्समितिंजयः ॥ ५२ ॥

तुला उपमानमस्य न विद्यते इति **अतुलः**, 'न तस्य प्रतिमास्ति यस्य नाम महद्यशः' इति श्रुतेः, 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति स्मृतेश्च । शराः शरीराणि, शीर्यमाणत्वात्, तेषु प्रत्यगात्मतया भातीति **शरभः** । बिभेत्यस्मात्सर्वमिति **भीमः**, 'भीमादयोऽपादाने' इति पाणिनिस्मृतेः । सन्मार्गवर्तिनाम् **अभीमः** इति वा । सृष्टिस्थितिसंहारसमयवित्, षट् समयान् जानातीति वा **समयज्ञः** ; सर्वभूतेषु समत्वं यजनमस्येति वा, 'समत्वमाराधनमच्युतस्य' इति प्रह्लादवचनात् । यज्ञेषु हविर्भागं हरतीति **हविर्हरिः**, 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इति भगवद्वचनात् । अथवा, हूयते हविषा असाविति **हविः**, 'अवघ्नन्पुरुषं पशुम्' इति हविष्वं श्रूयते । स्मृतिमात्रेण पापं संसारं वा पुंसां हरतीति, हरितवर्णत्वाद्वा **हरिः**, 'हराम्यघं च स्मर्तृणां हविर्भागं क्रतुष्वहम् । वर्णश्च मे हरिर्वेति

तस्माद्धरिरहं स्मृतः' इति भगवद्वचनात् । सर्वैर्लक्षणैः प्रमाणैः लक्षणं ज्ञानं जायते यत्तद्विनिर्दिष्टं सर्वलक्षणलक्षणम्, तत्र साधुः **सर्वलक्षणलक्षण्यः**, तस्यैव परमार्थत्वात्। लक्ष्मीरस्य वक्षसि नित्यं वसतीति **लक्ष्मीवान्**। समितिं युद्धं जयतीति **समितिंजयः** ॥

विक्षरो रोहितो मार्गो
हेतुर्दामोदरः सहः।
महीधरो महाभागो
वेगवानमिताशनः ॥ ५३ ॥

विगतः क्षरो नाशो यस्यासौ **विक्षरः**। स्वच्छन्दतया रोहितां मूर्तिं मत्स्यमूर्तिं वा वहन् **रोहितः**। मुमुक्षवः तं देवं मार्गयन्ति इति **मार्गः**; परमानन्दो येन प्राप्यते स **मार्गः** इति वा। उपादानं निमित्तं च कारणं स एवेति **हेतुः**। दमादिसाधनेन उदरः उत्कृष्टा मतिर्या, तया गम्यत इति **दामोदरः**। 'दमाद्दामोदरं विदुः' इति महाभारते। यशोदया दाम्नोदरे बद्ध इति वा। 'तयोर्मध्यगतं बद्धं दाम्ना गाढं तयोदरे। ततश्च दामोदरतां स ययौ दामबन्धनात्' इति ब्रह्मपुराणे। 'दामानि लोकनामानि तानि यस्योदरा-

न्तरे । तेन दामोदरो देवः' इति व्यासवचनाद्वा दामोदरः । सर्वानभिभवति क्षमत इति वा **महः** । मही गिरिरूपेण धरति इति **महीधरः** । 'वनानि विष्णुर्गिरयो दिशश्च' इति विष्णुपुराणे । स्वेच्छया धारयन्देहं महान्ति उत्कृष्टानि भोजनानि भागजन्यानि भुङ्क्ते इति **महाभागः**; महान् भागः भाग्यमस्यावतारेष्विति वा **महाभागः** । वेगो जवः तद्वान **वेगवान्**, 'अनेजदेकं मनसो जवीय.' इति श्रुतेः । संहारसमये विश्वमश्नातीति **अमिताशनः** ॥

उद्भवः क्षोभणो देवः
श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता
विकर्ता गहनो गुहः ॥ ५४ ॥

प्रपञ्चोत्पत्त्युपादानकारणत्वात् **उद्भवः** । उद्गतो भवात् संसारादिति वा । सर्गकाले प्रकृति पुरुषं च प्रविश्य क्षोभयामासेति **क्षोभणः** । 'प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास भगवान्सर्गकाले व्ययाव्ययौ' इति विष्णुपुराणे । यतो दीव्यति क्रीडति सर्गादिभिः, विजिगीषते सुरादीन्, व्यवहरति सर्वभूतेषु, आत्मतया द्योतते, स्तूयते

स्तुत्यैः, सर्वत्र गच्छति तस्मात् **देवः**, 'एको देवः' इति मन्त्रवर्णात्। श्रीर्विभूतिर्यस्योदरान्तरे जगद्रूपा यस्य गर्भे स्थिता सः **श्रीगर्भः**। परमश्चासौ ईशनशीलश्चेति **परमेश्वरः**, 'समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्' इति भगवद्वचनात्। जगदुत्पत्तौ साधकतमं **करणम्**। उपादानं निमित्तं च **कारणम्**। **कर्ता** स्वतन्त्रः। विचित्रं भुवनं क्रियत इति **विकर्ता** स एव भगवान्विष्णुः। स्वरूपं सामर्थ्यं चेष्टितं वा तस्य ज्ञातुं न शक्यत इति **गहनः**। गूहते संवृणोति स्वरूपादि निजमाययेति **गुहः**॥

व्यवसायो व्यवस्थानः
संस्थानः स्थानदो ध्रुवः।
परर्द्धिः परमस्पष्ट-
स्तुष्टः पुष्टः शुभेक्षणः॥ ५५॥

संविन्मात्रस्वरूपत्वात् **व्यवसायः**। अस्मिन् व्यवस्थितिः सर्वस्येति **व्यवस्थानः**; लोकपालाद्यधिकारजरायुजाण्डजोद्भिज्जब्राह्मणक्षत्रियवैश्यशूद्रावान्तरवर्णब्रह्मचारिगृहस्थवानप्रस्थसंन्यासलक्षणाश्रमतद्धर्मादिकान् विभज्य करोति इति वा **व्यवस्थानः**। 'कृत्यल्युटो बहुलम्' इति

बहुलग्रहणात् कर्तरि ल्युट् प्रत्ययः । अत्र भूतानां संस्थितिः प्रलयात्मिका, समीचीनं स्थानमस्येति वा **संस्थानः** । ध्रुवादीनां कर्मानुरूपं स्थानं ददातीति **स्थानदः** । अविनाशित्वात् ध्रुवः । परा ऋद्धिर्विभूतिरस्येति **परर्द्धिः** । परा मा शोभा अस्येति परमः, सर्वोत्कृष्टो वा अनन्याधीनसिद्धित्वात्, संविदात्मतया स्पष्टः **परमस्पष्टः** । परमानन्दैकरूपत्वात् **तुष्टः** । सर्वसंपूर्णत्वात् **पुष्टः** । ईक्षणं दर्शनं यस्य शुभं शुभकरं मुमुक्षूणां मोक्षदं भोगार्थिनां भोगदं सर्वसंदेहविच्छेदकारणं पापिनां पावनं हृदयग्रन्थेर्विच्छेदकरं सर्वकर्मणां क्षपणम् अविद्यायाश्च निवर्तकं सः **शुभेक्षणः**, 'भिद्यते हृदयग्रन्थिः' इत्यादिश्रुतेः ॥

रामो विरामो विरतो
मार्गो नेयो नयोऽनयः ।
वीरः शक्तिमतां श्रेष्ठो
धर्मो धर्मविदुत्तमः ॥ ५६ ॥

नित्यानन्दलक्षणेऽस्मिन् योगिनो रमन्त इति **रामः**; 'रमन्ते योगिनो यस्मिन्नित्यानन्दे चिदात्मनि । इति रामपदेनैतत्परं ब्रह्माभिधीयते' इति पद्मपुराणे; स्वेच्छया

रमणीयं वपुर्वहन्वा दाशरथी **रामः** । विरामोऽवसानं प्राणिनामस्मिन्निति **विरामः** । विगतं रतमस्य विषयसेवायामिति **विरतः** । यं विदित्वा अमृतत्वाय कल्पन्ते योगिनो मुमुक्षवः स एव पन्था **मार्गः**, 'नान्यः पन्था विद्यतेऽयनाय' इति श्रुतेः । मार्गेण सम्यग्ज्ञानेन जीवः परमात्मतया नीयत इति **नेयः** । नयतीति **नयः** नेता । मार्गो नेयो नयः इति त्रिरूपः परिकल्प्यते । नास्य नेता विद्यते इति **अनयः** ॥

इति नाम्नां चतुर्थं शतं विवृतम् ॥

विक्रमशालित्वात् **वीरः** । शक्तिमतां विरिञ्चाद्यादीनामपि शक्तिमत्त्वात् **शक्तिमतां श्रेष्ठः** । सर्वभूतानां धारणात् **धर्मः**, 'अणुरेष धर्मः' इति श्रुतेः ; धर्मैराराध्यत इति वा **धर्मः** । श्रुतयः स्मृतयश्च यस्याज्ञाभूताः स एव सर्वधर्मविदामुत्तमः इति **धर्मविदुत्तमः** ॥

वैकुण्ठः पुरुषः प्राणः
प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो
व्याप्तो वायुरधोक्षजः ॥ ९७ ॥

विविधा कुण्ठा गतेः प्रतिहतिः विकुण्ठा, विकुण्ठायाः कर्तेति **वैकुण्ठः**, जगदारम्भे विश्लिष्टानि भूतानि परस्परं

संश्लेषयन् तेषां गतिं प्रतिबध्नातीति । 'मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना । वायुश्च तेजसा सार्धं वैकुण्ठत्वं ततो मम' इति शान्तिपर्वणि । सर्वस्मात्पुरा सदनात्सर्वपापस्य सादनाद्वा **पुरुषः** ; 'स यत्पूर्वोऽस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुषः' इति श्रुते. ; पुरि शयनाद्वा **पुरुषः**, 'स वा अयं पुरुषः सर्वासु पूर्षु पुरि शयः' इति श्रुतेः । प्राणिति क्षेत्रज्ञरूपेण प्राणात्मना चेष्टयन्वा **प्राणः** । 'चेष्टां करोति श्वसनस्वरूपी' इति विष्णुपुराणे । खण्डयति प्राणिनां प्राणान प्रलयादिष्विति **प्राणदः** । प्रणौतीति **प्रणवः**, 'तस्मादोमिति प्रणौति' इति श्रुतेः । प्रणम्यते इति वा **प्रणवः**, 'प्रणमन्तीह यं वेदास्तस्मात्प्रणव उच्यते' इति सनत्कुमारवचनात् । प्रपञ्चरूपेण विस्तृतत्वात् **पृथुः** । हिरण्यगर्भसंभूतिकारणं हिरण्मयमण्डं यद्वीर्यसंभूतम्, तदस्य गर्भ इति **हिरण्यगर्भः** । त्रिदशशत्रून्हन्तीति **शत्रुघ्नः** । कारणत्वेन सर्वकार्याणां व्यापनात् **व्याप्तः** । वाति गन्धं करोतीति **वायुः**, 'पुण्यो गन्धः पृथिव्यां च' इति भगवद्वचनात् । 'अधो न क्षीयते जातु यस्मात्तस्मात् **अधोक्षजः**' इति उद्योगपर्वणि ; द्यौरक्षम् पृथिवी चाधः, तयोर्यस्मादजायत मध्ये वैराजरूपेण इति वा **अधोक्षजः** ; अधोभूते ह्यक्षगणे प्रत्यग्रूपप्रवाहिते । जायते तस्य वै ज्ञानं तेन **अधोक्षजः** उच्यते ॥

ऋतुः सुदर्शनः कालः
परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो
विश्रामो विश्वदक्षिणः ॥ ५८ ॥

कालात्मना ऋतुशब्देन लक्ष्यत इति **ऋतुः** । शोभनं निर्वाणफलं दर्शनं ज्ञानमस्येति, शुभे दर्शने ईक्षणे पद्मपत्रायते अस्येति, सुखेन दृश्यते भक्तैरिति वा **सुदर्शनः** । कलयति सर्वमिति **कालः**, 'कालः कलयतामहम्' इति भगवद्वचनात् । परमे प्रकृष्टे स्वे महिम्नि हृदयाकाशे स्थातुं शीलमस्येति **परमेष्ठी**, 'परमेष्ठी विभ्राजते' इति मन्त्रवर्णात् । शरणार्थिभिः परितो गृह्यते सर्वगतत्वात्, परितो ज्ञायते इति वा, पत्रपुष्पादिकं भक्तैरर्पितं परिगृह्णातीति वा **परिग्रहः** । सूर्यादीनामपि भयहेतुत्वात् **उग्रः**, 'भीषोदेति सूर्यः' इति श्रुतेः । संवसन्ति भूतान्यस्मिन्निति **संवत्सरः** । जगद्रूपेण वर्धमानत्वात् सर्वकर्माणि क्षिप्रं करोतीति वा **दक्षः** । संसारसागरे क्षुत्पिपासादिषड्ऊर्मिभिस्तरङ्गिते अविद्याद्यैर्महाक्लेशैः मदादिभिरुपक्लेशैश्च वशीकृतानां विश्रान्तिं काङ्क्षमाणानां विश्रामं मोक्षं करोतीति **विश्रामः** । विश्वस्मात् दक्षिणः शक्तः, विश्वेषु कर्मसु दाक्षिण्याद्वा **विश्वदक्षिणः** ॥

विस्तारः स्थावरस्थाणुः
प्रमाणं बीजमव्ययम् ।
अर्थोऽनर्थो महाकोशो
महाभोगो महाधनः ॥ ५९ ॥

विस्तीर्यन्ते समस्तानि जगन्त्यस्मिन्निति विस्तारः । स्थितिशीलत्वात् स्थावरः; स्थितिशीलानि पृथिव्यादीनि तिष्ठन्त्यस्मिन्निति स्थाणुः; स्थावरश्चासौ स्थाणुश्च **स्थावरस्थाणुः** । संविदात्मना **प्रमाणम्** । अन्यथाभावव्यतिरेकेण कारणमिति **बीजमव्ययम्**, सविशेषणमेकं नाम । सुखरूपत्वात्सर्वैरर्थ्यत इति **अर्थः** । न विद्यते प्रयोजनम् आप्तकामत्वात् अस्येति **अनर्थः** । महान्तः कोशा अन्नमयादयः आच्छादका अस्येति **महाकोशः** । महान् भोगः सुखरूपोऽस्येति **महाभोगः** । महत् भोगसाधनलक्षणं धनमस्येति **महाधनः** ॥

अनिर्विण्णः स्थविष्ठोऽभू-
र्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री
क्षमः क्षामः समीहनः ॥ ६० ॥

आप्तकामत्वात् निर्वेदोऽस्य न विद्यत इति **अनिर्विण्णः**। वैराजरूपेण स्थितः **स्थविष्ठः** 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' इति श्रुतेः। अजन्मा **अभूः**; अथवा 'भू सत्तायाम्' इत्यस्य संपदादित्वात् क्विप्; मही वा। यूपे पशुवत् तत्समाराधनात्मका धर्माः तत्र बध्यन्त इति **धर्मयूपः**। यस्मिन्नर्पिता मखा यज्ञा निर्वाणलक्षणफलं प्रयच्छन्तो महान्तो जायन्ते सः **महामखः**। 'नक्षत्रतारकैः सार्धं चन्द्रसूर्यादयो ग्रहाः। वायुपाशमयैर्बन्धैर्निबद्धा ध्रुवसंज्ञिते' स ज्योतिषां चक्रं भ्रामयंस्तारामयस्य शिंशुमारस्य पुच्छदेशे व्यवस्थितो ध्रुवः। तस्य शिंशुमारस्य हृदये ज्योतिश्चक्रस्य नेमिवत्प्रवर्तकः स्थितो विष्णुरिति **नक्षत्रनेमिः**, शिंशुमारवर्णने 'विष्णुर्हृदयम्' इति स्वाध्यायब्राह्मणे श्रूयते। चन्द्ररूपेण **नक्षत्री**, 'नक्षत्राणामहं शशी' इति भगवद्वचनात्। समस्तकार्येषु समर्थः **क्षमः**; क्षमत इति वा, 'क्षमया पृथिवीसमः' इति वाल्मीकिवचनात्। सर्वविकारेषु क्षपितेषु स्वात्मनावस्थित इति **क्षामः**। 'क्षायो मः' इति निष्ठातकारस्य मकारादेशः। सृष्ट्याद्यर्थं सम्यगीहते इति **समीहनः**॥

यज्ञ इज्यो महेज्यश्च
क्रतुः सत्रं सतां गतिः।

सर्वदर्शी विमुक्तात्मा
सर्वज्ञो ज्ञानमुत्तमम् ॥ ६१ ॥

सर्वयज्ञस्वरूपत्वात् **यज्ञः**; सर्वेषां देवानां तुष्टिकारको यज्ञाकारेण प्रवर्तत इति वा, 'यज्ञो वै विष्णुः' इति श्रुतेः। यष्टव्योऽप्ययमेवेति **इज्यः**। 'ये यजन्ति मखैः पुण्यैर्देवतादीन्पितॄनपि। आत्मानमात्मना नित्यं विष्णुमेव यजन्ति ते' इति हरिवंशे। सर्वासु देवतासु यष्टव्यासु प्रकर्षेण यष्टव्यो मोक्षफलदातृत्वादिति **महेज्यः**। यूपसहितो यज्ञः **क्रतुः**। आसत्युपैतिचोदनालक्षणं **सत्रम्**; सतस्त्रायत इति वा। सतां मुमुक्षूणां नान्या गतिरिति **सतां गतिः**। सर्वेषां प्राणिनां कृताकृतं सर्वं पश्यति स्वाभाविकेन बोधेनेति **सर्वदर्शी**। स्वभावेन विमुक्त आत्मा यस्येति, विमुक्तश्चासावात्मा चेति वा **विमुक्तात्मा**, 'विमुक्तश्च विमुच्यते' इति श्रुतेः। सर्वश्चासौ ज्ञश्चेति **सर्वज्ञः**, 'इदं सर्वं यदयमात्मा' इति श्रुतेः। ज्ञानमुत्तममित्येतत्सविशेषणमेकं नाम, ज्ञानं प्रकृष्टमजन्यम् अनवच्छिन्नं सर्वस्य साधकतममिति **ज्ञानमुत्तमं** ब्रह्म, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः ॥

सुव्रतः सुमुखः सूक्ष्मः
सुघोषः सुखदः सुहृत् ।

मनोहरो जितक्रोधो
वीरबाहुर्विदारणः ॥ ६२ ॥

शोभनं व्रतमस्येति **सुव्रतः** । 'सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वथा तस्मै ददाम्येतद्व्रतं मम' इति श्रीरामायणे रामवचनम् । शोभनं मुखमस्येति **सुमुखः** । 'प्रसन्नवदनं चारु पद्मपत्रायतेक्षणम्' इति श्रीविष्णुपुराणे । वनवाससुमुखत्वाद्वा दाशरथी रामः **सुमुखः** ॥

स्वपितुर्वचनं श्रीमानभिषेकात्परं प्रियम् ।
मनसा पूर्वमासाद्य वाचा प्रतिगृहीतवान् ॥
इमानि तु महारण्ये विहृत्य नव पञ्च च ॥
वर्षाणि परमप्रीतः स्थास्यामि वचने तव ॥
√न वनं गन्तुकामस्य त्यजतश्च वसुंधराम् ।
सर्वलोकातिगस्यैव मनो रामस्य विव्यथे ॥

इति रामायणे ।

सर्वविद्योपदेशेन वा **सुमुखः**, 'यो ब्रह्माणम्' इत्यादिश्रुतेः । शब्दादिस्थूलकारणरहितत्वात्— शब्दादयो ह्याकाशादीनामुत्तरोत्तरस्थूलत्वकारणानि, तदभावात्— **सूक्ष्मः**, 'सर्वगतं सुसूक्ष्मम्' इति श्रुतेः । शोभनो घोषो वेदात्मकोऽस्येति, मेघगम्भीरघोषत्वाद्वा **सुघोषः** । सद्वृत्तानां सुखं ददाति,

असद्वृत्तानां सुखं द्यति खण्डयतीति वा **सुखदः** । प्रत्युपकारनिरपेक्षतयोपकारित्वात् **सुहृत्** । निरतिशयानन्दरूपत्वात् मनो हरतीति **मनोहरः**, 'यो वै भूमा तत्सुखं नाल्पे सुखमस्ति' इति श्रुतेः । जितः क्रोधो येन सः **जितक्रोधः**; वेदमर्यादास्थापनार्थं सुरारीन् हन्ति, न तु कोपवशादिति । त्रिदशशत्रून्निघ्नन्वेदमर्यादां स्थापयन् विक्रमशाली बाहुरस्येति **वीरबाहुः** । अधार्मिकान् विदारयतीति **विदारणः** ॥

स्वापनः स्ववशो व्यापी
नैकात्मा नैककर्मकृत् ।
वत्सरो वत्सलो वत्सी
रत्नगर्भो धनेश्वरः ॥ ६३ ॥

प्राणिनः स्वीयान् आत्मसंबोधविधुरान् मायया कुर्वन् **स्वापनः** । स्वतन्त्रः **स्ववशः**, जगदुत्पत्तिस्थितिलयहेतुत्वात् । आकाशवत्सर्वगतत्वात् **व्यापी**, 'आकाशवत्सर्वगतश्च नित्यः' इति श्रुतेः ; कारणत्वेन सर्वकार्याणां व्यापनाद्वा **व्यापी**। जगदुत्पत्त्यादिषु आविर्भूतनिमित्तशक्तिभिर्विभूतिभिरनेकधा तिष्ठन् **नैकात्मा** । जगदुत्पत्तिसंपत्तिविपत्तिप्रभृतिकर्माणि करोतीति **नैककर्मकृत्** । वसत्यत्राखिलमिति **वत्सरः** । भक्तस्ने-

हित्वात् **वत्सलः**; 'वत्सांसाभ्यां कामबले' इति लच्प्रत्ययः। वत्सानां पालनात् **वत्सी**, जगत्पितुस्तस्य वत्सभूताः प्रजा इति वा **वत्सी**। रत्नानि गर्भभूतानि अस्येति समुद्रः **रत्नगर्भः**। धनानामीश्वरः **धनेश्वरः**॥

धर्मगुब्धर्मकृद्धर्मी
सदसत्क्षरमक्षरम्।
अविज्ञाता सहस्रांशु-
र्विधाता कृतलक्षणः॥ ६४॥

धर्मं गोपयतीति **धर्मगुप्**, 'धर्मसंस्थापनार्थाय संभवामि युगे युगे' इति भगवद्वचनात्। धर्माधर्मविहीनोऽपि धर्ममर्यादास्थापनार्थं धर्ममेव करोतीति **धर्मकृत्**। धर्मान धारयतीति **धर्मी**। अवितथं परं ब्रह्म **सत्**, 'सदेव सोम्येदम्' इति श्रुतेः। अपरं ब्रह्म **असत्**, 'वाचारम्भणं विकारो नामधेयम्' इति श्रुते.। सर्वाणि भूतानि **क्षरम्**। कूटस्थः **अक्षरम्**, 'द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।' 'क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते' इति भगवद्वचनात्। आत्मनि कर्तृत्वादिविकल्पविज्ञानं कल्पितमिति तद्वासनावगुण्ठितो जीवो विज्ञाता, तद्विलक्षणो

विष्णुः **अविज्ञाता** । आदित्यादिगता अंशवोऽस्येत्ययमेव मुख्यः **सहस्रांशुः**, 'येन सूर्यस्तपति तेजसेद्धः' इति श्रुतेः 'यदादित्यगतं तेजः' इति स्मृतेश्च । विशेषेण शेषदिग्गज-भूधरान् सर्वभूतानां धातृन् दधातीति **विधाता** । नित्य-निष्पन्नचैतन्यरूपत्वात् **कृतलक्षणः**; कृतानि लक्षणानि शास्त्राण्यनेनेति वा; 'वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्' इत्यत्रैव वक्ष्यति; सजातीयविजातीयव्यवच्छेदकं लक्षणं सर्वभावाना कृतमनेनेति वा; आत्मनः श्रीवत्सलक्षणं वक्षसि तेन कृतमिति वा **कृतलक्षणः** ॥

गभस्तिनेमिः सत्त्वस्थः
सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो
देवेशो देवभृद्गुरुः ॥ ६५ ॥

गभस्तिचक्रस्य मध्ये सूर्यात्मना स्थित इति **गभस्ति-नेमिः** । सत्त्वं गुणं प्रकाशकं प्राधान्येनाधितिष्ठतीति, सर्वप्राणिषु तिष्ठतीति वा **सत्त्वस्थः** । विक्रमशालित्वात्सिंहवत् **सिंहः**; नृशब्दलोपेन 'सत्यभामा भामा' इतिवद्वा **सिंहः** । भूतानां महानीश्वरः, भूतेन सत्येन स एव परमो महानीश्वर

इति वा **भूतमहेश्वरः** । सर्वभूतान्यादीयन्तेऽनेनेति आदिः, आदिश्चासौ देवश्चेति **आदिदेवः** । सर्वान्भावान्परित्यज्य आत्मज्ञानयोगैश्वर्ये महति महीयते, तस्मादुच्यते **महादेवः** । प्राधान्येन देवानामीशो **देवेशः** । देवान् बिभर्तीति देवभृत् शक्रः, तस्यापि शासितेति **देवभृद्गुरुः**; देवानां भरणात्, सर्वविद्यानां च निगरणाद्वा **देवभृद्गुरुः** ॥

उत्तरो गोपतिर्गोप्ता
ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता
कपीन्द्रो भूरिदक्षिणः ॥ ६६ ॥

जन्मसंसारबन्धनादुत्तरतीति **उत्तरः**; सर्वोत्कृष्ट इति वा, 'विश्वस्मादिन्द्र उत्तरः' इति श्रुतेः । गवां पालनाद्गोपवेषधरो **गोपतिः**; गौर्मही, तस्याः पतित्वाद्वा । समस्तभूतानि पालयन रक्षको जगतः इति **गोप्ता** । न कर्मणा न ज्ञानकर्मभ्यां वा गम्यते, किंतु ज्ञानेन गम्यते इति **ज्ञानगम्यः** । कालेनापरिच्छिन्नत्वान् पुरापि भवतीति **पुरातनः** । शरीरारम्भकभूतानां भरणात् प्राणरूपधरः **शरीरभूतभृत्** । पालकत्वात् **भोक्ता**; परमानन्दसंदोहसंभोगाद्वा **भोक्ता** ॥

इति नाम्नां पञ्चमं शतं विवृतम् ॥

कपिश्चासाविन्द्रश्चेति कपिर्वराहः, वाराहं वपुरास्थितः **कपीन्द्रः**; कपीनां वानराणामिन्द्रः **कपीन्द्रः** राघवो वा । भूरयो बह्व्यः यज्ञदक्षिणाः धर्ममर्यादां दर्शयतो यज्ञं कुर्वतो विद्यन्त इति **भूरिदक्षिणः** ॥

सोमपोऽमृतपः सोमः
पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसंधो
दाशार्हः सात्त्वतां पतिः ॥ ६७ ॥

सोमं पिबति सर्वयज्ञेषु यष्टव्यदेवतारूपेणेति **सोमपः**; धर्ममर्यादां दर्शयन्यजमानरूपेण वा **सोमपः** । स्वात्मामृतरसं पिबन् **अमृतपः**; असुरैः ह्रियमाणममृतं रक्षित्वा देवान् पाययित्वा स्वयमप्यपिबदिति वा । सोमरूपेणौषधीः पोषयन् **सोमः**; उमया सहितः शिवो वा । पुरून् बहून् जयतीति **पुरुजित्** । विश्वरूपत्वात् पुरुः, उत्कृष्टत्वात् सत्तमः, पुरुश्चासौ सत्तमश्चेति **पुरुसत्तमः** । विनयं दण्डं करोति दुष्टानामिति **विनयः** । समस्तानि भूतानि जयतीति **जयः** । सत्या संधा संकल्पः अस्येति **सत्यसंधः**, 'सत्यसंकल्पः' इति श्रुतेः । दाशो दानं तमर्हतीति **दाशार्हः**; दशार्हकु-

लोद्भवाद्वा । सात्त्वतं नाम तन्त्रम्, 'तत्करोति तदाचष्टे' इति णिचि कृते क्विप्प्रत्यये णिलोपे च कृते पदं सात्त्वत्, तेषां पतिः योगक्षेमकर इति **सात्त्वतां पतिः** ॥

जीवो विनयितासाक्षी
मुकुन्दोऽमितविक्रमः ।
अम्भोनिधिरनन्तात्मा
महोदधिशयोऽन्तकः ॥ ६८ ॥

प्राणान् क्षेत्रज्ञरूपेण धारयन्, **जीवः** उच्यते । विनयित्वं विनयिता, तां च साक्षात्पश्यति प्रजानामिति **विनयितासाक्षी**; अथवा, नयतेर्गतिवाचिनो रूपं **विनयिता**, **असाक्षी** असाक्षाद्द्रष्टा आत्मातिरिक्तं वस्तु न पश्यतीत्यर्थः । मुक्तिं ददातीति **मुकुन्दः** । पृषोदरादित्वात्साधुत्वम् । अक्षरसाम्यान्निरुक्तिवचनात् नैरुक्तानां मुकुन्द इति निरुक्तिः । अमिता अपरिच्छिन्ना विक्रमास्त्रयः पादविक्षेपा अस्य, अमितं विक्रमणं शौर्यमस्येति वा **अमितविक्रमः** । अम्भांसि देवादयोऽस्मिन्निधीयन्त इति **अम्भोनिधिः**, 'तानि वा एतानि चत्वार्यम्भांसि । देवा मनुष्याः पितरोऽसुराः' इति श्रुतेः ; सागरो वा, 'सरसामस्मि सागरः' इति भगवद्वच-

नात् । देशतः कालतः वस्तुतश्चापरिच्छिन्नत्वात् **अनन्तात्मा** । संहृत्य सर्वभूतान्येकार्णवं जगत्कृत्वा अधिशेते महोदधिमिति **महोदधिशयः** । अन्तं करोति भूतानामिति **अन्तकः** । 'तत्करोति तदाचष्टे' इति णिचि ण्वुलि अकादेशः ॥

अजो महार्हः स्वाभाव्यो
जितामित्रः प्रमोदनः ।
आनन्दो नन्दनोऽनन्दः
सत्यधर्मा त्रिविक्रमः ॥ ६९ ॥

आत् विष्णोः अजायत इति कामः **अजः** । महः पूजा तदर्हत्वात् **महार्हः** । स्वभावेनैवाभाव्यो नित्यनिष्पन्नरूपत्वात् इति **स्वाभाव्यः** । जिता अमित्रा अन्तर्वर्तिनो रागद्वेषादयो बाह्याश्च रावणकुम्भकर्णशिशुपालादयः येनासौ **जितामित्रः**, । स्वात्मामृतरसास्वादान्नित्यं प्रमोदते, ध्यायिनां ध्यानमात्रेण प्रमोदं करोतीति वा **प्रमोदनः** । आनन्दः स्वरूपमस्येति **आनन्दः**, 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः । नन्दयतीति **नन्दनः** । सर्वाभिरुपपत्तिभिः समृद्धो **नन्दः** । सुखं वैषयिकं नास्य

विद्यत इति **अनन्दः**, 'यो वै भूमा तत्सुखं नाल्पे सुख-मस्ति' इति श्रुतेः । सत्या धर्मज्ञानादयोऽस्येति **सत्यधर्मा** । त्रयो विक्रमास्त्रिषु लोकेषु क्रान्ता यस्य सः **त्रिविक्रमः**, 'त्रीणि पदा विचक्रमे' इति श्रुतेः; त्रयो लोकाः क्रान्ता येनेति वा **त्रिविक्रमः** । 'त्रिरित्येव त्रयो लोकाः कीर्तिता मुनिसत्तमैः । क्रमते तांस्त्रिधा सर्वांस्त्रिक्रमोऽसि जनार्दन' इति हरिवंशे ॥

महर्षिः कपिलाचार्यः
कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो
महाशृङ्गः कृतान्तकृत् ॥ ७० ॥

महर्षिः कपिलाचार्यः इति सविशेषणमेकं नाम । महां-श्चासावृषिश्चेति महर्षिः, कृत्स्नस्य वेदस्य दर्शनात्; अन्ये तु वेदैकदेशदर्शनात् ऋषयः । कपिलश्चासौ सांख्यस्य शुद्धतत्त्वविज्ञानस्याचार्यश्चेति कपिलाचार्यः, 'शुद्धात्मतत्त्व-विज्ञानं सांख्यमित्यभिधीयते' इति व्यासस्मृतेः, 'ऋषिं प्रसूतं कपिलं महान्तम्' इति श्रुतेश्च, 'सिद्धानां कपिलो मुनिः' इति स्मृतेश्च । कृतं कार्यं जगत्, ज्ञ आत्मा, कृतं

च तत् ज्ञश्चेति **कृतज्ञः** । मेदिन्याः भूम्याः पतिः **मेदिनीपतिः** । त्रीणि पदान्यस्येति **त्रिपदः**, 'त्रीणि पदा विचक्रमे' इति श्रुतेः । गुणावेशेन संजातास्तिस्रो दशा अवस्था जाग्रदादयः, तासामध्यक्ष इति **त्रिदशाध्यक्षः** । मत्स्यरूपी महति शृङ्गे प्रलयाम्भोधौ नावं बद्ध्वा चिक्रीड इति **महाशृङ्गः** । कृतस्यान्तं संहारं करोतीति, कृतान्तं मृत्युं कृन्ततीति वा **कृतान्तकृत्** ॥

महावराहो गोविन्दः
सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो
गुप्तश्चक्रगदाधरः ॥ ७१ ॥

महांश्चासौ वराहश्चेति **महावराहः** । गोभिर्वाणीभिः विन्दते, वेत्ति वेदान्तवाक्यैरिति वा **गोविन्दः** । 'गोभिरेव यतो वेद्यो गोविन्दः समुदाहृतः' इति श्रीविष्णुतिलके । शोभना सेना गणात्मिका यस्येति **सुषेणः** । कनकमयान्यङ्गदानि अस्येति **कनकाङ्गदी** । रहस्योपनिषद्वेद्यत्वाद्गुहायां हृदयाकाशे निहित इति वा **गुह्यः** । ज्ञानैश्वर्यबलवीर्यादिभिर्गम्भीरो **गभीरः** । दुष्प्रवेशत्वात् **गहनः**; अवस्थात्रयभावा-

भावसाक्षित्वात् **गहनो** वा । वाङ्मनसागोचरत्वान् **गुप्तः**, 'एष सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते' इति श्रुतेः । मनस्तत्त्वात्मकं चक्रं बुद्धितत्त्वात्मिकां गदाम् । धारयन् लोकरक्षार्थमुक्तः **चक्रगदाधरः** ॥

वेधाः स्वाङ्गोऽजितः कृष्णो
दृढः संकर्षणोऽच्युतः ।
वरुणो वारुणो वृक्षः
पुष्कराक्षो महामनाः ॥ ७२ ॥

विधाता **वेधाः** । पृषोदरादित्वात्साधुत्वम् । स्वयमेव कार्यकरणे अङ्गं सहकारीति **स्वाङ्गः** । न केनाप्यवतारेषु जित इति **अजितः** । **कृष्णः** कृष्णद्वैपायनः, 'कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुम् । को ह्यन्यः पुण्डरीकाक्षान्महाभारतकृद्भवेत्' इति विष्णुपुराणवचनात् । स्वरूपसामर्थ्यादेः प्रच्युत्यभावात् **दृढः** । संहारसमये युगपत्प्रजाः संकर्षतीति संकर्षणः, न च्योतति स्वरूपादित्यच्युतः, **संकर्षणोऽच्युतः** इति नामैकं सविशेषणम् । स्वरश्मीनां संवरणात्सायंगतः सूर्यो **वरुणः**, 'इमं मे वरुण श्रुधी हवम्' इति मन्त्रवर्णात् । वरुणस्यापत्यं वसिष्ठोऽगस्त्यो वा **वारुणः** ।

वृक्ष इवाचलतया स्थित इति **वृक्षः**, 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकः' इति श्रुतेः । व्याप्त्यर्थादक्षतेर्धातो पुष्करोपपदादण्प्रत्यये **पुष्कराक्षः** ; हृदयपुण्डरीके चिन्तितः. स्वरूपेण प्रकाशत इति वा **पुष्कराक्षः** । सृष्टिस्थित्यन्तकर्माणि मनसैव करोतीति **महामनाः** ; 'मनसैव जगत्सृष्टि संहारं च करोति यः' इति विष्णुपुराणे ॥

भगवान्भगहानन्दी
वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः
सहिष्णुर्गतिसत्तमः ॥ ७३ ॥

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः । वैराग्यस्याथ मोक्षस्य षण्णां भग इतीरणा सोऽस्यास्तीति **भगवान्** । 'उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति' इति विष्णुपुराणे । ऐश्वर्यादिकं संहारसमये हन्तीति **भगहा** । सुखस्वरूपत्वात् **आनन्दी** ; सर्वसपत्समृद्धत्वात् **आनन्दी** वा । भूततन्मात्ररूपां वैजयन्त्याख्यां वनमालां वहन **वनमाली** । हलमायुधमस्येति **हलायुधो** बलभद्राकृतिः । अदित्यां कश्यपाद्वामनरूपेण जात

आदित्यः । ज्योतिषि सवितृमण्डले स्थितो **ज्योतिरादित्यः** । द्वन्द्वानि शीतोष्णादीनि सहत इति **सहिष्णुः** । गतिश्चासौ सत्तमश्चेति **गतिसत्तमः** ॥

सुधन्वा खण्डपरशु-
दारुणो द्रविणप्रदः ।
दिवःस्पृक्सर्वदृग्व्यासो
वाचस्पतिरयोनिजः ॥ ७४ ॥

शोभनमिन्द्रियादिमयं शार्ङ्गं धनुरस्यास्तीति **सुधन्वा** । शत्रूणां खण्डनात् खण्डः परशुरस्य जामदग्न्याकृतेरिति **खण्डपरशुः**; अखण्डः परशुरस्येति वा । सन्मार्गविरोधिनां दारुणत्वात् **दारुणः** । द्रविणं वाञ्छितं भक्तेभ्यः प्रददातीति **द्रविणप्रदः** । दिवः स्पर्शनात् **दिवःस्पृक्** । सर्वदृशां सर्वज्ञानां विस्तारकृद्व्यासः **सर्वदृग्व्यासः** । अथवा, सर्वा च सा दृक्केति **सर्वदृक्** सर्वाकारं ज्ञानम्; सर्वस्य दृष्टित्वाद्वा **सर्वदृक्** । ऋग्वेदादिविभागेन चतुर्धा वेदा व्यस्ताः कृताः, आद्यो वेद एकविंशतिधा कृतः, द्वितीयः एकोत्तरशतधा कृतः, सामवेदः सहस्रधा कृतः, अथर्ववेदो नवधा शाखाभेदेन कृतः । एवम् अन्यानि च पुराणानि व्यस्तान्यनेनेति **व्यासः**

ब्रह्मा । **वाचस्पतिरयोनिजः** ; वाचः विद्यायाः पतिः वाचस्पतिः, जनन्यां न जायत इति अयोनिजः ; इति सविशेषणमेकं **नाम** ॥

त्रिसामा सामगः साम
निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो
निष्ठा शान्तिः परायणम् ॥ ७९ ॥

देवव्रतसमाख्यातैः त्रिभिः सामभिः सामगैः स्तुत इति **त्रिसामा**। साम गायतीति **सामगः**, 'वेदानां सामवेदोऽस्मि' इति भगवद्वचनात् । सामवेदः **साम** । सर्वदुःखोपशमलक्षणं परमानन्दरूपं **निर्वाणम्** । संसाररोगस्यौषधं **भेषजम्** । संसाररोगनिर्मोक्षकारिणीं परां विद्यामुपदिदेश गीतास्विति **भिषक्** , 'भिषक्तमं त्वा भिषजां शृणोमि' इति श्रुतेः । मोक्षार्थं चतुर्थमाश्रमं कृतवानिति **संन्यासकृत्** । संन्यासिनां प्राधान्येन ज्ञानसाधनं शममाचष्ट इति **शमः**, 'यतीनां प्रशमो धर्मो नियमो वनवासिनाम् । दानमेव गृहस्थानां शुश्रूषा ब्रह्मचारिणाम्' इति स्मृतेः । 'तत्करोति तदाचष्टे' इति णिचि पचाद्यचि कृते रूपं शम इति । सर्वभूतानां श-

मयितेति वा **शमः** । विषयसुखेष्वसङ्गतया **शान्तः**, निष्कलं निष्क्रियं शान्तम्' इति श्रुतेः । प्रलये नितरां तत्रैव तिष्ठन्ति भूतानीति **निष्ठा** । समस्ताविद्यानिवृत्तिः **शान्तिः** । सा ब्रह्मैव परमुत्कृष्टमयनं स्थानं पुनरावृत्तिशङ्कारहितमिति **परायणम्** । पुंलिङ्गपक्षे बहुव्रीहिः ॥

शुभाङ्गः शान्तिदः स्रष्टा
कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता
वृषभाक्षो वृषप्रियः ॥ ७६ ॥

सुन्दरां तनुं धारयन् **शुभाङ्गः** । रागद्वेषादिनिर्मोक्षलक्षणां शान्तिं ददातीति **शान्तिदः** । सर्गादौ सर्वभूतानि ससर्जेति **स्रष्टा** । कौ भूम्यां मोदत इति **कुमुदः** । कोः क्षितेर्वलनात् संसरणात् कुवलं जलम्, तस्मिन् शेत इति **कुवलेशयः**; 'शयवासवासिष्वकालात्' इति अलुक् सप्तम्याः; कुवलयस्य बदरीफलस्य मध्ये शेते तक्षकः, सोऽपि तस्य विभूतिरिति वा हरिः **कुवलेशयः**; कौ भूम्यां वलते संश्रयते इति सर्पाणामुदरं कुवलम्, तस्मिन् शेषोदरे शेते इति **कुवलेशयः** । गवां वृद्ध्यर्थं गोवर्धनं धृतवानिति गोभ्यो

हितः **गोहितः**; गोर्भूमेः भारावतरणेच्छया शरीरग्रहणं कुर्वन्वा **गोहितः**। गोर्भूम्याः पतिः **गोपतिः**। रक्षको जगत इति **गोप्ता**। स्वमायया स्वमात्मानं संवृणोतीति वा **गोप्ता**। सकलान् कामान् वर्षुके अक्षिणी अस्येति, वृषभो धर्मः स एव वा दृष्टिरस्येति **वृषभाक्षः**। वृषो धर्मः प्रियो यस्य सः **वृषप्रियः**; 'वा प्रियस्य' इति पूर्वनिपातविकल्प-विधानात् परनिपातः; वृषश्चासौ प्रियश्चेति वा ॥

अनिवर्ती निवृत्तात्मा
संक्षेप्ता क्षेमकृच्छिवः।
श्रीवत्सवक्षाः श्रीवासः
श्रीपतिः श्रीमतां वरः ॥ ७७ ॥

देवासुरसंग्रामान्न निवर्तत इति **अनिवर्ती**; वृषप्रिय-त्वाद्धर्मान्न निवर्तत इति वा। स्वभावतो विषयेभ्यो निवृत्त आत्मा मनः अस्येति **निवृत्तात्मा**। विस्तृतं जगत् संसार-समये सूक्ष्मरूपेण संक्षिपन् **संक्षेप्ता**। उपात्तस्य परिरक्षणं करोतीति **क्षेमकृत्**। स्वनामस्मृतिमात्रेण पावयन् **शिवः** ॥

इति नाम्नां षष्ठं शतं विवृतम् ॥

श्रीवत्ससंज्ञं चिह्नमस्य वक्षसि स्थितमिति **श्रीवत्स-**

वक्षाः । अस्य वक्षसि श्रीरनपायिनी वसतीति **श्रीवासः** । अमृतमथने सर्वान् सुरासुरादीन् विहाय श्रीरेनं पतित्वेन वरयामासेति **श्रीपतिः** । श्रीः परा शक्तिः, तस्याः पतिरिति वा, 'परास्य शक्तिर्विविधैव श्रूयते' इति श्रुतेः । ऋग्यजुःसामलक्षणा श्रीर्येषां तेषां सर्वेषां श्रीमतां विरिञ्चयादीनां प्रधानभूतः **श्रीमतां वरः**, 'ऋचः सामानि यजूंषि । सा हि श्रीरमृता सताम्' इति श्रुतेः ॥

श्रीदः श्रीशः श्रीनिवासः
श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः
श्रीमाँल्लोकत्रयाश्रयः ॥ ७८ ॥

श्रियं ददाति भक्तानामिति **श्रीदः** । श्रिय ईशः **श्रीशः** । श्रीमत्सु नित्यं वसतीति **श्रीनिवासः** । श्रीशब्देन श्रीमन्तो लक्ष्यन्ते । सर्वशक्तिमये अस्मिन् अखिलाः श्रियो निधीयन्ते इति **श्रीनिधिः** । कर्मानुरूपेण विविधाः श्रियः सर्वभूतानां विभावयतीति **श्रीविभावनः** । सर्वभूतानां जननीं श्रियं वक्षसि वहन् **श्रीधरः** । स्मरतां स्तुवताम् अर्चयतां च भक्तानां श्रियं करोतीति **श्रीकरः** । अनपायिसुखावा-

त्रिलक्षणं श्रेयः, तच्च परस्यैव रूपमिति **श्रेयः** । श्रियोऽस्य सन्तीति **श्रीमान्** । त्रयाणां लोकानाम् आश्रयत्वान् **लोकत्रयाश्रयः** ॥

स्वक्षः स्वङ्गः शतानन्दो
नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्माविधेयात्मा
सत्कीर्तिरिच्छिन्नसंशयः ॥ ७९ ॥

शोभने पुण्डरीकाभे अक्षिणी अस्येति **स्वक्षः** । शोभनान्यङ्गानि अस्येति **स्वङ्गः** । एक एव परमानन्द उपाधिभेदाच्छतधा भिद्यत इति **शतानन्दः** 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुतेः । परमानन्दविग्रहो **नन्दिः** । ज्योतिर्गणानामीश्वरः **ज्योतिर्गणेश्वरः** । 'तमेव भान्तमनुभाति सर्वम्' इति श्रुतेः, 'यदादित्यगतं तेजः' इत्यादिस्मृतेश्च । विजित आत्मा मनः येन सः **विजितात्मा** । न केनापि विधेयः आत्मा स्वरूपमस्येति **अविधेयात्मा** । सती अवितथा कीर्तिरस्येति **सत्कीर्तिः** । करतलामलकवत्सर्वं साक्षात्कृतवतः क्वापि संशयो नास्तीति **छिन्नसंशयः** ॥

उदीर्णः सर्वतश्चक्षु-
रनीशः शाश्वतस्थिरः ।
भूशयो भूषणो भूति-
र्विशोकः शोकनाशनः ॥ ८० ॥

सर्वभूतेभ्यः समुद्रिक्तत्वात् **उदीर्णः** । सर्वतः सर्वं स्वचैतन्येन पश्यतीति **सर्वतश्चक्षुः**, 'विश्वतश्चक्षुः' इति श्रुतेः । न विद्यतेऽस्येश इति **अनीशः**, 'न तस्येशे कश्चन' इति श्रुतेः । शश्वद्भवन्नपि न विक्रियां कदाचिदुपैति इति **शाश्वतस्थिरः** इति नामैकम् । लङ्कां प्रति मार्गमन्वेषयन् सागरं प्रति भूमौ शेते इति **भूशयः** । स्वेच्छावतारैः बहुभिः भूमिं भूषयन् **भूषणः** । **भूतिः** भवनं सत्ता, विभूतिर्वा ; सर्वविभूतीनां कारणत्वाद्वा **भूतिः** । विगतः शोकोऽस्य परमानन्दैकरूपत्वादिति **विशोकः** । स्मृतिमात्रेण भक्तानां शोकं नाशयतीति **शोकनाशनः** ॥

अर्चिष्मानर्चितः कुम्भो
विशुद्धात्मा विशोधनः ।

अनिरुद्धोऽप्रतिरथः
प्रद्युम्नोऽमितविक्रमः ॥ ८१ ॥

अर्चिष्मन्तो यदीयेनार्चिषा चन्द्रसूर्यादयः, स एव मुख्यः **अर्चिष्मान्** । सर्वलोकार्चितैः विरिञ्च्यादिभिरप्यर्चितः इति **अर्चितः** । कुम्भवदस्मिन् सर्वं प्रतिष्ठितमिति **कुम्भः** । गुणत्रयातीततया विशुद्धश्चासावात्मेति **विशुद्धात्मा** । स्मृतिमात्रेण पापानां क्षपणात् **विशोधनः** । चतुर्व्यूहेषु चतुर्थो व्यूहः **अनिरुद्धः**; न निरुध्यते शत्रुभिः कदाचिदिति वा । प्रतिरथः प्रतिपक्षोऽस्य न विद्यत इति **अप्रतिरथः** । प्रकृष्टं द्रविणं द्युम्नमस्येति **प्रद्युम्नः**; चतुर्व्यूहात्मा वा । अमितोऽतुलितो विक्रमोऽस्य इति **अमितविक्रमः**, अहिंसितविक्रमो वा ॥

कालनेमिनिहा वीरः
शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः
केशवः केशिहा हरिः ॥ ८२ ॥

कालनेमिमसुरं निजघानेति **कालनेमिनिहा** । **वीरः शूरः** । शूरकुलोद्भवत्वात **शौरिः** । शूरजनानां वासवादीनां

शौर्यातिशयेनेष्टे इति **शूरजनेश्वरः**। त्रयाणां लोकानाम् अन्तर्यामितया आत्मेति, त्रयो लोका अस्मात्परमार्थतो न भिद्यन्ते इति वा **त्रिलोकात्मा**। त्रयो लोकाः तदाज्ञप्ताः स्वेषु स्वेषु कर्मसु वर्तन्त इति **त्रिलोकेशः**। केशसंज्ञिताः सूर्यादिसंकान्ता अंशवः, तद्वत्तया **केशवः**; 'अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः। सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमाः' इति महाभारते। ब्रह्मविष्णुशिवाख्याः शक्तयः केशसंज्ञिताः; तद्वत्तया वा **केशवः**। 'त्रयः केशिनः' इति श्रुतेः। 'मत्केशौ वसुधातले' इति केशशब्दः शक्तिपर्यायत्वेन प्रयुक्तः। 'को ब्रह्मेति समाख्यात ईशोऽहं सर्वदेहिनाम्। आवां तवांशसंभूतौ तस्मात्केशवनामवान्' इति हरिवंशे। केशिनामानमसुरं हतवानिति **केशिहा**। सहेतुकं संसारं हरतीति **हरिः**॥

कामदेवः कामपालः
कामी कान्तः कृतागमः।
अनिर्देश्यवपुर्विष्णु-
र्वीरोऽनन्तो धनंजयः॥ ८३॥

धर्मादिपुरुषार्थचतुष्टयं वाञ्छद्भिः काम्यत इति कामः;

स चासौ देवश्चेति **कामदेवः** । कामिनां कामान् पालयतीति **कामपालः** । पूर्णकामस्वभावत्वात् **कामी** । अभिरूपतमं देहं वहन् **कान्तः** । द्विपरार्धान्ते कस्य ब्रह्मणोऽप्यन्तोऽस्मादिति वा **कान्तः** । कृतः आगमः श्रुतिस्मृत्यादिलक्षणो येन सः **कृतागमः**, 'श्रुतिस्मृती ममैवाज्ञे' इति भगवद्वचनात्, 'वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्' इत्यत्रैव वक्ष्यति । इदं तदीदृशं वेति निर्देष्टुं यन्न शक्यते गुणाद्यतीतत्वात् तदेव रूपमस्येति **अनिर्देश्यवपुः** । रोदसी व्याप्य कान्तिरभ्यधिका स्थितास्येति **विष्णुः**; 'व्याप्य मे रोदसी नाथ कान्तिरभ्यधिका स्थिता । क्रमणाद्व्याप्यहं पार्थ विष्णुरित्यभिसंज्ञितः' इति महाभारते । गत्यादिमत्त्वात् वीरः, 'वी गतिप्रजनकान्त्यसनखादनेषु' इति धातुपाठात् । व्यापित्वान्नित्यत्वात्सर्वात्मत्वाद्देशतः कालतो वस्तुतश्चापरिच्छिन्नः **अनन्तः**, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः ; 'गन्धर्वाप्सरसः सिद्धाः किंनरोरगचारणाः । नान्तं गुणानां गच्छन्ति तेनानन्तोऽयमव्ययः' इति विष्णुपुराणवचनाद्वा **अनन्तः** । यद्दिग्विजये प्रभूतं धनमजयत्तेन **धनंजयः** अर्जुनः, 'पाण्डवानां धनंजयः' इति भगवद्वचनात् ॥

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा
ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी
ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ८४ ॥

'तपो वेदाश्च विप्राश्च ज्ञानं च ब्रह्मसंज्ञितम्' तेभ्यो हितत्वात् **ब्रह्मण्यः** । तपआदीनां कर्तृत्वात् **ब्रह्मकृत्** । ब्रह्मात्मना सर्वं सृजतीति **ब्रह्मा** । बृहत्त्वाद्बृंहणत्वाच्च सत्यादिलक्षणं **ब्रह्म**, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः; 'प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् । वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम्' इति विष्णुपुराणे । तपआदीनां विवर्धनात् **ब्रह्मविवर्धनः** । वेदं वेदार्थं च यथावद्वेत्तीति **ब्रह्मवित्** । ब्राह्मणात्मना समस्तानां लोकानां प्रवचनं कुर्वन् वेदख्यायमिति **ब्राह्मणः** । ब्रह्मसंज्ञितास्तच्छेषभूता इति **ब्रह्मी** । वेदान् स्वात्मभूतान् जानातीति **ब्रह्मज्ञः** । ब्राह्मणानां प्रियो **ब्राह्मणप्रियः**; ब्राह्मणाः प्रिया अस्येति वा । 'ब्रन्तं शपन्तं परुषं वदन्तं यो ब्राह्मणं न प्रणमेद्यथार्हम् । स पापकृद्ब्रह्मदवाग्निदग्धो वध्यश्च दण्ड्यश्च न चास्मदीयः' इति भगवद्वचनात् । 'यं देवं देवकी देवी वसुदेवादजीजनत् ।

भौमस्य ब्रह्मणो गुप्त्यै दीप्तमग्निमिवारणिः' इति च महाभारते ॥

महाक्रमो महाकर्मा
महातेजा महोरगः ।
महाक्रतुर्महायज्वा
महायज्ञो महाहविः ॥ ८५ ॥

महान्तः क्रमाः पादविक्षेपा अस्येति **महाक्रमः**, 'शं नो विष्णुरुरुक्रमः' इति श्रुतेः । महत् जगदुत्पत्त्यादि कर्मास्येति **महाकर्मा** । यदीयेन तेजसा तेजस्विनो भास्करादयः तत्तेजो महदस्येति **महातेजाः**, 'येन सूर्यस्तपति तेजसेद्धः' इति श्रुतेः, 'यदादित्यगतं तेजः' इति भगवद्वचनाच्च । कौर्यशौर्यादिभिर्धर्मैर्महद्भिः समलंकृत इति वा **महातेजाः** । महांश्चासावुरगश्चेति **महोरगः**, 'सर्पाणामस्मि वासुकिः' इति भगवद्वचनात् । महांश्चासौ क्रतुश्चेति **महाक्रतुः**, 'यथाश्वमेधः क्रतुराट्' इति मनुवचनात्; सोऽपि स एवेति स्तुतिः । महांश्चासौ यज्वा चेति लोकसंग्रहार्थं यज्ञान् निर्वर्तयन् **महायज्वा** । महांश्चासौ यज्ञश्चेति **महायज्ञः**, 'यज्ञानां जपयज्ञोऽस्मि' इति भगवद्वचनात् । महच्च तद्धविश्चेति ब्रह्म

त्मनि सर्वं जगत्तदात्मतया हूयत इति **महाहविः** । महाक्रतु-रित्यादयो बहुव्रीहयो वा ॥

स्तव्यः स्तवप्रियः स्तोत्रं
स्तुतिः स्तोता रणप्रियः ।
पूर्णः पूरयिता पुण्यः
पुण्यकीर्तिरनामयः ॥ ८६ ॥

सर्वैः स्तूयते न स्तोता कस्यचित् इति **स्तव्यः** । अत एव **स्तवप्रियः** । येन स्तूयते तत् **स्तोत्रम्**, गुणसंकीर्तनात्मकं तद्धरिरेवेति । **स्तुतिः** स्तवनक्रिया । **स्तोता** अपि स एव । प्रियो रणः यस्य यतः पञ्च महायुधानि धत्ते सततं लोकरक्षणार्थम् अतो **रणप्रियः** । सकलैः कामैः सकलाभिः शक्तिभिश्च संपन्न इति **पूर्णः** । न केवलं पूर्ण एव; **पूरयिता** च सर्वेषां संपद्भिः । स्मृतिमात्रेण कल्मषाणि क्षपयतीति **पुण्यः** । पुण्या कीर्तिरस्य यतः पुण्यमावहत्यस्य कीर्तिः नृणामिति **पुण्यकीर्तिः** । आन्तरैर्बाह्यैर्व्याधिभिः कर्मजैर्न पीड्यत इति **अनामयः** ॥

मनोजवस्तीर्थकरो
वसुरेता वसुप्रदः ।

वसुप्रदो वासुदेवो
वसुर्वसुमना हविः ॥ ८७ ॥

मनसो वेग इव वेगोऽस्य सर्वगतत्वात् **मनोजवः** । चतुर्दशविद्यानां बाह्यविद्यासमयानां च प्रणेता प्रवक्ता चेति **तीर्थकरः** । हयग्रीवरूपेण मधुकैटभौ हत्वा विरिञ्चाय सर्गादौ सर्वाः श्रुतीरन्याश्च विद्या उपदिशन् वेदबाह्या विद्याः सुरवैरिणां वञ्चनाय चोपदिदेशेति पौराणिका कथयन्ति । वसु सुवर्णं रेतोऽस्येति **वसुरेताः**, 'देवः पूर्वमपः सृष्ट्वा तासु वीर्यमपासृजत् । तदण्डमभवद्धैमं ब्रह्मणः कारणं परम्' इति व्यासवचनात् । वसु धनं प्रकर्षेण ददाति साक्षाद्धनाध्यक्षोऽयम्, इतरस्तु तत्प्रसादाद्धनाध्यक्ष इति **वसुप्रदः** । वसु प्रकृष्टं मोक्षाख्यं फलं भक्तेभ्यः प्रददातीति द्वितीयो **वसुप्रदः**, 'विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं तिष्ठमानस्य तद्विदः' इति श्रुतेः; सुरारीणां वसूनि प्रकर्षेण खण्डयन् वा **वसुप्रदः** । वसुदेवस्यापत्यं **वासुदेवः** । वसन्ति भूतानि तत्र, तेष्वयमपि वसतीति **वसुः** । अविशेषेण सर्वेषु विषयेषु वसतीति वसु, तादृशं मनोऽस्येति **वसुमनाः** । 'ब्रह्मार्पणं ब्रह्म हविः' इति भगवद्वचनात् **हविः** ॥

सद्गतिः सत्कृतिः सत्ता
सद्भूतिः सत्परायणः ।
शूरसेनो यदुश्रेष्ठः
सन्निवासः सुयामुनः ॥ ८८ ॥

'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति श्रुतेः ब्रह्मास्तीति ये विदुस्ते सन्तः, तैः प्राप्यत इति **सद्गतिः** ; सती गतिर्बुद्धिः समुत्कृष्टा अस्येति वा **सद्गतिः** । सती कृतिः जगद्रक्षणलक्षणा अस्य यस्मात्तेन **सत्कृतिः** ।

इति नाम्नां सप्तमं शतं विवृतम् ॥

सजातीयविजातीयस्वगतभेदरहिता अनुभूतिः **सत्ता**, 'एकमेवाद्वितीयम्' इति श्रुतेः । सन्नेव परमात्मा चिदात्मकः अबाधात् भासमानत्वाच्च **सद्भूतिः**; नान्यः प्रतीतेः बाध्यमानत्वाच्च न सन्नाप्यसन् । श्रौतो यौक्तिको वा बाधः प्रपञ्चस्य विवक्षितः । सतां तत्त्वविदां परं प्रकृष्टमयनमिति **सत्परायणम्** । हनूमत्प्रमुखाः सैनिकाः शौर्यशालिनो यस्यां सेनायाम्, सा शूरसेना यस्य स **शूरसेनः** । यदूनां प्रधानत्वात् **यदुश्रेष्ठः** । सतां विदुषामाश्रयः **सन्निवासः** । शोभना यामुनाः यमुनासंबन्धिनः देवकीवसुदेवनन्दयशोदाबलभद्र-

सुभद्रादय. परिवेष्टारोऽस्येति **सुयामुनः**; गोपवेषधरा यामुनाः परिवेष्टारः पद्मासनादयः शोभना अस्येति वा **सुयामुनः** ॥

भूतावासो वासुदेवः
सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो
दुर्धरोऽथापराजितः ॥ ८९ ॥

भूतान्यत्राभिमुख्येन वसन्तीति **भूतावासः**, 'वसन्ति त्वयि भूतानि भूतावासस्ततो भवान्' इति हरिवंशे । जगदाच्छादयति माययेति वासुः, स एव देव इति **वासुदेवः**; 'छादयामि जगद्विश्वं भूत्वा सूर्य इवांशुभिः' इति भगवद्वचनात् । सर्व एवासवः प्राणा जीवात्मके यस्मिन्नाश्रये निलीयन्ते **सर्वासुनिलयः** । अलं पर्याप्तिः शक्तिसंपदां नास्य विद्यत इति **अनलः** । धर्मविरुद्धे पथि तिष्ठतां दर्पं हन्तीति **दर्पहा** । धर्मवर्त्मनि वर्तमानानां दर्पं ददातीति **दर्पदः** । स्वात्मामृतरसास्वादनात् नित्यप्रमुदितो **दृप्तः** । न शक्या धारणा यस्य प्रणिधानादिषु सर्वोपाधिविनिर्मुक्तत्वात्, तथापि तत्प्रसादतः कैश्चिदुःखेन धार्यते

हृदये जन्मान्तरसहस्रेषु भावनायोगात्, तस्मात् **दुर्धरः**। 'क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते' इति भगवद्वचनात्। न आन्तरैः रागादिभिर्बाह्यैरपि दानवादिभिः शत्रुभिः पराजित इति **अपराजितः** ॥

विश्वमूर्तिर्महामूर्ति-
र्दीप्तमूर्तिरमूर्तिमान्।
अनेकमूर्तिरव्यक्तः
शतमूर्तिः शताननः ॥ ९० ॥

विश्वं मूर्तिरस्य सर्वात्मकत्वात् इति **विश्वमूर्तिः**। शेषपर्यङ्कशायिनोऽस्य महती मूर्तिरिति **महामूर्तिः**। दीप्ता ज्ञानमयी मूर्तिः यस्येति, स्वेच्छया गृहीता तैजसी मूर्तिः दीप्ता अस्येति वा **दीप्तमूर्तिः**। कर्मनिबन्धना मूर्तिरस्य न विद्यत इति **अमूर्तिमान्**। अवतारेषु स्वेच्छया लोकानामुपकारिणीः बह्वीर्मूर्तीर्भजत इति **अनेकमूर्तिः**। यद्यप्यनेकमूर्तित्वमस्य, तथाप्ययमीदृश एवेति न व्यज्यत इति **अव्यक्तः**। नानाविकल्पजा मूर्तयः संविदाकृतेः सन्तीति **शतमूर्तिः**। विश्वादिमूर्तित्वं यतः अत एव **शताननः** ॥

एको नैकः सवः कः किं
यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो
माधवो भक्तवत्सलः ॥ ९१ ॥

परमार्थतः सजातीयविजातीयस्वगतभेदविनिर्मुक्तत्वात् **एकः**, 'एकमेवाद्वितीयम्' इति श्रुतेः । मायया बहूरूपत्वात् **नैकः**, 'इन्द्रो मायाभिः पुरुरूप ईयते' इति श्रुतेः । सोमो यत्राभिषूयते सोऽध्वरः **सवः** । कशब्दः सुखवाचकः, तेन स्तूयत इति **कः**, 'कं ब्रह्म' इति श्रुतेः । सर्वपुरुषार्थरूपत्वाद्ब्रह्मैव विचार्यमिति ब्रह्म **किम्** । यच्छब्देन स्वतःसिद्धवस्तूद्देशवाचिना ब्रह्म निर्दिश्यते इति ब्रह्म **यत्**, 'यतो वा इमानि भूतानि जायन्ते' इति श्रुतेः । तनोतीति ब्रह्म **तत्**, 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति भगवद्वचनात् । पद्यते गम्यते मुमुक्षुभिरिति पदम् । यस्मादुत्कृष्टं नास्ति तत् अनुत्तमम् । सविशेषणमेकं नाम **पदमनुत्तमम्** इति । आधारभूतेऽस्मिन्सकला लोका बध्यन्त इति लोकानां बन्धुः **लोकबन्धुः** ; लोकानां जनकत्वाज्जनकोपमो बन्धुर्नास्तीति वा, लोकानां बन्धुकृत्यं हिता-

हितोपदेशं श्रुतिस्मृतिलक्षणं कृतवानिति वा **लोकबन्धुः** । लोकैर्नाथ्यते याच्यते लोकानुपतपति आशास्ते लोकानामीष्टे इति वा **लोकनाथः** । मधुकुले जातत्वात् **माधवः** । भक्तस्नेहवान् **भक्तवत्सलः** ।

सुवर्णवर्णो हेमाङ्गो
वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो
घृताशीरचलश्चलः ॥ ९२ ॥

सुवर्णस्येव वर्णोऽस्येति **सुवर्णवर्णः**, 'यदा पश्यः पश्यते रुक्मवर्णम्' इति श्रुतेः । हेमेवाङ्गं वपुरस्येति **हेमाङ्गः**, 'य एंषोऽन्तरादित्ये हिरण्मयः पुरुषः' इति श्रुतेः । वराणि शोभनान्यङ्गान्यस्येति **वराङ्गः** । चन्दनैराह्लादनैरङ्गदैः केयूरैर्भूषित इति **चन्दनाङ्गदी** । धर्मत्राणाय वीरान् असुरमुख्यान् हन्तीति **वीरहा** । समो नास्य विद्यते सर्वविलक्षणत्वादिति **विषमः**, 'न त्वत्समोऽस्त्यभ्यधिकः कुतोऽन्यः' इति भगवद्वचनात् । सर्वविशेषरहितत्वात् शून्यवत् **शून्यः** । घृताः विगलिताः आशिषः प्रार्थनाः अस्येति **घृताशीः** । न स्वरूपान्न सामर्थ्यान्न च ज्ञानादिकाद्गुणात् । चलनं विद्यतेऽस्येति

अचलः । वायुरूपेण चलतीति **चलः** ॥

अमानी मानदो मान्यो
लोकस्वामी त्रिलोकधृक् ।
सुमेधा मेधजो धन्यः
सत्यमेधा धराधरः ॥ ९३ ॥

अनात्मवस्तुष्वात्माभिमानो नास्त्यस्य स्वच्छसंवेदनाकृतेरिति **अमानी** । स्वमायया सर्वेषामनात्मस्वात्माभिमानं ददाति, भक्तानां सत्कारं मानं ददातीति, तत्त्वविदामनात्मस्वात्माभिमानं खण्डयतीति वा **मानदः** । सर्वैर्माननीयः पूजनीयः सर्वेश्वरत्वात् इति **मान्यः** । चतुर्दशानां लोकानामीश्वरत्वात् **लोकस्वामी** । त्रीन् लोकान धारयतीति **त्रिलोकधृक्** । शोभना मेधा प्रज्ञास्येति **सुमेधाः** । 'नित्यमसिच्प्रजामेधयोः' इति समासान्तोऽसिच् । मेधेऽध्वरे जायत इति **मेधजः** । कृतार्थो **धन्यः** । सत्या अवितथा मेधा अस्येति **सत्यमेधाः** । अंशैरशेषैः शेषाद्यैरशेषां धरां धारयन् **धराधरः** ॥

तेजोवृषो द्युतिधरः
सर्वशस्त्रभृतां वरः ।

प्रग्रहो निग्रहो व्यग्रो
नैकशृङ्गो गदाग्रजः ॥ ९४ ॥

तेजसामम्भसां सर्वदा आदित्यरूपेण वर्षणात् **तेजोवृषः**। द्युतिमङ्गगतां कान्तिं धारयन् **द्युतिधरः**। सर्वशस्त्रभृतां श्रेष्ठः **सर्वशस्त्रभृतां वरः**। भक्तैरुपहृतं पत्रपुष्पादिकं प्रगृह्णातीति **प्रग्रहः**, धावतो विषयारण्ये दुर्दान्तेन्द्रियवाजिनः तत्प्रसादेन रश्मिनेव बध्नातीति वा प्रग्रहवत् **प्रग्रहः**; 'रश्मौ च' इति पाणिनिवचनात् प्रग्रहशब्दस्य साधुत्वम्। स्ववशेन सर्वं निगृह्णातीति **निग्रहः**। विगतमग्रमन्तो विनाशोऽस्येति **व्यग्रः**; भक्तानामभीष्टप्रदानेषु **व्यग्रः** इति वा। चतुःशृङ्गो **नैकशृङ्गः**, 'चत्वारि शृङ्गा' इति मन्त्रवर्णात्। निगदेन मन्त्रेणाग्रे जायते इति निशब्दलोपं कृत्वा **गदाग्रजः**; यद्वा गदो नाम श्रीवासुदेवावरजः; तस्मादग्रे जायत इति **गदाग्रजः** ॥

चतुर्मूर्तिश्चतुर्बाहु-
श्चतुर्व्यूहश्चतुर्गतिः।
चतुरात्मा चतुर्भाव-
श्चतुर्वेदविदेकपात् ॥ ९५ ॥

चतस्रो मूर्तयो विराट्सूत्राव्याकृततुरीयात्मानोऽस्येति **चतुर्मूर्तिः**; सिता रक्ता पीता कृष्णा चेति चतस्रो मूर्तयोऽस्येति वा । चत्वारो बाहवोऽस्येति **चतुर्बाहुः** इति नाम वासुदेवे रूढम् । 'शरीरपुरुषश्छन्दःपुरुषो वेदपुरुषो महापुरुष.' इति बह्वृचोपनिषदुक्ताश्चत्वारः पुरुषा व्यूहा अस्येति **चतुर्व्यूहः** । आश्रमाणां वर्णानां चतुर्णां यथोक्तकारिणां गतिः **चतुर्गतिः** । रागद्वेषादिरहितत्वात् चतुरः आत्मा मनोऽस्येति, मनोबुद्ध्यहंकारचित्ताख्यान्तःकरणचतुष्टयात्मकत्वाद्वा **चतुरात्मा** । धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टयं भवत्युत्पद्यते अस्मादिति **चतुर्भावः** । यथावद्वेत्ति चतुर्णां वेदानामर्थमिति **चतुर्वेदवित्** । एकः पादोऽस्येति **एकपात्**; 'पादोऽस्य विश्वा भूतानि' इति श्रुतेः, 'विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्' इति भगवद्वचनाच्च ॥

समावर्तोऽनिवृत्तात्मा
दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो
दुरावासो दुरारिहा ॥ २६ ॥

संसारचक्रस्य सम्यगावर्तक इति **समावर्तः** । सर्वत्र

वर्तमानत्वात् न निवर्तते आत्मा विषयेभ्योऽस्येति **अनिवृत्तात्मा**। जेतुं न शक्यत इति **दुर्जयः**। भयहेतुत्वादस्याज्ञां सूर्यादयो नातिक्रामन्तीति **दुरतिक्रमः**, 'भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः' इति मन्त्रवर्णात्, 'महद्भयं वज्रमुद्यतम्' इति च। दुर्लभया भक्त्या लभ्यत्वात् **दुर्लभः**, 'जन्मान्तरसहस्रेषु तपोज्ञानसमाधिभिः। नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते' इति व्यासवचनात्, 'भक्त्या लभ्यस्त्वनन्यया' इति भगवद्वचनाच्च। दुःखेन गम्यते ज्ञायत इति **दुर्गमः**। अन्तरायप्रतिहतैर्दुःखादवाप्यत इति **दुर्गः**। दुःखेनावास्यते चित्ते योगिभिः समाधाविति **दुरावासः**। दुरारिणो दानवादयः तान् हन्तीति **दुरारिहा** ॥

शुभाङ्गो लोकसारङ्गः
सुतन्तुस्तन्तुवर्धनः।
इन्द्रकर्मा महाकर्मा
कृतकर्मा कृतागमः ॥ १७ ॥

शोभनैरङ्गैः ध्येयत्वात् **शुभाङ्गः**। लोकानां सारं सारङ्गवत् भृङ्गवद्गृह्णातीति **लोकसारङ्गः**, 'प्रजापतिर्लोकानभ्य-

तपन्' इति श्रुते.; लोकसारः प्रणवः, तेन प्रतिपत्तव्य इति वा; पृषोदरादित्वात्साधुत्वम् । शोभनस्तन्तुर्विस्तीर्णः प्रपञ्चोऽस्येति **सुतन्तुः** । तमेव तन्तुं वर्धयति च्छेदयतीति वा **तन्तुवर्धनः** । इन्द्रस्य कर्मेव कर्मास्येति **इन्द्रकर्मा**, ऐश्वर्यकर्मेत्यर्थः । महान्ति वियदादीनि भूतानि कर्माणि कार्याण्यस्येति **महाकर्मा** । कृतमेव सर्वं कृतार्थत्वात्, न कर्तव्यं किंचिदपि कर्मास्य विद्यत इति **कृतकर्मा**; धर्मात्मकं कर्म कृतवानिति वा । कृतः वेदात्मक आगमो येनेति **कृतागमः**, 'अस्य महतो भूतस्य नि.श्वसितमेतत्' इत्यादिश्रुतेः ॥

उद्भवः सुन्दरः सुन्दो
रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी
जयन्तः सर्वविज्जयी ॥ ९८ ॥

उत्कृष्टं भवं जन्म स्वेच्छया भजति इति, उद्गतमपगतं जन्मास्य सर्वकारणत्वादिति वा **उद्भवः** । विश्वातिशायिसौभाग्यशालित्वात् **सुन्दरः** । सुष्ठु उनत्तीति **सुन्दः**, उदी क्लेदने इत्यस्य धातोः पचाद्यच्; आर्द्रीभावस्य वाचकः करुणाकर इत्यर्थः; पृषोदरादित्वात्पररूपत्वम् । रत्नशब्देन शोभा ल-

क्ष्यते; रत्नवत्सुन्दरा नाभिरस्येति **रत्ननाभः**। शोभनं लोचनं नयनं ज्ञानं वा अस्येति **सुलोचनः**। ब्रह्मादिभिः पूज्यतमैरपि अर्चनीयत्वात् **अर्कः**। वाजमन्नमर्थिनां सनोति ददातीति **वाजसनः**। प्रलयाम्भसि शृङ्गवन्मत्स्यविशेषरूपः शृङ्गी; मत्वर्थीयोऽतिशायने इनिप्रत्ययः। अरीन् अतिशयेन जयति, जयहेतुर्वा **जयन्तः**। सर्वविषयं ज्ञानमस्येति सर्ववित्; आभ्यन्तरान् रागादीन् बाह्यान् हिरण्याक्षादींश्च दुर्जयान् जेतुं शीलमस्येति जयी; तच्छीलाधिकारे 'जिदृक्षि' इत्यादिपाणिनीयवचनात् इनिप्रत्ययः; सर्वविच्चासौ जयी चेति **सर्वविज्जयी** इत्येकं नाम ॥

सुवर्णबिन्दुरक्षोभ्यः
सर्ववागीश्वरेश्वरः।
महाह्रदो महागर्तो
महाभूतो महानिधिः ॥ ९९ ॥

बिन्दवोऽवयवाः सुवर्णसदृशा अस्येति **सुवर्णबिन्दुः**, 'आप्रणखात्सर्व एव सुवर्णः' इति श्रुतेः; शोभनो वर्णोऽक्षरं बिन्दुश्च यस्मिन्मन्त्रे तन्मन्त्रात्मा वा **सुवर्णबिन्दुः** ॥

इति नाम्नामष्टमं शतं विवृतम् ॥

रागद्वेषादिभिः शब्दादिविषयैश्च त्रिदशारिभिश्च न क्षोभ्यत इति **अक्षोभ्यः** । सर्वेषां वागीश्वराणां ब्रह्मादीनामपीश्वरः **सर्ववागीश्वरेश्वरः** । अवगाह्य तदानन्दं विश्रम्य सुखमासते योगिन इति महाह्रद इव **महाह्रदः** । गर्तवदस्य माया महती दुरत्ययेति **महागर्तः**, 'मम माया दुरत्यया' इति भगवद्वचनात् ; यद्वा, गर्तशब्दो रथपर्यायो नैरुक्तैरुक्तः, तस्मान्महारथो **महागर्तः** ; महारथत्वमस्य प्रसिद्धं भारतादिषु । कालत्रयानवच्छिन्नस्वरूपत्वात् **महाभूतः** । सर्वभूतानि अस्मिन्निधीयन्ते इति निधिः, महांश्चासौ निधिश्चेति **महानिधिः** ॥

कुमुदः कुन्दरः कुंदः
पर्जन्यः पावनोऽनिलः ।
अमृताशोऽमृतवपुः
सर्वज्ञः सर्वतोमुखः ॥ १०० ॥

कुं धरणिं भारावतरणं कुर्वन् मोदयतीति **कुमुदः** । मुदिरत्रान्तर्भावितणिजर्थः । कुन्दपुष्पतुल्यानि शुद्धानि फलानि राति ददाति, लात्यादत्ते इति वा **कुन्दरः**, रलयोर्वृत्त्येकत्वस्मरणात् ; 'कुं धरां दारयामास हिरण्याक्षजिघांसया । वाराहं रूपमास्थाय' इति वा **कुन्दरः** । कुन्दोपमसुन्दराङ्गत्वात्

स्वच्छतया स्फटिकनिर्मलः **कुन्दः**; कुं पृथ्वीं कश्यपाया-दादिति वा **कुंदः**; 'सर्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान्। तस्मिन्यज्ञे महादाने दक्षिणां भृगुनन्दनः॥ मारीचाय ददौ प्रीतः कश्यपाय वसुंधराम्' इति हरिवंशे; कुं पृथ्वीं द्यति खण्डयतीति वा **कुंदः**। कुशब्देन पृथ्वीश्वरा लक्ष्यन्ते;

निःक्षत्रियां यश्च चकार मेदिनी-
मनेकशो बाहुवनं तथाच्छिनत्।
यः कार्तवीर्यस्य स भार्गवोत्तमो
ममास्तु माङ्गल्यविवृद्धये हरिः॥

इति विष्णुधर्मे।

पर्जन्यवदाध्यात्मिकादितापत्रयं शमयति, सर्वान्कामा-नभिवर्षतीति वा **पर्जन्यः**। स्मृतिमात्रेण पुनातीति **पावनः**। इलति प्रेरणं करोतीति इलः, तद्रहितत्वात् **अनिलः**; इलति स्वपिति इत्यज्ञ इलः, तद्विपरीतः नित्यप्रबुद्धस्वरू-पत्वादिति वा; अथवा निलतेर्गहनार्थात्कप्रत्ययान्तादूपम्; अगहनः **अनिलः**, भक्तेभ्यः सुलभः इति। स्वात्मामृत-मश्नातीति **अमृताशः**। मथितममृतं सुरान् पाययित्वा स्वयं चाश्नातीति वा **अमृताशः**; अमृता अनश्वरफलत्वा-

दाशा वाञ्छा अस्येति वा । मृतं मरणम् , तद्रहितं वपुरस्येति **अमृतवपुः** । सर्वं जानातीति **सर्वज्ञः** । 'यः सर्वज्ञः सर्ववित्' इति श्रुतेः । 'सर्वतोक्षिशिरोमुखम्' इति भगवद्वचनात् **सर्वतोमुखः** ॥

सुलभः सुव्रतः सिद्धः
शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थ-
श्चाणूरान्ध्रनिषूदनः ॥ १०१ ॥

पत्रपुष्पफलादिभिः भक्तिमात्रसमर्पितैः सुखेन लभ्यत इति **सुलभः** । 'पत्रेषु पुष्पेषु फलेषु तोयेष्वकृतलभ्येषु सदैव सत्सु । भक्त्येकलभ्ये पुरुषे पुराणे मुक्त्यै कथं न क्रियते प्रयत्नः' इति महाभारते । शोभनं व्रतयति भुङ्क्ते भोजनान्निवर्तत इति वा **सुव्रतः** । अनन्याधीनसिद्धित्वात् **सिद्धः** । सुरशत्रव एवास्य शत्रवः ; तान् जयतीति **शत्रुजित्** । सुरशत्रूणां तापनः **शत्रुतापनः** । न्यक् अर्वाक् रोहति सर्वेषामुपरि वर्तत इति **न्यग्रोधः** ; पृषोदरादित्वात् हकारस्य धकारादेशः ; सर्वाणि भूतानि न्यक्कृत्य निजमायां वृणोति निरुणद्धीति वा । अम्बरादुद्गतः कारणत्वेनेति

उदुम्बरः; पृषोदरादित्वादेवोकारादेशः; यद्वा. उदुम्बरमन्नाद्यम्; तेन तदात्मना विश्वं पोषयन् **उदुम्बरः**, 'ऊर्ग्वा अन्नाद्यमुदुम्बरम्' इति श्रुतेः; न्यग्रोधोदुम्बर इत्यत्र विसर्गलोपे संधिरार्षः। श्वोऽपि न स्थातेति **अश्वत्थः**। पृषोदरादित्वादेव सकारस्य तकारादेशः; 'ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः' इति श्रुतेः, 'ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्' इति स्मृतेश्च। चाणूरनामानमन्ध्रं निषूदितवानिति **चाणूरान्ध्रनिषूदनः**॥

सहस्रार्चिः सप्तजिह्वः
सप्तैधाः सप्तवाहनः।
अमूर्तिरनघोऽचिन्त्यो
भयकृद्भयनाशनः॥ १०२॥

सहस्राणि अनन्तानि अर्चींषि यस्य सः **सहस्रार्चिः**, 'दिवि सूर्यसहस्रस्य' इति गीतावचनात्। सप्त जिह्वा अस्य सन्तीति **सप्तजिह्वः**, 'काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा। स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वा' इति श्रुतेः। सप्त एधांसि दीप्तयोऽस्येति **सप्तैधाः** अग्निः, 'सप्त ते अग्ने स-

मिधः सप्त जिह्वाः' इति मन्त्रवर्णात् । सप्त अश्वा वाहनान्यस्येति **सप्तवाहनः**; सप्तनामैकोऽश्वो वाहनमस्येति वा. 'एकोऽश्वो वहति सप्तनामा' इति श्रुते. । मूर्तिर्घनरूपं धारणसमर्थं चराचरलक्षणम्, 'ताभ्योऽभितप्ताभ्यो मूर्तिरजायत' इति श्रुतेः; तद्रहित इति **अमूर्तिः**; अथवा, देहसंस्थानलक्षणा मूर्छिताङ्गावयवा मूर्ति., तद्रहितः इति **अमूर्तिः** । अघं दु.खं पापं चास्य न विद्यते इति **अनघः** । प्रमात्रादिसाक्षित्वेन सर्वप्रमाणागोचरत्वात् **अचिन्त्यः**; अयमीदृश इति विश्वप्रपञ्चविलक्षणत्वेन चिन्तयितुमशक्यत्वात् **अचिन्त्यः** । असन्मार्गवर्तिनां भयं करोति, भक्तानां भयं कृन्तति कृणोतीति वा **भयकृत्** । वर्णाश्रमाचारवतां भयं नाशयतीति **भयनाशनः**; 'वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः' इति पराशरवचनात् ॥

अणुर्बृहत्कृशः स्थूलो
गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः
प्राग्वंशो वंशवर्धनः ॥ १०३ ॥

सौक्ष्म्यातिशयशालित्वात् **अणुः**, 'एषोऽणुरात्मा चेतसा वेदितव्यः' इति श्रुतेः । बृहत्त्वाद्बृंहणत्वाच्च ब्रह्म **बृहत्**, 'महतो महीयान्' इति श्रुतेः । 'अस्थूलम्' इत्यादिना द्रव्यत्वप्रतिषेधात् **कृशः** । **स्थूलः** इति उपचर्यते सर्वात्मत्वात् । सत्त्वरजस्तमसां सृष्टिस्थितिलयकर्मस्वधिष्ठातृत्वात् **गुणभृत्** । वस्तुतो गुणाभावात् **निर्गुणः**, 'केवलो निर्गुणश्च' इति श्रुतेः । शब्दादिगुणरहितत्वात् निरतिशयसूक्ष्मत्वात् नित्यशुद्धसर्वगतत्वादिना च प्रतिबन्धकं धर्मजातं तर्कतोऽपि यतो वक्तुं न शक्यम् अत एव **महान्** । 'अनङ्गोऽशब्दोऽशरीरोऽस्पर्शश्च महाञ्छुचिः' इति आपस्तम्बः । पृथिव्यादीनां धारकाणामपि धारकत्वान्न केनचिद्धियत इति **अधृतः** । यद्येवमयं केन धार्यत इत्याशङ्क्याह— स्वेनैव आत्मना धार्यत इति **स्वधृतः**, 'स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि' इति श्रुतेः । शोभनं पद्मोदरतलताम्रमभिरूपतममस्यास्यमिति **स्वास्यः**; वेदात्मको महान् शब्दराशिः तस्य मुखान्निर्गतः पुरुषार्थोपदेशार्थमिति वा **स्वास्यः**, 'अस्य महतो भूतस्य' इत्यादिश्रुतेः । अन्यस्य वंशिनो वंशाः पाश्चात्याः; अस्य वंशः प्रपञ्चः प्रागेव, न पाश्चात्य इति **प्राग्वंशः** । वंशं प्रपञ्चं वर्धयन् छेदयन् वा **वंशवर्धनः** ॥

भारभृत्कथितो योगी
योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः
सुपर्णो वायुवाहनः ॥ १०४ ॥

अनन्तादिरूपेण भुवो भारं बिभ्रत् **भारभृत्** । वेदादिभिरयमेव परत्वेन कथितः, सर्वैः वेदैः कथित इति वा **कथितः**, 'सर्वे वेदा यत्पदमामनन्ति' 'वेदैश्च सर्वैरहमेव वेद्य' 'वेदे रामायणे पुण्ये भारते भरतर्षभ । आदौ मध्ये तथा चान्ते विष्णुः सर्वत्र गीयते' इति श्रुतिस्मृत्यादिवचनेभ्यः; 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' इत्याद्युक्तम्; किं तदध्वनो विष्णोर्व्यापनशीलस्य परमं पदं सतत्त्वमित्याकाङ्क्षायाम् इन्द्रियादिभ्यः सर्वेभ्यः परत्वेन प्रतिपाद्यते 'इन्द्रियेभ्यः परा ह्यर्था.' इत्यारभ्य, 'पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः' इत्यन्तेन यः कथितः सः **कथितः** । योगो ज्ञानम्, तेनैव गम्यत्वात् **योगी**; योगः समाधिः, स हि स्वात्मनि सर्वदा समाधत्ते स्वमात्मानम्, तेन वा **योगी** । अन्ये योगिनो योगान्तरायैः हन्यन्ते स्वरूपात्प्रमाद्यन्ति; अयं तु तद्रहितत्वात्तेषामीशः **योगीशः** । सर्वान् कामान्

सदा ददातीति **सर्वकामदः**, 'फलमत उपपत्तेः' इति व्यासेनाभिहितत्वात् । आश्रमवत् सर्वेषां संसारारण्ये भ्रमतां विश्रमस्थानत्वात् **आश्रमः** । अविवेकिनः सर्वान्संतापयतीति **श्रमणः** । क्षामाः क्षीणाः सर्वा. प्रजाः करोतीति **क्षामः**, 'तत्करोति तदाचष्टे' इति णिचि पचाद्यचि कृते संपन्नः क्षाम इति । शोभनानि पर्णानि च्छन्दांसि संसारतरुरूपिणोऽस्येति **सुपर्णः**, 'छन्दांसि यस्य पर्णानि' इति भगवद्वचनात् । वायुर्वहति यद्भीत्या भूतानीति सः **वायुवाहनः**, 'भीषास्माद्वातः पवते' इति श्रुतेः ॥

धनुर्धरो धनुर्वेदो
दण्डो दमयिता दमः ।
अपराजितः सर्वसहो
नियन्ता नियमोऽयमः ॥ १०५ ॥

श्रीमान् रामो महद्धनुर्धारयामासेति **धनुर्धरः** । स एव दाशरथिः धनुर्वेदं वेत्तीति **धनुर्वेदः** । दमनं दमयतां **दण्डः** 'दण्डो दमयतामस्मि' इति भगवद्वचनात् । वैवस्वतनरेन्द्रादिरूपेण प्रजा दमयतीति **दमयिता** । दमः दम्येषु दण्डकार्यं फलम्, तच्च स एवेति **दमः** । शत्रुभिः न पराजित

इति **अपराजितः** । सर्वकर्मसु समर्थ इति, सर्वान् **शत्रून्** सहत इति वा **सर्वसहः** । सर्वान् स्वेषु स्वेषु कृत्येषु व्यवस्थापयतीति **नियन्ता** । न नियमो नियतिस्तस्य विद्यत इति **अनियमः**, सर्वनियन्तुः नियन्त्रन्तराभावात् । नास्य विद्यते यमो मृत्युरिति **अयमः** । अथवा, यमनियमौ योगाङ्गे; तद्वम्यत्वात्स एव **नियमः यमः** ॥

सत्त्ववान्सात्त्विकः सत्यः
सत्यधर्मपरायणः ।
अभिप्रायः प्रियार्होऽर्हः
प्रियकृत्प्रीतिवर्धनः ॥ १०६ ॥

शौर्यवीर्यादिकं सत्त्वमस्येति **सत्त्ववान्** । सत्त्वे गुणे प्राधान्येन स्थित इति **सात्त्विकः** । सत्सु साधुत्वात् **सत्यः** । सत्ये यथाभूतार्थकथने धर्मे च चोदनालक्षणे नियत इति **सत्यधर्मपरायणः** । अभिप्रेयते पुरुषार्थकाङ्क्षिभिः, आभिमुख्येन प्रलयेऽस्मिन्प्रैति जगदिति वा **अभिप्रायः** । प्रियाणि इष्टान्यर्हतीति **प्रियार्हः**, 'यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे । तत्तद्गुणवते देयं तदेवाक्षयमिच्छता' इति स्मरणात् । स्वागतासनप्रशंसार्घ्यपाद्यस्तुतिनमस्कारादिभिः पूजासाधनैः

पूजनीय इति **अर्हः**। न केवलं प्रियार्ह एव, किंतु स्तुत्यादिभिः भजतां प्रियं करोतीति **प्रियकृत्**। तेषामेव प्रीतिं वर्धयतीति **प्रीतिवर्धनः** ॥

विहायसगतिर्ज्योतिः
सुरुचिर्हुतभुग्विभुः।
रविर्विरोचनः सूर्यः
सविता रविलोचनः ॥ १०७ ॥

विहायसं गतिराश्रयोऽस्येति **विहायसगतिः**, विष्णुपदम्, आदित्यो वा। स्वत एव द्योतत इति **ज्योतिः**, 'नारायणः परं ज्योतिः' इति मन्त्रवर्णात्। शोभना रुचिर्दीप्तिरिच्छा वा अस्येति **सुरुचिः**। समस्तदेवतोद्देशेन प्रवृत्तेष्वपि कर्मसु हुतं भुङ्क्ते भुनक्तीति वा **हुतभुक्**। सर्वत्र वर्तमानत्वात्, त्रयाणां लोकानां प्रभुत्वाद्वा **विभुः**। रसानादत्त इति **रविः** आदित्यात्मा। विविधं रोचत इति **विरोचनः**। सूतेः सुवतेर्वा सूर्यशब्दो निपात्यते, 'राजसूयसूर्य' इति पाणिनिवचनात् **सूर्यः**। सर्वस्य जगतः प्रसविता **सविता**; 'रसानां च तथादानाद्रविरित्यभिधीयते। प्रजानां तु प्रसवनात्सवितेति निगद्यते' इति विष्णुधर्मोत्तरे। रविर्लोचनं चक्षुरस्येति

रविलोचनः, 'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' इति श्रुतेः ॥

अनन्तो हुतभुग्भोक्ता
सुखदो नैकजोऽग्रजः ।
अनिर्विण्णः सदामर्षी
लोकाधिष्ठानमद्भुतः ॥ १०८ ॥

नित्यत्वात्सर्वगतत्वात् देशकालपरिच्छेदाभावात् **अनन्तः**; शेषरूपो वा । हुतं भुनक्तीति **हुतभुक्** । प्रकृतिं भोग्याम् अचेतनां भुङ्क्ते इति, जगत्पालयतीति वा **भोक्ता** । भक्तानां सुखं मोक्षलक्षणं ददातीति **सुखदः**; असुखं द्यति खण्डयतीति वा **असुखदः** । धर्मगुप्तये असकृज्जायमानत्वात् **नैकजः** । अग्रे जायत इति **अग्रजः** हिरण्यगर्भः, 'हिरण्यगर्भः समवर्तताग्रे' इत्यादिश्रुतेः । अवाप्तसर्वकामत्वादप्राप्तिहेत्वभावान्निर्वेदोऽस्य नास्तीति **अनिर्विण्णः** । सतः साधून् आभिमुख्येन मृष्यते क्षमत इति **सदामर्षी** । तमनाधारमाधारमधिष्ठाय त्रयो लोकास्तिष्ठन्ति इति **लोकाधिष्ठानं** ब्रह्म । अद्भुतत्वात् **अद्भुतः**, 'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः । आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलानुशिष्टः' इति श्रुतेः ।

'आश्चर्यवत्पश्यति कश्चिदेनम्' इति भगवद्वचनाच्च । स्वरूपशक्तिव्यापारकार्यैः अद्भुतत्वाद्वा **अद्भुतः** ॥

सनात्सनातनतमः
कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति
स्वस्तिभुक्स्वस्तिदक्षिणः ॥ १०९ ॥

सनात् इति निपातः चिरार्थवचनः । कालश्च परस्यैव विकल्पना कापि । 'परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज । व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथापरम्' इति विष्णुपुराणे । सर्वकारणत्वात् विरिञ्चयादीनामपि सनातनानामतिशयेन सनातनत्वात् **सनातनतमः** । वडवानलस्य कपिलो वर्ण इति तद्रूपी **कपिलः** । कं जलं रश्मिभिः पिबन् **कपिः** सूर्यः; **कपिः** वराहो वा, 'कपिर्वराहः श्रेष्ठश्च' इति वचनात् । प्रलये अस्मिन्नपियन्ति जगन्तीति **अव्ययः** ।

इति नाम्नां नवमं शतं विवृतम् ॥

भक्तानां स्वस्ति मङ्गलं ददातीति **स्वस्तिदः** । तदेव करोतीति **स्वस्तिकृत्** । मङ्गलस्वरूपमात्मीयं परमानन्दल-

क्षणं **स्वस्ति** । तदेव भुङ्क्ते इति **स्वस्तिभुक्**; भक्तानां मङ्गलं स्वस्ति भुनक्तीति वा **स्वस्तिभुक्** । स्वस्तिरूपेण दक्षते वर्धते, स्वस्ति दातुं समर्थ इति वा **स्वस्तिदक्षिणः** । अथवा, दक्षिणशब्द आशुकारिणि वर्तते; शीघ्रं स्वस्ति दातुम् अयमेव समर्थ इति, यस्य स्मरणादेव सिध्यन्ति सर्वसिद्धयः, 'स्मृते सकलकल्याणभाजनं यत्र जायते । पुरुषस्तमजं नित्यं व्रजामि शरणं हरिम् ॥ स्मरणादेव कृष्णस्य पापसंघातपञ्जरम् । शतधा भेदमायाति गिरिर्वज्रहतो यथा' इत्यादिवचनेभ्यः ॥

अरौद्रः कुण्डली चक्री
विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः
शिशिरः शर्वरीकरः ॥ ११० ॥

कर्म रौद्रम्, रागश्च रौद्रः, कोपश्च रौद्रः; यस्य रौद्रत्रयं नास्ति अवाप्तसर्वकामत्वेन रागद्वेषादेरभावात् **अरौद्रः** । शेषरूपभाक् **कुण्डली** सहस्रांशुमण्डलोपमकुण्डलधारणाद्वा; यद्वा, सांख्ययोगात्मके कुण्डले मकराकारे अस्य स्त इति **कुण्डली** । समस्तलोकरक्षार्थं मनस्तत्त्वात्मकं सुदर्शनाख्यं चक्रं

धत्त इति **चक्री**, 'चलस्वरूपमत्यन्तं जवेनान्तरितानिलम् । चक्रस्वरूपं च मनो धत्ते विष्णुः करे स्थितम्' इति विष्णुपुराणवचनात् । विक्रमः पादविक्षेपः, शौर्यं वा; द्वयं चाशेषपुरुषेभ्यो विलक्षणमस्येति **विक्रमी** । श्रुतिस्मृतिलक्षणमूर्जितं शासनमस्येति **ऊर्जितशासनः** 'श्रुतिस्मृती ममैवाज्ञे यस्ते उल्लङ्घ्य वर्तते । आज्ञाच्छेदी मम द्वेषी मद्भक्तोऽपि न वैष्णवः' इति भगवद्वचनात् । शब्दप्रवृत्तिहेतूनां जात्यादीनामसंभवात् शब्देन वक्तुमशक्यत्वात् **शब्दातिगः**, 'यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह' 'न शब्दगोचरे यस्य योगिध्येयं परं पदम्' इत्यादिश्रुतिस्मृतिभ्यः । सर्वे वेदाः तात्पर्येण तमेव वदन्तीति **शब्दसहः**; 'सर्वे वेदा यत्पदमामनन्ति' इति श्रुतेः 'वेदैश्च सर्वैरहमेव वेद्यः' इति स्मृतेश्च । तापत्रयाभितप्तानां विश्रामस्थानत्वात् **शिशिरः** । संसारिणामात्मा शर्वरीव शर्वरी; ज्ञानिनां पुनः संसारः शर्वरी; तामुभयेषां करोतीति **शर्वरीकरः**, 'या निशा सर्वभूतानां तस्यां जागर्ति संयमी । यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः' इति भगवद्वचनात् ॥

अक्रूरः पेशलो दक्षो
दक्षिणः क्षमिणां वरः ।

विद्वत्तमो वीतभयः
पुण्यश्रवणकीर्तनः ॥ १११ ॥

क्रौर्यं नाम मनोधर्मः प्रकोपजः आन्तरः संतापः साभिनिवेशः; अवाप्तसमस्तकामत्वात्कामाभावादेव कोपाभावः; तस्मात्क्रौर्यमस्य नास्तीति **अक्रूरः**। कर्मणा मनसा वाचा वपुषा च शोभनत्वात् **पेशलः**। प्रवृद्धः शक्तः शीघ्रकारी च दक्षः, त्रयं चैतत् परस्मिन्नियतमिति **दक्षः**। दक्षिणशब्दस्यापि दक्ष एवार्थः, पुनरुक्तिदोषो नास्ति, शब्दभेदात्; अथवा, दक्षते गच्छति, हिनस्तीति वा **दक्षिणः**, 'दक्ष गतिहिंसनयोः' इति धातुपाठात्। क्षमावतां योगिनां च पृथिव्यादीनां भारधारकाणां च श्रेष्ठ इति **क्षमिणां वरः**। 'क्षमया पृथिवीसमः' इति वाल्मीकिवचनात्; ब्रह्माण्डमखिलं वहन् पृथिवीव भारेण नार्दित इति पृथिव्या अपि वरो वा; क्षमिणः शक्ताः; अयं तु सर्वशक्तिमत्त्वात्सकलाः क्रियाः कर्तुं क्षमत इति वा **क्षमिणां वरः**। निरस्तातिशयं ज्ञानं सर्वदा सर्वगोचरमस्यास्ति नेतरेषामिति **विद्वत्तमः**। वीतं विगतं भयं सांसारिकं संसारलक्षणं वा अस्येति **वीतभयः**, सर्वेश्वरत्वान्नित्यमुक्तत्वाच्च। पुण्यं पुण्यकरं श्रवणं कीर्तनं चास्येति **पुण्यश्रवणकीर्तनः**, 'य इदं शृणुयान्नित्यं यश्चापि

परिकीर्तयेत् । नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मानवः' इति श्रवणादिफलवचनात् ॥

उत्तारणो दुष्कृतिहा
पुण्यो दुःस्वप्ननाशनः ।
वीरहा रक्षणः सन्तो
जीवनः पर्यवस्थितः ॥ ११२ ॥

संसारसागरादुत्तारयतीति **उत्तारणः** । दुष्कृतीः पाप-संज्ञिताः हन्तीति **दुष्कृतिहा**, पापकारिणस्तान्हन्तीति वा **दुष्कृतिहा** । स्मरणादि कुर्वतां सर्वेषां पुण्यं करोतीति, सर्वेषां श्रुतिस्मृतिलक्षणया वाचा पुण्यमाचष्ट इति वा **पुण्यः** । भाविनोऽनर्थस्य सूचकान् दुःस्वप्नान् नाशयति ध्यातः स्तुतः कीर्तितः पूजितश्चेति **दुःस्वप्ननाशनः** । विवि-धाः संसारिणां गतीः मुक्तिप्रदानेन हन्तीति **वीरहा** । सत्त्वं गुणमधिष्ठाय जगत्त्रयं रक्षन् **रक्षणः**; नन्द्यादित्वाकर्तरि ल्युः । सन्मार्गवर्तिनः सन्तः; तद्रूपेण विद्याविनयवृद्धये स एव वर्तत इति **सन्तः** । सर्वाः प्रजाः प्राणरूपेण जीवयन् **जीवनः** । परितः सर्वतो विश्वं व्याप्यावस्थित इति **पर्यवस्थितः** ॥

अनन्तरूपोऽनन्तश्री-
र्जितमन्युर्भयापहः ।
चतुरश्रो गभीरात्मा
विदिशो व्यादिशो दिशः ॥ ११३ ॥

अनन्तानि रूपाण्यस्य विश्वप्रपञ्चरूपेण स्थितस्येति **अनन्तरूपः** । अनन्ता अपरिमिता श्रीः परशक्तिरस्येति **अनन्तश्रीः**, 'परास्य शक्तिर्विविधैव श्रूयते' इति श्रुतेः । मन्युः क्रोधो जितो येन सः **जितमन्युः** । भयं संसारजं पुंसामपन्नन् **भयापहः** । न्यायसमवेतः **चतुरश्रः**, पुंसां कर्मानुरूपं फलं प्रयच्छतीति । आत्मा स्वरूपं चित्तं वा गभीरं परिच्छेत्तुमशक्यमस्येति **गभीरात्मा** । विविधानि फलानि अधिकारिभ्यो विशेषेण दिशतीति **विदिशः** । विविधामाज्ञां शक्रादीनां कुर्वन् **व्यादिशः** । समस्तानां कर्मणां फलानि दिशन् वेदात्मना **दिशः** ॥

अनादिर्भूर्भुवो लक्ष्मीः
सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादि-
र्भीमो भीमपराक्रमः ॥ ११४ ॥

आदिः कारणमस्य न विद्यत इति **अनादिः**, सर्वकारणत्वात् । भूराधारः, भुवः सर्वभूताश्रयत्वेन प्रसिद्धाया भूम्याः, भुवोऽपि भूरिति **भूर्भुवः** । अथवा, न केवलमसौ भूः भुवः, लक्ष्मीः शोभा चेति **भुवो लक्ष्मीः** । अथवा, **भूः** भूलोकः; **भुवः** भुवर्लोकः; **लक्ष्मीः** आत्मविद्या, 'आत्मविद्या च देवि त्वम्' इति श्रीस्तुतौ । भूम्यन्तरिक्षयोः शोभेति वा **भूर्भुवो लक्ष्मीः** । शोभना विविधा ईरा गतयो यस्य सः **सुवीरः**; शोभनं विविधम् ईर्ते इति वा **सुवीरः** । रुचिरे कल्याणे अङ्गदे अस्येति **रुचिराङ्गदः** । जन्तून् जनयन **जननः**; ल्युट्विधौ बहुलग्रहणात्कर्तरि ल्युट् प्रत्ययः प्रयोगवचनादिवत् । जनस्य जनिमतो जन्म उद्भवः तस्यादिः मूलकारणमिति **जनजन्मादिः** । भयहेतुत्वात् **भीमः**, 'भीमादयोऽपादाने' इति निपातनात्, 'महद्भयं वज्रमुद्यतम्' इति श्रुतेः । असुरादीनां भयहेतुः पराक्रमोऽस्यावतारेष्विति **भीमपराक्रमः** ॥

आधारनिलयोऽधाता
पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः
प्राणदः प्रणवः पणः ॥ ११५ ॥

पृथिव्यादीनां पञ्चभूतानामाधाराणामाधारत्वात् **आधारनिलयः** । स्वात्मना धृतस्यास्यान्यो धाता नास्तीति **अधाता**; 'नञ्धृतश्च' इति 'समासान्तविधिरनित्यः' इति कप्प्रत्ययाभावः । संहारसमये सर्वाः प्रजाः धयति पिबतीति वा **धाता**; धेट् पाने, इति धातुः । मुकुलात्मना स्थितानां पुष्पाणां हासवत् प्रपञ्चरूपेण विकासोऽस्येति **पुष्पहासः** । नित्यप्रबुद्धस्वरूपत्वात् प्रकर्षेण जागर्तीति **प्रजागरः** । सर्वेषामुपरि तिष्ठन् **ऊर्ध्वगः** । सतां कर्माणि सत्पथाः; तानाचरत्येष इति **सत्पथाचारः** । मृतान् परिक्षित्प्रभृतीन् जीवयन **प्राणदः** । प्रणवो नाम परमात्मनो वाचक ओंकारः; तद्भेदोपचारेणायं **प्रणवः** । पणतिर्व्यवहारार्थः; तं कुर्वन **पणः**, 'सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाभिवदन्यदास्ते' इति श्रुतेः; पुण्यानि सर्वाणि कर्माणि पणं संगृह्याधिकारिभ्यः तत्फलं प्रयच्छतीति वा लक्षणया **पणः** ॥

प्रमाणं प्राणनिलयः
प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा
जन्ममृत्युजरातिगः ॥ ११६ ॥

प्रमितिः संवित्स्वयंप्रभा **प्रमाणम्**, 'प्रज्ञानं ब्रह्म' इति श्रुतेः । 'ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः । तमेवार्थ-स्वरूपेण भ्रान्तिदर्शनतः स्थितम्' इति विष्णुपुराणे । प्राणा इन्द्रियाणि यत्र जीवे निलीयन्ते तत्परतन्त्रत्वात्, देहस्य धारकाः प्राणापानादयो वा तस्मिन्निलीयन्ते, प्राणितीति प्राणो जीवः परे पुंसि निलीयत इति वा प्राणान् जीवांश्च संहरन्निति वा **प्राणनिलयः** । पोषयन्नन्नरूपेण प्राणान् **प्राण-भृत्** प्राणिनो जीवयन् प्राणाख्यैः पवनैः **प्राणजीवनः**, 'न प्राणेन नापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ' इति मन्त्रवर्णात् । **तत्त्वं** तथ्यममृतं सत्यं परमार्थः सतत्त्वमित्येते एकार्थवाचिनः परमार्थसतो ब्रह्मणो वाचकाः शब्दाः । तत्त्वं स्वरूपं यथावद्वेत्तीति **तत्त्ववित्** । एकश्चासावात्मा चेति **एकात्मा**, 'आत्मा वा इदमेक एवाग्र आसीत्' इति श्रुतेः, 'यच्चाप्नोति यदादत्ते यच्चात्ति विषया-निह । यच्चास्य संततो भावस्तस्मादात्मेति गीयते' इति स्मृतेश्च । 'जायते अस्ति वर्धते विपरिणमते अपक्षीयते नश्यति' इति षड्भावविकारानतीत्य गच्छतीति **जन्ममृत्यु-जरातिगः**, 'न जायते म्रियते वा विपश्चित्' इति मन्त्र-वर्णात् ॥

भूर्भुवःस्वस्तरुस्तारः
सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा
यज्ञाङ्गो यज्ञवाहनः ॥ ११७ ॥

भूर्भुवःस्वःसमाख्यानि त्रीणि व्याहृतिरूपाणि शुक्राणि त्रयीसाराणि बह्वृचा आहुः; तैर्होमादिना जगत्त्रयं तरति. प्लवते वेति **भूर्भुवःस्वस्तरुः** 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति मनुवचनात्; अथवा, भूर्भुवःस्वःसमाख्यलोकत्रयसंसारवृक्ष **भूर्भुवःस्वस्तरुः**; भूर्भुवःस्वराख्यं लोकत्रय वृक्षवद्व्याप्य तिष्ठतीति वा **भूर्भुवःस्वस्तरुः** । संसारसागरं तारयन् **तारः**, प्रणवो वा । सर्वस्य लोकस्य जनक इति **सविता** । पितामहस्य ब्रह्मणोऽपि पितेति **प्रपितामहः** । संगन्ता **यज्ञः**, यज्ञानां पाता, स्वामी वा **यज्ञपतिः**, 'अयं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च' इति भगवद्वचनात् । यजमानात्मना तिष्ठन् **यज्वा** । यज्ञा अङ्गान्यस्येति वराहमूर्तिः **यज्ञाङ्गः**,

वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः ।
अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः ॥

अहोरावेक्षणो दिव्यो वेदाङ्गश्रुतिभूषणः ।
आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् ॥

धर्मसत्यमयः श्रीमान्क्रमविक्रमसत्क्रियः ।
प्रायश्चित्तनखो घोरः पशुजानुर्महाभुजः ॥

उद्गात्रन्त्रो होमलिङ्गः फलबीजमहौषधिः ।
बाह्यान्तरात्मा मन्त्रस्फिग्विकृतः सोमशोणितः ॥

वेदीस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् ।
प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरर्चितः ॥

दक्षिणाहृदयो योगी महासत्रमयो महान् ।
उपाकर्मोष्टरुचकः प्रवर्ग्यावर्तभूषणः ॥

नानाच्छन्दोगतिपथो गुह्योपनिषदासनः ।
छायापत्नीसहायो वै मेरुशृङ्ग इवोच्छ्रितः ॥

इति हरिवंशे ।

फलहेतुभूतान्यज्ञान् वाहयतीति **यज्ञवाहनः** ॥

यज्ञभृद्यज्ञकृद्यज्ञी
यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्य-
मन्नमन्नाद एव च ॥ ११८ ॥

यज्ञं बिभर्ति पातीति वा **यज्ञभृत्** । जगदादौ तदन्ते च यज्ञं करोति, कृन्ततीति वा **यज्ञकृत्** । यज्ञानां तत्समाराधनात्मनां शेषीति **यज्ञी** । यज्ञं भुङ्क्ते, भुनक्तीति वा **यज्ञभुक्** । यज्ञाः साधनं तत्प्राप्ताविति **यज्ञसाधनः** । यज्ञस्यान्तं फलप्राप्तिं कुर्वन **यज्ञान्तकृत्**; वैष्णवीऋक्शंसनेन पूर्णाहुत्या पूर्णं कृत्वा यज्ञसमाप्तिं करोतीति वा **यज्ञान्तकृत्** । यज्ञानां गुह्यं ज्ञानयज्ञः, फलाभिसंधिरहितो वा यज्ञः; तदभेदोपचारात् ब्रह्म **यज्ञगुह्यम्** । अद्यते अत्ति च भूतानीति **अन्नम्** । अन्नमत्तीति **अन्नादः** । सर्वं जगदन्नादिरूपेण भोक्तृभोग्यात्मकमेवेति दर्शयितुमेवकारः; च-शब्दः सर्वनाम्नामेकस्मिन्परस्मिन्पुंसि समुच्चित्य वृत्तिं दर्शयितुम् ॥

आत्मयोनिः स्वयंजातो
वैखानः सामगायनः ।
देवकीनन्दनः स्रष्टा
क्षितीशः पापनाशनः ॥ ११९ ॥

आत्मैव योनिरुपादानकारणं नान्यदिति **आत्मयोनिः** । निमित्तकारणमपि स एवेति दर्शयितुं **स्वयंजातः** इति; 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्' इत्यत्र स्थापितमुभ-

यकारणत्वं हरेः। विशेषेण खननात् **वैखानः**, धरणीं विशेषेण खनित्वा पातालवासिनं हिरण्याक्षं वाराहं रूपमास्थाय जघानेति पुराणे प्रसिद्धम। सामानि गायतीति **सामगायनः**। देवक्याः सुतो **देवकीनन्दनः**। 'ज्योतींषि शुक्राणि च यानि लोके त्रयो लोका लोकपालास्त्रयी च। त्रयोऽग्नयश्चाहुतयश्च पञ्च सर्वे देवा दवकीपुत्र एव' इति महाभारते। **स्रष्टा** सर्वलोकस्य। क्षितेर्भूमेरीशः **क्षितीशः** दशरथात्मजः। कीर्तितः पूजितो ध्यातः स्मृतः पापराशिं नाशयन् **पापनाशनः**; 'पक्षोपवासाद्यत्पापं पुरुषस्य प्रणश्यति। प्राणायामशतेनैव तत्पापं नश्यते नृणाम्॥ प्राणायामसहस्रेण यत्पापं नश्यते नृणाम्। क्षणमात्रेण तत्पापं हरेर्ध्यानात्प्रणश्यति' इति वृद्धशातातपे॥

शङ्खभृन्नन्दकी चक्री
शार्ङ्गधन्वा गदाधरः।
रथाङ्गपाणिरक्षोभ्यः
सर्वप्रहरणायुधः।
सर्वप्रहरणायुधों नमः॥ १२०॥

पाञ्चजन्याख्यं भूताद्यहंकारात्मकं शङ्खं बिभ्रत् **शङ्ख-**

भृत् । विद्यामयो नन्दकाख्योऽसिरस्येति **नन्दकी** । मनन्तत्त्वात्मकं सुदर्शनाख्यं चक्रमस्यास्तीति, संसारचक्रमस्याज्ञया परिवर्तत इति वा **चक्री** । इन्द्रियाद्यहंकारात्मकं शार्ङ्गं नाम धनुरस्यास्तीति **शार्ङ्गधन्वा** । 'धनुषश्च' इति अनङ् समासान्तः । बुद्धितत्त्वात्मिकां कौमोदकीं नाम गदां वहन् **गदाधरः** । रथाङ्गं चक्रमस्य पाणौ स्थितमिति **रथाङ्गपाणिः** । अत एव अशक्यक्षोभणः इति **अक्षोभ्यः** । केवलम् एतावन्त्यायुधान्यस्येति न नियम्यते, अपि तु सर्वाण्येव प्रहरणान्यायुधान्यस्येति **सर्वप्रहरणायुधः**, आयुधत्वेनाप्रसिद्धान्यपि करजादीन्यस्यायुधानि भवन्तीति । अन्ते सर्वप्रहरणायुध इति वचनं सत्यसंकल्पत्वेन सर्वेश्वरत्वं दर्शयितुम्, 'एष सर्वेश्वरः' इति श्रुतेः । द्विर्वचनं समाप्तिं द्योतयति । ॐकारश्च मङ्गलार्थः, ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ' इति वचनात् । अन्ते 'नमः' इत्युक्त्या परिचरणं कृतवान्, 'भूयिष्ठां ते नमउक्तिं विधेम' इति मन्त्रवर्णात् । 'धन्यं तदेव लग्नं तन्नक्षत्रं तदेव पुण्यमहः । करणस्य च सा सिद्धिर्यत्र हरिः प्राङ् नमस्क्रियते' इति च । प्रागित्युपलक्षणम्, अन्तेऽपि नमस्कारस्य शिष्टैराचरणात् । नमस्कार-

फलं प्रागेव दर्शितम्—

एकोऽपि कृष्णे सुकृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥

अतसीपुष्पसंकाशं पीतवाससमच्युतम् ।
ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम् ॥

लोकत्रयाधिपतिमप्रतिमप्रभाव-
मीषत्प्रणम्य शिरसा प्रभविष्णुमीशम् ।
जन्मान्तरप्रलयकल्पसहस्रजात-
माशु प्रशान्तिमुपयाति नरस्य पापम् ॥ इति ॥

इति नाम्नां दशमं शतं विवृतम् ॥

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् ॥

इतीदम् इत्यनेन नामसहस्रन्यूनानातिरिक्तमुक्तमिति दर्शयति दिव्यानामप्राकृतानां नाम्नां सहस्रं प्रकीर्तितमिति वदता प्रकारान्तरेणापि संख्योपपत्तिर्दर्शिता । प्रक्रमे 'किं जपन्मुच्यते जन्तुः' इति जपशब्दोपादानात् कीर्तयेत् इत्यनेनापि त्रिविधजपो लक्ष्यते । उच्चोपांशुमानसलक्षणस्त्रिविधो जपः ॥

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किंचित्सोऽमुत्रेह च मानवः ॥

य इदं शृणुयात् इत्यादिः स्पष्टार्थः । परलोकप्राप्तस्यापि ययातिनहुषादिवदशुभप्राप्त्यभावं सूचयितुम् अमुत्र इत्युक्तम् ॥

वेदान्तगो ब्राह्मणः स्या-
त्क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्या-
च्छूद्रः सुखमवाप्नुयात् ॥ १२३ ॥

वेदान्तानामुपनिषदामर्थं ब्रह्म गच्छत्यवगच्छतीति वेदान्तगः । 'किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात्' इति वचनात् जपकर्मणा साक्षान्मुक्तिशङ्कायां कर्मणां साक्षान्मुक्तिहेतुत्वं नास्ति, ज्ञानेनैव मोक्ष इति दर्शयितुं वेदान्तगो ब्राह्मणः स्यात् इत्युक्तम् । कर्मणां त्वन्तःकरणशुद्धिद्वारेण मोक्षहेतुत्वम्,

कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः ।
कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते ॥
नित्यं ज्ञानं समासाद्य नरो बन्धात्प्रमुच्यते ।
धर्मात्सुखं च ज्ञानं च ज्ञानान्मोक्षोऽधिगम्यते ॥

योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये ।
कर्मणा बध्यते जन्तुर्विद्ययैव विमुच्यते ॥
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ।
यथोक्तान्यपि कर्माणि परिहाय द्विजोत्तमः ॥
आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् ॥
तपसा कल्मषं हन्ति विद्ययामृतमश्नुते । इति ॥
ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः ।
यथादर्शतलप्रख्ये पश्यत्यात्मानमात्मनि ॥

इत्यादिस्मृतिभ्यः, 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन' 'येन केन च यजेतापि वा दर्विहोमेनानुपहतमना एव भवति' इत्यादिश्रुतिभ्यः । ज्ञानादेव मोक्षो भवति, 'ज्ञानादेव तु कैवल्यं प्राप्यते तेन मुच्यते' 'ब्रह्मविदाप्नोति परम्' 'तरति शोकमात्मवित्' 'ब्रह्म वेद ब्रह्मैव भवति' 'ब्रह्मैव सन्ब्रह्माप्येति' 'तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति । 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन' 'इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः' 'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति' 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः' 'वेदान्तविज्ञानसुनिश्चितार्थाः

संन्यासयोगाद्यतयः शुद्धसत्त्वाः' 'ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इत्यादिश्रुतिभ्यः । शूद्रः सुखमवाप्नुयात् श्रवणेनैव, न तु जपयज्ञेन, 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इति श्रुतेः । 'श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः' इति महाभारते श्रवणमनुज्ञायते । 'सुगतिमियाच्छ्रवणाच्च शूद्रयोनिः' इति हरिवंशे । यः शूद्रः शृणुयात् स सुखमवाप्नुयात् इति व्यवहितेन संबन्धः; त्रैवर्णिकानां कीर्तयेदित्यनेन ॥

धर्मार्थी प्राप्नुयाद्धर्म-
मर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी
प्रजार्थी चाप्नुयात्प्रजाम् ॥ १२४ ॥

चक्षुरादीनामात्मयुक्तेन मनसाधिष्ठितानां स्वेषु स्वेषु विषयेष्वानुकूल्यात् प्रवृत्तिः कामः । प्रजायत इति प्रजा संततिः ॥

भक्तिमानित्यादिना भक्तिमतः शुचेः सततमेवमुद्युक्तस्यैकाग्रचित्तस्य श्रद्धालोः विशिष्टाधिकारिणः फलविशेषं दर्शयति—

भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥

यशः प्राप्नोति विपुलं याति प्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः ॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः ॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् ॥

न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥१३१॥

इमं स्तवमधीयानः
श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्ति-
श्रीधृतिस्मृतिकीर्तिभिः ॥ १३२ ॥

श्रद्धा आस्तिक्यबुद्धिः । भक्तिः भजनं तात्पर्यम् । आत्मनः सुखम् आत्मसुखम् । तेन च क्षान्त्यादिभिश्च युज्यते ॥

नक्रोधो न च मात्सर्यं
नलोभो नाशुभा मतिः ।
भवन्ति कृतपुण्यानां
भक्तानां पुरुषोत्तमे ॥ १३३ ॥

नक्रोधः नलोभः नाशुभा मतिः इति अकारानुबन्धरहितेन नकारेण समस्तं पदत्रयम् ; क्रोधादयो न भवन्ति, मात्सर्यं च न भवतीत्यर्थः ॥

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः ।
वासुदेवस्य वीर्येण विधृतानि महात्मनः ॥१३४॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ १३५ ॥

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः ।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ॥

सर्वागमानामाचारः प्रथमं परिकल्पते ।
आचारप्रभवो धर्मो धर्मस्य प्रभुरच्युतः ॥१३७॥

ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारयणोद्भवम् ॥ १३८ ॥

योगो ज्ञानं तथा सांख्यं
विद्याः शिल्पादिकर्म च ।
वेदाः शास्त्राणि विज्ञान-
मेतत्सर्वं जनार्दनात् ॥ १३९ ॥

एको विष्णुर्महद्भूतं
पृथग्भूतान्यनेकशः ।

त्रींल्लोकान्व्याप्य भूतात्मा
भुङ्क्ते विश्वभुगव्ययः ॥ १४० ॥

'द्यौः सचन्द्रार्कनक्षत्रा' इत्यादिना स्तुत्यस्य वासुदेवस्य माहात्म्यकथनेनोक्तानां फलानां प्राप्तिवचनं यथार्थकथनं नार्थवाद इति दर्शयति । 'सर्वागमानामाचारः' इत्यनेनावान्तरवाक्येन सर्वधर्माणामाचारवत एवाधिकार इति दर्शयति ॥

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः श्रेयः प्राप्तुं सुखानि च ॥

इमं स्तवम् इत्यादिना सहस्रशाखाज्ञानेन सर्वज्ञेन भगवता कृष्णद्वैपायनेन साक्षान्नारायणेन कृतमिति सर्वैरेव अर्थिभिः सादरं पठितव्यं सर्वफलसिद्धय इति दर्शयति ॥

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम् ॥

इति श्रीमहाभारते आनुशासनिके भीष्मयुधिष्ठिरसंवादे
विष्णोर्दिव्यसहस्रनामस्तोत्रं नाम
एकोनपञ्चाशदधिकशततमोऽध्यायः ॥

'विश्वेश्वरम्' इत्यादिना विश्वेश्वरोपासनादेव स्तोतारस्ते धन्याः कृतार्थाः कृतकृत्या इति दर्शयति ।

प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥
आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथा चेद्विश्वकर्तारं को न मुच्येत बन्धनात् ॥

इति व्यासवचनम् ॥

सहस्रनामसंबन्धिव्याख्या सर्वसुखावहा ।
श्रुतिस्मृतिन्यायमूला रचिता हरिपादयोः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ
विष्णुसहस्रनामस्तोत्रभाष्यम्
संपूर्णम् ॥



॥ श्रीः ॥

॥ सनत्सुजातीयभाष्यम् ॥

श्रीमच्छंकरभगवत्पादैः

विरचितम् ।





॥ श्रीः ॥

सनत्सुजातीयभाष्ये

प्रथमोऽध्यायः ।

॥ श्रीः ॥

॥ सनत्सुजातीयम् ॥

श्रीमच्छंकरभगवत्पादविरचितेन

भाष्येण सहितम् ।

नमः पुंसे पुराणाय पूर्णानन्दाय विष्णवे ।
निरस्तनिखिलध्वान्ततेजसे विश्वहेतवे ॥

नम आचार्येभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यः ॥



सनत्सुजातीयविवरणं संक्षेपतो ब्रह्मजिज्ञासूनां सुखावबोधायारभ्यते ॥

स्वतश्चित्सदानन्दाद्वितीयब्रह्मस्वरूपोऽप्यात्मा स्वाश्रयया स्वविषयया अविद्यया स्वानुभवगम्यया साभासया स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मभावात्प्रच्युतः अनात्मनि देहादावात्मभावमापन्नः अप्राप्ताशे-

पपुरुषार्थः प्राप्ताशेषानर्थः अविद्याकर्मपरिकल्पितैरेव साधनैरिष्टप्राप्तिमनिष्टपरिहृतिं चाकाङ्क्षन् लौकिकवैदिकसाधनैरनुष्ठितैरपि परमपुरुषार्थं मोक्षाख्यमलभमानो मकरादिभिरिव रागद्वेषादिभिरितस्तत आकृष्यमाणः सुरनरतिर्यगादिप्रभेदभिन्नासु नानायोनिषु परिवर्तमानो मुह्यमानः संसरन् कथंचित्पुण्यवशाद्वेदोदितेन ईश्वरार्थकर्मानुष्ठानेनापगतरागादिमलः अनित्यादिदोषदर्शनेनोत्पन्नेहामुत्रफलभोगविरागः वेदान्तेभ्यः प्रतीयमानं ब्रह्मात्मभावं बुभुत्सुः वेदोदितशमदमादिसाधनसंपन्नः ब्रह्मविदमाचार्यमुपेत्य आचार्यानुसारेण वेदान्तश्रवणादिना 'अहं ब्रह्मास्मि' इति ब्रह्मात्मतत्त्वमवगम्य निवृत्ताज्ञानतत्कार्यः ब्रह्मरूपोऽवतिष्ठत इतीयं वेदान्तानां मर्यादा । एतत्सर्वं क्रमेण दर्शयिष्यति भगवान् सनत्सुजातः ॥

धृतराष्ट्रः शोकमोहाभितप्तः 'तरति शोकमात्मवित्' इति वेदान्तवादमुपश्रुत्य ब्रह्मविद्यया विना शोकापनयनमशक्यं मन्वानः 'अनुक्तं यदि ते किंचिद्वाचा विदुर विद्यते । तन्मे शुश्रूषवे ब्रूहि विचित्राणीह भाषसे' इति विदुरायोक्तवान । स च श्रुतवाक्योऽपि परमकारुणिकः सर्वज्ञः सन् ब्रह्मविद्यां विशिष्टाधिकारिविषयां मन्वानः 'शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे' इति शूद्रयोनिजत्वादौपनिषदब्रह्मात्म-

तत्त्वज्ञाने नाहमधिकृत इत्युक्त्वा कथमेनं ब्रह्मविद्यया परमे पदे परमात्मनि पूर्णानन्दे स्वाराज्ये स्थापयिष्यामीति मन्वानः छान्दोग्योपनिषत्प्रसिद्धमितिहासं स्मृत्वा नान्योऽस्मादस्मै भूमानं तमसः परं परमात्मानं दर्शयितुं शक्नुयादिति मत्वा तमेव भगवन्तं सनत्सुजातं योगबलेनाहूय प्रत्युत्थानादिभिर्भगवन्तं पूजयित्वा 'भगवन्संशयः कश्चिद्धृतराष्ट्रस्य मानसे । यो न शक्यो मया वक्तुं त्वमस्मै वक्तुमर्हसि ॥ श्रुत्वायं यं मनुष्येन्द्रः सर्वदुःखातिगो भवेत् । लाभालाभौ प्रियद्वेष्यौ तथैव च जरान्तकौ ॥ विषहेत मदोन्मादौ क्षुत्पिपासे भयाभये । अरतिं चैव तन्द्रीं च कामक्रोधौ क्षयोदयौ' इति भगवन्. येनासौ सकलसंसारकारणधर्माधर्मविवर्जितः सुखदुःखातिगो मुक्तो भवेत् तमस्मै धृतराष्ट्राय वक्तुमर्हसीत्युक्तवान—

वैशम्पायन उवाच—

ततो राजा धृतराष्ट्रो मनीषी
संपूज्य वाक्यं विदुरेरितं तत् ।
सनत्सुजातं रहिते महात्मा
पप्रच्छ बुद्धिं परमां बुभूषन् ॥ १ ॥

ततः एतद्वाक्यसमनन्तरं विदुरेण सनत्सुजातं प्रति

ईरितम् उक्तं यत् वाक्यं तत् संपूज्य संमान्य सनत्सुजातं सनदिति सनातनं ब्रह्मोच्यते हिरण्यगर्भाख्यम्, तस्मात्सनातनात् ब्रह्मणो मानसात् ज्ञानवैराग्यादिसमन्वितः सुष्ठु जात इति सनत्सुजातः इत्युक्तो भगवान् सनत्कुमारः; तं रहिते रहसि प्राकृतजनवर्जिते देशे महात्मा महाबुद्धिः पप्रच्छ पृष्टवान् बुद्धिं परमाम् उत्तमां पूर्णानन्दाद्वितीयविषयाम्। किमर्थम्? बुभूषन् भवितुमिच्छन्, ब्रह्मविद्यया अपहृतमात्मानं लब्धुमिच्छन्नित्यर्थः॥

धृतराष्ट्र उवाच—

सनत्सुजात यदिदं शृणोमि
मृत्युर्हि नास्तीति तवोपदेशम्।
देवासुरा आचरन्ब्रह्मचर्य-
ममृत्यवे तत्कतरन्नु सत्यम्॥ २॥

हे सनत्सुजात, यत् मृत्युर्हि नास्तीति शिष्यान्प्रति उपदिष्टमिति विदुरः प्राह, देवासुराः पुनः अमृत्यवे मृत्योरभावाय अमृतत्वप्राप्तये ब्रह्मचर्यमाचरन् इन्द्रविरोचनादयः गुरौ वासं कृतवन्तः। श्रूयते च च्छान्दोग्ये— 'तद्धोभये देवा असुरा अनुबुबुधिरे' इत्याद्यारभ्य 'तौ ह द्वात्रिंशतं वर्षाणि

ब्रह्मचर्यमूषतुः' इत्यन्तेनेन्द्रविरोचनयोः प्रजापतौ ब्रह्मचर्यचरणम् 'एकशतं ह वै वर्षाणि मघवा प्रजापतौ ब्रह्मचर्यमुवास' इति च । यदि मृत्युर्नास्तीति तव पक्षः, कथं तर्हि देवासुराणाममृत्यवे ब्रह्मचर्यचरणम् ; तन् तयोर्मृत्युसद्भावासद्भावपक्षयोः कतरन्नु सत्यम् , यत्सत्यं तद्वक्तुमर्हसीत्यभिप्रायः ॥

श्रीसनत्सुजात उवाच—

अमृत्युः कर्मणा केचिन्मृत्युर्नास्तीति चापरे ।
शृणु मे ब्रुवतो राजन्यथैतन्मा विशङ्किथाः ॥

एवं पृष्टः प्राह भगवान् सनत्सुजातः— केचित् पुनरविद्याधिरूढाः परमार्थतो मृत्युसद्भावं मन्यमानाः वेदोक्तेन कर्मणा अमृत्युः अमृतत्वं भवतीति मत्वा अमृत्यवे अमृतत्वप्राप्तये वेदोक्तं कर्माचरन्ति ; तथा अन्ये विषयविषान्धाः विषयव्यतिरेकेण निर्विषयं मोक्षममन्यमानाः कर्मणैव अमृत्युम् अमरणत्वं देवादिभावं वर्णयन्ति ; तत्रैव च रागिगीतं श्लोकमुदाहरन्ति— 'अपि वृन्दावने शून्ये सृगालत्वं स इच्छतु । न तु निर्विषयं मोक्षं कदाचिदपि गौतम' इति । तथैव च परमात्मव्यतिरेकेण द्वितीयमपश्यन्तो ज्ञानकर्मभ्याममृतत्वं वर्णयन्ति ।

अपरे पुनरद्वितीयात्मदर्शिनः आत्मव्यतिरेकेण द्वितीयमपश्यन्तो मृत्युर्नास्तीति वर्णयन्ति हे राजनः यथा एतत्पक्षयोरविरोधः संभवति, तथा ब्रुवतो मे मम वाक्यं शृणु मा विशङ्किथाः मयोक्तेऽर्थे शङ्कां मा कृथाः ॥

कथम् ?—

उभे सत्ये क्षत्रियाद्यप्रवृत्ते
मोहो मृत्युः संमतो यः कवीनाम् ।
प्रमादं वै मृत्युमहं ब्रवीमि
सदाप्रमादममृतत्वं ब्रवीमि ॥ ४ ॥

ये पूर्वोक्ते मृत्योरस्तित्वनास्तित्वे ते उभे हे क्षत्रिय, आद्यप्रवृत्ते य आदिसर्गस्तमारभ्य प्रवृत्ते । अथवा, क्षत्रियाद्य क्षत्रियप्रधान, प्रवृत्ते वर्तमाने । कथं पुनरुभयोः परस्परविरुद्धयोः अस्तित्वनास्तित्वयोः सत्यत्वमिति ? तत्राह— मोहो मृत्युः संमतो यः कवीनाम् इति । भवेदयं विरोधः अस्तित्वनास्तित्वयोः, यदि परमार्थरूपो मृत्युः स्यात् । कस्तर्हि मृत्युः ? यो मोहो मिथ्याज्ञानम् अनात्मन्यात्माभिमानः, स मृत्युः केषांचित् कवीनां मतः ; अहं तु न तथा मृत्युं ब्रवीमि । कथं तर्हि ? प्रमादं वै मृत्युम् अहं ब्रवीमि । प्रमादः प्रच्युतिः

स्वाभाविकब्रह्मभावात् । तं प्रमादं मिथ्याज्ञानस्यापि कारणम् आत्मानवधारणमात्माज्ञानं मृत्युं जननमरणादिसर्वानर्थबीजम् अहं ब्रवीमि । तथा सदाप्रमादं स्वाभाविकस्वरूपेणावस्थानम् अमृतत्वं ब्रवीमि । तथा च श्रुतिः स्वरूपावस्थानमेव मोक्षपदं दर्शयति— 'परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' इति । तथा अनुगीतासु स्पष्टमाह— 'एको यज्ञो नास्ति ततो द्वितीयो यो ह्यच्छयस्तमहमनुब्रवीमि । यस्मिन्निष्ट्वा सर्वमिदं ग्रासित्वा स्वरूपसंस्थाश्च भवन्ति मर्त्याः' इति । यत एवं स्वरूपावस्थानलक्षणो मोक्षः, अत एव चतुर्विधक्रियाफलविलक्षणत्वादेव न कर्मसाध्यममृतत्वम्; नापि समुच्चिताभ्यां ज्ञानकर्मभ्यामिति 'अमृत्युः कर्मणा कश्चिन्' इत्येतदनुपपन्नमेवेत्युक्तं भवति । वक्ष्यति चास्य पक्षस्य स्वयमेव निराकरणम्— 'कर्मोदये कर्मफलानुरागात्तत्रानुयान्ति न तरन्ति मृत्युम् । ज्ञानेन विद्वांस्तेजोऽभ्येति नित्यं न विद्यते ह्यन्यथा तस्य पन्थाः' इति ॥

कथमेतदवगम्यते 'प्रमादो मृत्युरप्रमादोऽमृतत्वम्' इति? तत्राह—

प्रमादाद्वा असुराः पराभव-
न्नप्रमादाद्ब्रह्मभूताः सुराश्च ।

न वै मृत्युर्व्याघ्र इवात्ति जन्तू-
न्नाप्यस्य रूपमुपलभ्यते हि ॥ ५ ॥

प्रमादान् स्वाभाविकब्रह्मभावप्रच्यवनात् अनात्मनि देहादावात्मभावात् असुराः विरोचनप्रभृतयः पराभवन् पराभूताः । तथा च श्रुतिः— 'अनुपलभ्यात्मानम्' इत्यारभ्य 'देवा वा असुरा वा ते पराभविष्यन्ति' इत्यन्तेन । तथा अप्रमादात् स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मना अवस्थानात् ब्रह्मभूताः सुराश्च इन्द्रादयः । तथा च श्रुतिः— 'तं वा एतं देवा आत्मानमुपासते तस्माच्च तेषां सर्वे लोका आप्ताः सर्वे च कामाः' इत्यादिना । अथवा, असुषु प्राणेषु इन्द्रियेष्वेव रमन्त इत्यसुराः अनात्मविदो वैषयिकाः प्राणिनोऽसुराः । ते स्वाभाविकब्रह्मभावमतिक्रम्य अनात्मनि देहादावात्मभावमापन्नाः पराभवन् तिर्यगादियोनिमापन्नाः । तथा च बह्वृचब्राह्मणोपनिषत्— 'तस्मान्न प्रमाद्येत्तन्नातीयान्न ह्यत्यायन्पूर्वे येऽत्यायंस्ते परावभूवुः' इत्यारभ्य 'या वै ता इमाः प्रजास्तिस्रोऽत्यायमायंस्तानीमानि वयांसि वङ्गावगधाश्चेरपादाः' इति । तथा स्वस्मिन्नात्मन्येव रमन्ति इत्यात्मविदः सुराः । तथा चोक्तम्— 'आत्मन्येव रतिर्येषां स्वस्मिन्ब्रह्मणि चाचले । ते सुरा इति विख्याताः सूरयश्च सुरा

मताः' इति । ते अप्रमादान् स्वाभाविकब्रह्मात्मना अवस्थानान् ब्रह्मभूताः निवृत्तमिथ्याज्ञानतत्कार्याः ब्रह्मैव संवृत्ता इत्यर्थः ॥

नन्वन्य एव सर्वजन्तूनामुपसंहारको मृत्युः प्रसिद्धः, कथमुच्यते 'प्रमादं वै मृत्युमहं ब्रवीमि इति? तत्राह—न वै मृत्युरिति । न वै मृत्युर्व्याघ्र इव अत्ति भक्षयति प्राणिनः । यदि भक्षयेत् व्याघ्रस्येव अस्य रूपमुपलभ्येतः न च उपलभ्यते । तस्मान्नास्त्येव मृत्युः ॥

ननूपलभ्यते सावित्र्युपाख्याने—'अथ सत्यवतः कायात्पाशवद्धं वशं गतम । अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलात्' इति । कथमुच्यते नास्य रूपमुपलभ्यत इति? तत्राह—

यमं त्वेके मृत्युमनोऽन्यमाहु-
रात्मावासममृतं ब्रह्मचर्यम् ।
पितृलोके राज्यमनुशास्ति देवः
शिवः शिवानामशिवोऽशिवानाम् ॥

सत्यमुपलभ्यते; तथापि नासौ साक्षान्मृत्युः । कस्तर्हि? यः प्रमादाख्यो मृत्युः अज्ञानं स एव, साक्षाद्विनाशहेतुत्वात् । तथा अज्ञानस्य विनाशहेतुत्वं श्रूयते 'न चेदिहावेदीन्महती

विनष्टिः' इति। बृहदारण्यके प्रमादाख्यस्याज्ञानस्य साक्षान्मृत्युत्वं दर्शितम्—'मृत्युर्वै तमो ज्योतिरमृतम्' इति। यस्मात्प्रमाद एव साक्षात्सर्वानर्थबीजम्, तस्मान्न प्रमाद्येत चित्सदानन्दाद्वितीयब्रह्मभावेनावतिष्ठेत इत्यर्थः। तथा चाज्ञानस्य बन्धहेतुत्वं विज्ञानस्य मोक्षहेतुत्वमुक्तं भगवता—'अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः' इति। यस्मात्प्रमाद एव मृत्युः अप्रमादोऽमृतत्वम्, अत एव न कर्मसाध्यं नापि कर्मप्राप्यम्; नित्यसिद्धत्वात्, नित्यप्राप्तत्वाच्च। तथा च श्रुतिः—'एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान्। तस्यैव स्यात्पदवित्तं विदित्वा न लिप्यते कर्मणा पापकेन' इति। तथा—'तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय' 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः' इति ज्ञानस्यैव मोक्षसाधनत्वं दर्शितम्। तथा—'न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा। ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः' इति। वक्ष्यति च भगवान् ज्ञानस्यैव मोक्षसाधनत्वम्—'अन्तवन्तः क्षत्रिय ते जयन्ति लोकाञ्जनाः कर्मणा निर्मितेन' इति, 'एवं मृत्युं जायमानं विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योः' इति च। तथा च मोक्षधर्मे—'कर्मणा बध्यते जन्तुर्विद्यया

च विमुच्यते । तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः' इति । 'ज्ञानं विशिष्टं न तथा हि यज्ञा ज्ञानेन दुर्गं तरते न यज्ञैः' इति च । तथा च ज्ञानस्यैव मोक्षसाधनत्वं मन्यमानः सर्वकर्मपरित्यागमाह भगवान वेदाचार्यो मनुः—'यथोक्तान्यपि कर्माणि परिहाप्य द्विजोत्तमः । आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान' इति । तथाह भगवान्परमेश्वरः—'ज्ञानं तु केवलं सम्यगपवर्गफलप्रदम् । तस्माद्भवद्भिर्विमलं ज्ञानं कैवल्यसाधनम् ॥ विज्ञातव्यं प्रयत्नेन श्रोतव्यं दृश्यमेव च । एकः सर्वत्रगो ह्यात्मा केवलश्चितिमात्रकः ॥ आनन्दो निर्मलो नित्यः स्यादेतत्सांख्यदर्शनम् । एतदेव परं ज्ञानमेतन्मोक्षोऽनुगीयते ॥ एतत्कैवल्यममलं ब्रह्मभावश्च वर्णितः । आश्रित्यैतत्परं तत्त्वं तन्निष्ठास्तत्परायणाः ॥ गच्छन्ति मां महात्मानो यतयो वीतमत्सराः' इति । ननु एवं चेत्तर्हि कर्माणि नानुष्ठेयानि ? न नानुष्ठेयानि, किंतु ज्ञानिना अननुष्ठेयान्येव। तथा चाह भगवान्वासुदेवः—'यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः । आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते' इति । तथा च ब्रह्माण्डपुराणे कावषेयाः—'किमद्य नश्चाध्ययनेन कार्यं किमर्थवन्तश्च मखैर्यजामः । प्राणं हि वाप्यनले जोहवीमः प्राणानले जुहवीमीति वाचम्' इति । तथा

च बह्वृचब्राह्मणोपनिषत्— 'किमर्थं वयमध्येष्यामहे' इति। तथा च बृहदारण्यके विदुषः कर्मसंन्यासं दर्शयति— 'एतद्ध स्म वैतत्पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति ते ह स्म पुत्रेषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति इति। तथा लैङ्गे— 'ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः। नैवास्ति किंचित्कर्तव्यमस्ति चेन्न स तत्त्ववित्' इति। तथा च आथर्वणी श्रुतिः— 'नैतद्विद्वानृषिणा विधेये न रुन्ध्यते विधिना शब्दकारः' इति। केन तर्ह्यनुष्ठेयानि? अज्ञानिना आरुरुक्षुणा सर्वकर्माणि सर्वदा अनुष्ठेयानि; न ज्ञानिना। तथा चाह भगवान्— 'लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ। ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्' इति 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते' इति च। तथा चाह भगवान्सत्यवतीसुतः— 'द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः। प्रवृत्तिलक्षणो धर्मो निवृत्तौ च व्यवस्थितः' इति॥

नन्वेवमारुरुक्षूणामपि कर्माणि नानुष्ठेयानि, कर्मणां बन्धहेतुत्वात्। तथा चोक्तम्— 'कर्मणा बध्यते जन्तुर्विद्यया

च विमुच्यते' इति । सत्यम्, तथापि ईश्वरार्थतया फलनिरपेक्षमनुष्ठीयमानानि न बन्धहेतूनि । तथा चोक्तं भगवता—'यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः । तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर' इति । किमर्थं तर्हि तेषामनुष्ठानम् ? सत्त्वशुद्ध्यर्थमिति ब्रूमः । तथा चोक्तं भगवता—'कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि । योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये इति, 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्' इति, 'गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः । यज्ञायाचरतः कर्म समग्रं प्रविलीयते' इति च । तथा च—'कषायपक्तिः कर्माणि ज्ञानं तु परमा गतिः । कषाये कर्मभिः पक्वे ततो ज्ञानं प्रवर्तते' इति । ननु कर्मणामपि मोक्षहेतुत्वं श्रूयते—'विद्यां चाविद्यां च यस्तद्वेदोभयं सह' इति 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' इति च । तथा च मनुः—'तपो विद्या च विप्रस्य निःश्रेयसकरे उभे' इति । नैतत्, पूर्वापराननुसंधाननिबन्धनोऽयं भ्रमः । तथा हि—'विद्यां चाविद्यां च यस्तद्वेदोभयं सह' इत्युक्त्वा 'अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते' इति विद्याविद्ययोर्भिन्नविषयत्वेन समुच्चयाभावः श्रुत्यैव दर्शितः । इममेवार्थं स्पष्टयन् भगवान्मनुः— 'तपो विद्या च विप्रस्य निःश्रेयसकरे उभे'

इत्युक्ते समुच्चयाशङ्का मा भूदिति 'तपसा कल्मषं हन्ति विद्ययामृतमश्नुते' इति तपसो नित्यनैमित्तिकलक्षणस्य कर्मणः अन्तःकरणशुद्धावेव विनियोगं दर्शितवान। तथा 'ईशावास्यमिदं सर्वम्' इति सर्वस्य तावन्मात्रत्वमुक्त्वा तदात्मभूतस्य सर्वस्य तावन्मात्रत्वं पश्यतस्तद्दर्शनेनैव कृतार्थस्य साध्यान्तरमपश्यतः 'तेन त्यक्तेन भुञ्जीथाः' इति त्यागेनैवात्मपरिपालनमुक्त्वा अतदात्मवेदिनः केन तर्हि आत्मपरिपालनमित्याशङ्क्याह— 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे' इति। एवंभूते त्वयि नरमात्राभिमानिन्यज्ञे अविद्यानिमित्तोत्तरपूर्वाघयोरश्लेषविनाशाभावात् कुर्वन्नेव सदा यावज्जीवं कर्म जिजीविषेदित्यज्ञस्य नरमात्राभिमानिनः शुद्ध्यर्थं यावज्जीवं कर्माणि दर्शयति। अत एभिरपि वाक्यैः शुद्धिसाधनत्वमेवावगम्यते, न मोक्षसाधनत्वम्। यदप्युक्तम्— 'तेनेति ब्रह्मवित्पुण्यकृत्तैजसश्च' इति च-शब्दात्समुच्चयोऽवगम्यते इति— तदपि प्रसिद्धश्रुतिविनियोगानुसारेणैव योजयितव्यम्। तथा च अनुगीतासु स्पष्टमाह भगवान कर्मणां शुद्धिद्वारेणैव मोक्षसाधनत्वम्— 'नित्यनैमित्तिकैः शुद्धैः फलसङ्गविवर्जितैः। सत्त्वशुद्धिमवाप्याथ योगारूढो भविष्यति॥ योगारूढस्ततो

याति तद्विष्णोः परमं पदम् ॥ गुरुभक्त्या च भृत्या च धर्म-भक्त्या श्रुतेन च । विष्णुभक्त्या च सततं ज्ञानमुत्पद्यतेऽमलम् ॥ तस्माद्धर्मपरो भूत्वा वेदास्तिक्यसमन्वितः । कुर्वन्वै नित्यकर्माणि यथाशक्ति स बुद्धिमान ॥ फलानि पर आसाद्य वासुदेवे परात्मनि । शुद्धसत्त्वो भवत्येव योगारूढश्च जायते इति । वक्ष्यति च भगवान सनत्सुजातः शुद्धिद्वारेणैव मोक्ष-साधनत्वम्— 'तदर्थमुक्तं तपसैव कर्मणा ताभ्यामसौ पुण्य-मुपैति विद्वान । पुण्येन पापं विनिहत्य पश्चात्स जायते ज्ञान-विदीपितात्मा' 'ज्ञानेन चात्मानमुपैति विद्वान' इति । ननु कथं सत्त्वशुद्धिद्वारेणैव मोक्षसाधनत्वम ? विनापि सत्त्वशुद्धि ज्ञानेनैव मोक्षः सिध्यत्येव । सत्यम् । ज्ञानेनैव मोक्षः सि-ध्यति; किंतु तदेव ज्ञानं सत्त्वशुद्धिं विना नोत्पद्यत इति वयं ब्रूमः । तथा चोक्तम— 'ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः' इति । तथा—'अनेकजन्मसंसारचिते पापसमुच्चये । नाक्षीणे जायते पुंसां गोविन्दाभिमुखी मतिः ॥ जन्मान्तर-सहस्रेषु तपोध्यानसमाधिभिः । नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते' इति । तथा चोक्तं भगवता— 'अनेकजन्म-संसिद्धस्ततो याति परां गतिम । तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ॥ कर्मिभ्यश्चाधिको योगी तस्मा-

योगी भवार्जुन' इति । 'स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः । स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् । स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः इति । तथा चाह याज्ञवल्क्यः— 'तथाविपक्वकरण आत्मज्ञानस्य न क्षमः' इति । यस्मान विशुद्धसत्त्वस्यैव नित्यानित्यविवेकद्वारेण मोक्षसाधनज्ञाननिष्पत्तिः, तस्मात्सत्त्वशुद्ध्यर्थं सर्वेश्वरमुद्दिश्य सर्वाणि वाङ्मनःकायलक्षणानि श्रौतस्मार्तानि कर्माणि समाचरेत् यावद्विशुद्धसत्त्व इहामुत्रफलभोगविरागो योगारूढो भवति । तथा चाह भगवान— 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते इति, 'संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः' इति । तस्य लक्षणमुक्तम्— 'यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते । सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते' इति । यस्तु पुनरेवं यज्ञदानादिना विशुद्धसत्त्व इहामुत्रफलभोगविरागो योगारूढो भवति, तस्य शम एव कारणं न कर्म । तथा चोक्तम्— 'योगारूढस्य तस्यैव शमः कारणमुच्यते' इति । यस्माद्योगारूढस्य शम एव कारणं न कर्म, तस्माच्छमदमादिसाधनसंपन्नः श्रवणादिसमन्वितः 'योगी युञ्जीत सततमात्मानं रहसि स्थितः । निराशीर्यतचित्ता-

त्मा त्यक्तसर्वपरिग्रहः ॥' कथं तर्हि योगानुष्ठानम् ? शृणु— समे देशे शर्करावह्निवालुकाशब्दजलाशयादिवर्जिते मनोनुकूले शुचौ नात्युच्छ्रितं नातिनीचं चेलाजिनकुशोत्तरं स्थिरमासनं प्रतिष्ठाप्य, तत्रोपविश्यासनं स्वस्तिकं पद्मासनं वा लब्ध्वा, समं कायशिरोग्रीवं धारयन्, विश्वादीन क्रमेण कार्यकारणविनिर्मुक्ते पूर्णात्मनि उपसंहृत्य, पूर्णात्मना स्थित्वा, ध्यायेत्पुरिशयं देवं पूर्णानन्दं निरञ्जनम् अपूर्वमनपरं ब्रह्म नेति नेत्यादिलक्षणम् अशनायाद्यसंस्पृष्टमनुदितानस्तमितज्ञानात्मनावस्थितं परमात्मानमोमिति । तथा चोक्तं ब्रह्माण्डपुराणे कावषेयगीतासु— 'तस्माद्विमोक्षाय कुरु प्रयत्नं दुःखाद्विमुक्तो भवितासि येन । ॐ ब्रह्म शून्यं परमं प्रधानमानन्दमात्रं प्रणवं जुषस्व' इति । एवं युञ्जन सदात्मानं परमात्मत्वेन यदा साक्षाज्जानाति, तदा निरस्ताज्ञानतत्कार्यो वीतशोकः कृतकृत्यो भवति । तथा च बृहदारण्यके— 'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरीरमनु संज्वरेत्' इति । तथा च ईशावास्ये— 'यस्मिन्सर्वाणि भूतानि आत्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति । तथा च कठवल्लीषु— 'तं दुर्दशं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् । अध्या-

त्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति' 'निचाय्य तं मृत्युमुखात्प्रमुच्यते' इति। 'आनन्दं ब्रह्मणो विद्वान, न बिभेति कुतश्चन' इति। 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे'। तथा चाह भगवान्— 'अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते। तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि' 'एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत' इति। तथा च कावषेयगीतासु— 'आत्मनः शोकसंतीर्णो न बिभेति कुतश्चन। मृत्योः सकाशान्मरणादथवान्यकृताद्भयात्॥ न जायते न म्रियते न वध्यो न च घातकः। न बद्धो बद्धकारी वा न मुक्तो न च मोक्षदः॥ पुरुषः परमात्मायं यत्ततोऽन्यदसच्च तत्। अज्ञानपाशे निर्भिन्ने च्छिन्ने महति संशये॥ शुभाशुभे च संकीर्णे दग्धे बीजे च जन्मनाम्। प्रयाति परमानन्दं तद्विष्णोः परमं पदम्' इति। तथा चाह भगवान्मनुः— 'सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्। तद्ह्यग्रं सर्वविद्यानां प्राप्यते ह्यमृतं ततः' 'एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः। प्राप्यैतत्कृतकृत्यो हि द्विजो भवति नान्यथा' इति। यस्मात्तद्विज्ञानादेव परमपुरुषार्थप्राप्तिः, तस्मात्तमेव च परमात्मानं पूर्णानन्दमात्मत्वेन जानीयात्

'अहमस्मि' इति; न किंचिदन्यच्चिन्तयेत् । तथा च श्रुतिः— 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहूञ्शब्दान्वाचो विग्लापनं हि तत्' इति । 'तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ' इति । 'एतज्ज्ञेयं नित्यमेवात्मसंस्थं नातः परं वेदितव्यं हि किंचित्' इति । तथा च भगवान्वासुदेवः— 'संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः । मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥ शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया । आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत्' इति । एवं प्रसङ्गात्सर्वशास्त्रार्थः संक्षेपतः प्रदर्शितः ॥

अथेदानीं प्रकृतमनुसरामः— यस्मात्प्रमाद एव सर्वानर्थबीजं तस्मात्प्रमादं वै मृत्युमहं ब्रवीमि, न यमम् । यमं तु पुनः एके विषयविषान्धाः अविद्यारूढाः स्वात्मव्यतिरेकेण द्वितीयं पश्यन्तो मृत्युम् अतो मयोक्तान्मृत्योः प्रमादाख्यान अन्यं मृत्यवन्तरं वैवस्वतम् आहुः आत्मावासम् आत्मनि बुद्धौ वसतीत्यात्मावासः तम् । तथा चाह मनुः— 'यमो वैवस्वतो राजा यस्तवेष हृदि स्थितः । तेन चेदविवादस्ते मा गङ्गां मा कुरून्गमः' इति । अमृतम अमरणधर्माणं ब्रह्मचर्यं ब्रह्मणि स्वात्मभूते रममाणं ब्रह्मनिष्ठमित्यर्थः । श्रूयते

कठवल्लीषु— 'कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हति' इति। किंच, पितृलोके राज्यमनुशास्ति देवः। कथमनुशास्ति? शिवः सुखप्रदः शिवानां पुण्यकर्मणाम्, अशिवः असुखप्रदः अशिवानां पापकर्मणाम्॥

एवं तावत् 'प्रमादं वै मृत्युम्' इति मृत्योः स्वरूपं निर्धारितम्। अथेदानीं तस्यैव कार्यात्मनावस्थानं दर्शयति—

आस्यादेष निःसरते नराणां
क्रोधः प्रमादो मोहरूपश्च मृत्युः।
अहंगतेनैव चरन्विमार्गा-
न्न चात्मनो योगमुपैति किंचित्॥ ७॥

यः प्रमादाख्यः अज्ञानमृत्युः स प्रथममात्मना परिणमते। आस्यः अभिमानात्मकोऽहंकारः। तथा चोक्तम्—'सर्वार्थाक्षेपसंयोगादसुधातुसमन्वयात्। आस्य इत्युच्यते घोरो ह्यहंकारो गुणो महान्' इति। एवमहंकारात्मना स्थित्वा ततोऽहंकारात् निःसरते निर्गच्छति कामात्मना। ततः कामः स्वविषये प्रवर्तमानः प्रतिहतः क्रोधः प्रमादो मोहरूपश्च भवति। ततः अहंगतेन अहंरूपमापन्नेनाहंकाराद्यात्मना अवस्थितेनाज्ञानेन तदात्मभावमापन्नः 'ब्राह्मणोऽहं क्षत्रियोऽहं

कृशोऽहं स्थूलोऽहम् अमुष्य पुत्रोऽस्य नप्ता' इत्येवमात्मको रागद्वेषादिसमन्वितः चरन् विमार्गान श्रौतस्मार्तविपरीतमार्गान् न चात्मनः परमात्मनो योगं समाधिलक्षणम् उपैति किंचिदपि । अथवा, अविद्याकामकर्माणि संसारस्य प्रयोजकभूतानि । पूर्ववत् मोहो मृत्युः संमतो यः इत्यनेनाग्रहणान्यथाग्रहणात्मिका अविद्योक्ताः उत्तरत्र कर्मोदये इति कर्म वक्ष्यति । अथेदानीं कामोऽभिधीयते— अस्यन्ते क्षिप्यन्तेऽनेन संसारे प्राणिन इत्यास्यः कामः । अथवा, आस्यवदास्यं सर्वजग्धृत्वात् । तथा चोक्तं भगवता— 'काम एष क्रोध एषः' इति । एष मृत्युरास्यात्मना कामात्मना स्थित्वा ततः क्रोधात्मना परिणमते । उक्तं च— 'कामात्क्रोधोऽभिजायते' इति । ततः अहंगतेन अहंकारमापन्नेनाज्ञानेन अहंकारममकारफलकारूढेन चिदाभासेन चरन्विमार्गान्न चात्मनो योगमुपैति किंचित् ॥

किंच—

ते मोहितास्तद्वश वर्तमाना
इतः प्रेतास्तत्र पुनः पतन्ति ।
ततस्तं देवा अनु परिप्लवन्ते
अतो मृत्युं मरणादभ्युपैति ॥ ८ ॥

तेन अहंकारादिरूपेण परिणताज्ञानेन ते मोहिताः देहादिष्वात्मभावमापादिताः तद्वशे अहंकाराद्यात्मना परिणतप्रमादाख्यमृत्युवशे वर्तमाना इतः अस्मान् प्रेता धूमादिमार्गेण गत्वा तत्र परलोके यावत्संपातमुषित्वा पुनः आकाशवायुवृष्टिसस्यान्नशुक्रशोणितादिक्रमेण देहग्रहणाय पतन्ति निपतन्ति। श्रूयते च— 'तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते' इति। ततः अनन्तरं पुनः देहग्रहणावस्थायां तं देवा इन्द्रियाणि अनुसृत्य कर्माणि परि समन्तान् प्रवन्ते समन्ततः परिवर्तन्त इत्यर्थः। अतः अस्मात्कारणादिन्द्रियगुणानुसरणात् मृत्युं मरणं याति। ततो मरणान् जन्मान्तरम् अभ्युपैति ततो मृत्युम्। एवं जननमरणप्रबन्धाधिरूढो न कदाचिद्विमुच्यत इत्यर्थः। आत्माज्ञाननिमित्तत्वात्संसारस्य यावत् परमात्मानमात्मत्वेन साक्षान्न विजानाति तावदयं तापत्रयाभिभूतो मकरादिभिरिव रागादिभिरितस्ततः समाकृष्यमाणः मोमुह्यमानः संसरन्नवतिष्ठत इत्यर्थः॥

एवं तावदविद्याकामयोः बन्धहेतुत्वमभिहितम्। अथेदानीं कर्मणां बन्धहेतुत्वमाह—

कर्मोदये कर्मफलानुरागा-
स्तत्रानुयान्ति न तरन्ति मृत्युम्।

सदर्थयोगानवगमात्समन्ता-
त्प्रवर्तते भोगयोगेन देही ॥ ९ ॥

अमृत्युः कर्मणा केचिन् इति कर्मणा अमृतत्वं भवतीति यन्मतान्तरमुपन्यस्तम्, तन्निराकरोति— न केवलं कर्मणा अमृतत्वं भवति, अपि तु कर्मोदये कर्मणामुत्पत्तौ कर्मफलानुरागाः सन्तः तत्र तस्मिन्कर्मफले अनुयान्ति । यस्मात्तत्रैवानुयान्ति, अतो न तरन्ति मृत्युं पुनः पुनः जननमरणात्मके संसारे परिवर्तन्त इत्यर्थः । कस्मात्पुनः कर्मोदये कर्मफलानुरागाः तत्रैव परिवर्तन्ते? सदर्थयोगानवगमात् सदर्थेन योगः सदर्थयोगः परमात्मना योगः तस्य सदर्थयोगस्य एकत्वस्य अनवगमात् स्वात्मनश्चिदानन्दाद्वितीयब्रह्मभावानवगमादित्यर्थः । समन्तात् समन्ततः प्रवर्तते भोगयोगेन विषयरसबुद्ध्या देही । यथा ह्यन्धो निम्नोन्नतकण्टकस्थलादिषु परिभ्रमति एवमसावपि विवेकहीनः सर्वत्र विषयसुखाकाङ्क्षया परिभ्रमति ॥

किंच—

तद्वै महामोहनमिन्द्रियाणां
मिथ्यार्थयोगेऽस्य गतिर्हि नित्या ।

मिथ्यार्थयोगाभिहतान्तरात्मा
स्मरन्नुपास्ते विषयान्समन्तात् ॥

यद्रागाभिभूतस्य इन्द्रियाणां विषयेषु वर्तनं तत् महामोहनम् । एतदुक्तं भवति—यस्य विषयेषु अवास्तवबुद्धिः तस्येन्द्रियाणि विषयेषु न प्रवर्तन्ते । तस्य विषयेषु प्रवृत्त्यभावात् प्रत्यगात्मन्येव प्रवृत्तिः, ततश्च मोहननिवृत्तिः । यस्य विषयेषु वास्तवबुद्धिः तस्येन्द्रियाणां परागभूतेषु विषयेषु प्रवृत्तत्वात् न स इमं सदद्वितीयं प्रत्यग्भूतं परमात्मानमात्मत्वेन साक्षाज्जानाति । तथा चोक्तम्—'स्त्रीपिण्डसंपर्ककलुषीकृतचेतसो विषयविपान्धा ब्रह्म न जानन्ति' इति । ततश्च महामोहनं पुनः पुनः विषयेषु प्रवृत्तिः । तथा चाह भगवान्मनुः—'न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते' इति । ततश्च मिथ्यार्थैरविद्यापरिकल्पितैः शब्दादिविषयैः योगो भवति; तस्मिन् मिथ्यार्थयोगे अस्य देहिनो गतिः संसारगतिः नित्या नियता । प्रसिद्धं ह्येतत्— स्वात्मभूतं परमात्मानमनवगम्य विषयेषु प्रवर्तमानाः परागभूतास्तिर्यगादियोनिं प्राप्नुवन्तीति । तथा च बह्वृचब्राह्मणोपनिषत्— 'या वै ता इमाः प्रजास्ति-

स्रोऽत्यायमायंस्तानीमानि वयांसि वङ्गावगधाश्चेरपादाः' इति। वक्ष्यति च— 'कामानुसारी पुरुषः कामाननु विनश्यति' इति। कस्मात्पुनः मिथ्यार्थयोगेऽस्य गतिर्हि नित्या इति? तत्राह— मिथ्यार्थयोगाभिहतान्तरात्मा इति। मिथ्याभूत-विषयसंयोगेन अभिहतान्तरात्मा अभिहतस्वाभाविकब्रह्मात्म-भावः स्मरन स्त्र्यादिविषयान तानेव उपास्ते, न परमात्मानं समन्तान् समन्ततः ॥

ततः किमिति चेन् तत्र यद्भवति तन् शृणु—

अभिध्या वै प्रथमं हन्ति चैनं
कामक्रोधौ गृह्य चैनं तु पश्चात्।
एते बालान्मृत्यवे प्रापयन्ति
धीरास्तु धैर्येण तरन्ति मृत्युम् ॥ ११ ॥

अभिध्या विषयाभिध्यानं प्रथमं हन्ति विनाशयति स्वरूपा-त्प्रच्युतिं करोति। ततो विषयध्यानाभिहतम् एनं विषयसं-निधौ शीघ्रं प्रगृह्य कामश्च हन्ति, ततः कामाभिहतमेनं प्रगृह्य क्रोधश्च हन्ति। तत एते अभिध्यादयः तानभिध्याकामक्रोधव-शं गतान् बालान् विवेकहीनान्मूढान मृत्यवे प्रापयन्ति प्रक्षिप-न्ति। श्रूयते च कठवल्लीषु— 'पराचः कामाननुयन्ति बाला-

स्ते मृत्योर्यन्ति विततस्य पाशम् । अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह न प्रार्थयन्ते' इति । धीरास्तु पुनः धैर्येण विषयान् जित्वा परमात्मानमात्मत्वेनावगम्य तरन्ति मृत्युम् । श्रूयते च— 'निचाय्य तं मृत्युमुखात्प्रमुच्यते' इति ॥

कथं पुनर्धीरास्तु धैर्येण विषयान जित्वा मृत्युं तरन्तीत्याह—

योऽभिध्यायन्नुत्पतिष्णून्निहन्या-
दनाचारेणाप्रतिबुध्यमानः ।
स वै मृत्युं मृत्युरिवात्ति भूत्वा
ह्येवं विद्वान्योऽभिहन्तीह कामान् ॥

योऽभिध्यायन् अनित्याशुचिदुःखानुविद्धतया चिन्तयन् उत्पतिष्णून् उत्पत्योत्पत्य पतन्तीत्युत्पतनशीला उत्पतिष्णवो विषयाः तान् निहन्यात् परित्यजेत् अनाचारेण अनादरेण औदासीन्येनामेध्यदर्शन इव अप्रतिबुध्यमानः पुनरचिन्तयन् स वै पुरुषो मृत्योरपि मृत्युर्भूत्वा मृत्युरिवात्ति मृत्युम् । उक्तं च— 'विषयप्रतिसंहारं यः करोति विवेकतः । मृत्योर्मृत्युरिति ख्यातः स विद्वानात्मवित्कविः' इति ॥

एवमनित्यादिरूपेण विद्वाननादरादिना अभिहन्ति कामान् । यस्तु पुनरनादरादिना नाभिहन्ति स किं करोतीत्याह—

कामानुसारी पुरुषः कामाननु विनश्यति ।
कामान्व्युदस्य धुनुते यत्किंचित्पुरुषो रजः ॥

यस्तु पुनर्विषयाभिध्यानेन कामानुसारी भवति स कामाननु विनश्यति कामविषये नष्टे कामाननु कामैः सह विनश्यति, अनित्याः कामगुणाः प्रतिक्षणं विनाशान्विताः, तद्वत्कामी विशीर्णो भवति । यस्तु पुनर्विषयदोषदर्शनेन कामान्परित्यजति स कामान्व्युदस्य परित्यज्य धुनुते विवेकबुद्धया ध्वंसयति यत्किंचिन् इह जन्मनि जन्मान्तरे वा उपार्जितं रजः पुण्यपापादिलक्षणं कर्म ॥

कथं पुनरस्य देहस्य काम्यमानस्य हेयत्वमित्याशङ्क्याह—

देहोऽप्रकाशो भूतानां नरकोऽयं प्रदृश्यते ।
गृध्यन्त एव धावन्ति गच्छन्तः श्वभ्रमुन्मुखाः ॥

यः अयं भूतानां देहो दृश्यते सः अप्रकाशः तमोऽचिद्घनः केवलं नरकः श्लेष्मासृक्पूयाक्रिमिविण्मूत्रपरिपूर्णत्वात् । तच्चाह भगवान्मनुः— 'अस्थिस्थूणं स्नायुबद्धं मांसशोणितवेष्टितम् । चर्मापिनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥ जराशोकसमाविष्टं रोगायतनमातुरम् । रजस्वलमनित्यं च भूतावासमिमं त्यजेत्' इति । एवमत्यन्तबीभत्सितमपि स्त्र्यादिदेहं

कमनीयबुद्ध्या गृध्यन्तः अभिकाङ्क्षन्त एव धावन्ति अनुधावन्ति । गच्छन्तः श्वभ्रमुन्मुखाः यथा अन्धाः कूपादिकं विवेक्तुमशक्ताः कूपादिपून्मुखाः पतन्ति एवं स्त्र्यादिकमभिकाङ्क्षन्तो विषयविषान्धाः उन्मुखाः नरकेष्वेव पतन्तीत्यर्थः ॥

य एवं गृध्यन्त एव धावन्ति तेषां देहो निरर्थक इत्याह—

अमन्यमानः क्षत्रिय कञ्चिदन्यं
नाधीयते तार्ण इवास्य व्याघ्रः ।
क्रोधाल्लोभान्मोहभयान्तरात्मा
स वै मृत्युस्त्वच्छरीरे य एषः ॥ १५ ॥

यः स्त्र्यादिकमभिकाङ्क्षन् अनुधावति स विषयविषान्धः तद्व्यतिरिक्तं स्वात्मभूतं परमात्मानम् अमन्यमानः अप्रतिबुध्यमानः नाधीयते तद्विषयमध्यात्मशास्त्रं नाधिगच्छति । तस्य अस्य विषयविषान्धस्य षडङ्गवेदविदुषोऽपि देहस्तृणनिर्मितो व्याघ्र इव निरर्थको भवति । तथा चाह भगवान्वसिष्ठः— 'चतुर्वेद्यपि यो विप्रः सूक्ष्मं ब्रह्म न विन्दति । वेदभारभराक्रान्तः स वै ब्राह्मणगर्दभः' इति । न केवलं देहो निरर्थकः, य एवंभूतः स एव तस्य मृत्युरित्याह— क्रोधाल्लोभान्मोह-

भयान्तरात्मा इति । क्रोधलोभाभ्यां हेतुभ्यां मोहभयसमन्वितः अन्तरात्मा त्वच्छरीरे य एष तवात्मा दृश्यते स एव तव मृत्युः । यस्तु पुनः अजितेन्द्रियः क्रोधलोभादिसमन्वितो विषयेषु प्रवर्तते स एव तस्य मृत्युः विनाशहेतुत्वात् । उक्तं च— 'आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः' इति ॥

केन तर्ह्युपायेन मृत्योर्विनाश इत्याह—

एवं मृत्युं जायमानं विदित्वा
ज्ञानेन तिष्ठन्न बिभेति मृत्योः ।
विनश्यते विषये यस्य मृत्यु-
र्मृत्योर्यथा विषयं प्राप्य मर्त्यः ॥ १६ ॥

एवं क्रोधादिरूपेण जायमानं प्रमादाख्यं मृत्युं जननमरणादिसर्वानर्थबीजं विदित्वा क्रोधादीन भूतदाहीयान दोषान् परित्यज्य अक्रोधादीन संपाद्य ज्ञानेन चित्सदानन्दाद्वितीयब्रह्मात्मना तिष्ठन्न बिभेति मृत्योः । तथा च श्रुतिः— 'आनन्दं ब्रह्मणो विद्वान, न बिभेति कुतश्चन' इति । कस्मात्पुनर्ज्ञानेन तिष्ठन्न बिभेति मृत्योरिति ? तत्राह— विनश्यते तस्य ज्ञानिनो विषये गोचरे परमात्मनि साक्षात्क्रियमाणे प्रमादाख्योऽज्ञानमृत्युः । यथा मृत्योः विषयं संसारमागतो मृत्युना

अभिभूतो नष्टो भवति मर्त्यः एवमात्मवेदिनो विषयमागतोऽज्ञानमृत्युर्नष्टो भवति। उक्तं च नाममहोदधौ— 'ज्ञानसंस्थानसद्भावो ज्ञानाग्निर्ज्ञानवज्रभृत्। मृत्युहन्तेति विख्यातः स वीरो वीतमत्सरः' इति ॥

एवं तावत् 'कर्मोदये' इत्यादिना कर्मणां बन्धहेतुत्वमुक्त्वा 'ज्ञानेन तिष्ठन्न बिभेति मृत्योः' इति ज्ञानस्यैव मोक्षसाधनत्वमभिहितम्। तत्र चोदयति धृतराष्ट्रः—

धृतराष्ट्र उवाच—

यानेवाहुरिज्यया साधुलोका-
न्द्विजातीनां पुण्यतमान्सनातनान्।
तेषां परार्थं कथयन्तीह वेदा
एतद्विद्वान्नैति कथं नु कर्म ॥ १७ ॥

ननु कथं कर्मणां बन्धहेतुत्वम्? यावता यानेवाहुरिज्यया ज्योतिष्टोमादिना साधुलोकान् साधुभिः धार्मिकैरारूढान् पुण्यतमान् पवित्रान् सनातनान्। तेषां ब्रह्मलोकपर्यन्तानां लोकानां परार्थं परमपुरुषार्थत्वं कथयन्ति इह अस्मिन् संसारमण्डले वेदाः। एतत् लोकानां परमपुरुषार्थत्वं विद्वान् कथं नु साधनं कर्म नैति नानुतिष्ठति। अथवा, एतत्

ब्रह्मलोकपर्यन्तानां लोकानां साधनभूतं कर्म विद्वान ब्रह्मविन् कथं नैति न गच्छति ॥

एवं पृष्टः प्राह भगवान—

सनत्सुजात उवाच—

एवं ह्यविद्वान्परियाति तत्र
तथार्थजातं च वदन्ति वेदाः ।
स नेहायाति परं परात्मा
प्रयाति मार्गेण निहन्त्यमार्गान् ॥ १८॥

सत्यम् एवं ब्रह्मलोकादिसाध्यं सुखं मन्यमानो विषयविषान्धो ह्यविद्वान् परियाति तत्र तस्मिन् ब्रह्मलोकादिसाधनभूते कर्मणि न विद्वान; अविद्यादिदोषदर्शनात् । तथा च बृहदारण्यके— 'अनन्दा नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्त्यविद्वांसोऽबुधा जनाः' इति । तथा अर्थजातं प्रयोजनजातं च तस्यैव अविदुषो वदन्ति वेदाः । यस्मादविदुष एव वदन्ति न विदुषः, तस्मान् नेह सः विद्वान् ब्रह्मलोकाद्यनित्यसुखे तत्साधने वा कर्मणि आयाति प्रवर्तते । किं तर्हि करोति? परमात्मानमात्मत्वेनावगम्य परात्मा सन् ब्रह्मैव सन परं प्रयाति । मार्गेण निहन्ति

च अमार्गान् संसारहेतुभूतानात्मनो विरुद्धमार्गान् धर्माधर्मोपासनारूपान् । अथवा, 'एवं हि विद्वान्परियाति तत्र' इति पाठे सगुणं ब्रह्म विद्वान तत्र ब्रह्मलोकादावुपासनफलं परियाति प्राप्नोति । तथा अर्थजातं च अस्य वदन्ति वेदाः । कीदृशं वदन्ति ? स नेहायाति स विद्वानिह अस्मिन् लोके कर्मिवन्नायाति न जायते, किंतु ब्रह्मोपासनया अमार्गान् विरुद्धमार्गान् निहन्ति । एवं तत्र गत्वा संसारहेतूनमार्गान्निहत्य परात्मा सन कालेन परं ब्रह्म प्रयातीत्यर्थः ॥

एवं तावत्प्रमादाख्यम्याज्ञानस्य मृत्युत्वम् अप्रमादस्य स्वरूपावस्थानलक्षणस्यामृतत्वम् 'प्रमादं वै मृत्युमहं ब्रवीमि' इत्यादिना दर्शयित्वा 'आस्यादेष निःसरते' इत्यादिना 'म वै मृत्युस्त्वच्छरीरे य एषः' इत्यन्तेन तस्यैव कार्यात्मना परिणतस्य सर्वानर्थहेतुत्वं दर्शयित्वा, कथमस्य मृत्योर्विनाश इत्याशङ्क्य, 'एवं मृत्युं जायमानं विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योः' इत्यात्मज्ञानेन मृत्युविनाशं दर्शयित्वा, 'यानेवाहुरिज्यया' इत्यादिना ब्रह्मलोकादेः पुरुषार्थत्वमाशङ्क्य, 'एवं ह्यविद्वान' इत्यादिना तेषामविद्यावद्विषयत्वेनापुरुषार्थत्वमुक्त्वा, 'परं परात्मा प्रयाति मार्गेण' इति ज्ञानमार्गेण मोक्षः उपदिष्टः । तत्र 'परं परात्मा प्रयाति' इति

जीवपरयोरेकत्वमुक्तम् । तदसहमानश्चोदयति धृतराष्ट्रः—

धृतराष्ट्र उवाच—

कोऽसौ नियुङ्क्ते तमजं पुराणं
स चेदिदं सर्वमनुक्रमेण ।
किं वास्य कार्यमथवासुखं च
तन्मे विद्वन्ब्रूहि सर्वं यथावत् ॥ १९ ॥

ननु यदि स एव सत्यादिलक्षणः परमात्मा क्रमेणाकाशादि धरित्र्यन्तं जगत्सृष्ट्वा तदनुप्रविश्यान्नमयाद्यात्मना अवस्थितः संसरति चेत्, कोऽसौ तं सत्यादिलक्षणं पुराणमजं संसारे नियुङ्क्ते प्रेरयति । किमन्येन, स्वयमेवेति चेत्, किं वास्य नानायोनिषु वर्तमानस्य कार्यं प्रयोजनम्? अथवा, नानायोनिष्वप्रवर्तमानस्य तूष्णीभूतस्य स्वे महिम्नि व्यवस्थितस्य संसारानननुप्रवेशे असुखम् अनर्थजातं वा किं भवति? हे विद्वन्, मे ब्रूहि सर्वं यथावत् । तथा च ब्रह्मविदामेकः पुण्डरीको भगवान्याज्ञवल्क्यः तत एव सर्वस्य सृष्टिमुक्त्वा तस्यैव जीवत्वमभ्युपगम्य—'यद्येवं स कथं ब्रह्म पापयोनिषु जायते । स ईश्वरः कथं भावैरनिष्टैः संप्रयुज्यते' इति । 'कोऽसौ नियुङ्क्ते' इत्यनेन भगवतोक्तमेव ब्रह्मजीववादपक्षे वावदूकचोद्यं स्पष्टमुक्तवान् ॥

एवं पृष्टः प्राह भगवान्—

सनत्सुजात उवाच—

दोषो महानत्र विभेदयोगे
ह्यनादियोगेन भवन्ति नित्याः ।
तथास्य नाधिक्यमपैति किंचि-
दनादियोगेन भवन्ति पुंसः ॥ २० ॥

यद्येवं चोदयत एषोऽभिप्रायः—नियोज्यनियोजकत्वादिभेददर्शनादेकस्य कूटस्थस्य तदसंभवान् भेदेन भवितव्यमिति । तत्र यदि ब्रह्मण एव नानात्वमभ्युपगम्यते, तदा अत्र अस्मिन विभेदयोगे ब्रह्मणो नानात्वयोगे दोषो महान्; को दोषः? अद्वैतिनो ह्यतथ्यवादिनोऽवैदिका भवेयुः, वेदहृदयं परमार्थमद्वैतं च बाध्यं स्यान्। किंच—नानारूपेण परिणतत्वादनित्यत्वादिदोषः, अस्थूलादिवाक्यविरोधश्च प्रसज्येत ।

अथोच्यते—ब्रह्मणो नानात्वं नास्माभिरभ्युपगम्यते, अपि तु जीवपरयोर्भेदोऽभ्युपगम्यते इति । तत्रापि महान् दोषो विनाशः प्राप्नोति । श्रूयते च, 'यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति' 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' 'अथ योऽन्यां देवतामुपास्ते

परमात्मनो मायया बहुरूपत्वमुपपद्यत एवेत्यर्थः। श्रूयते च एकस्य मायया बहुरूपत्वम्— 'रूपं रूपं प्रतिरूपो बभूव' 'इन्द्रो मायाभिः पुरुरूप ईयते' 'एको देवः सर्वभूतेषु गूढः' 'एकं सद्विप्रा बहुधा वदन्ति' 'एकं सन्तं बहुधा कल्पयन्ति' 'एको देवो बहुधा निविष्टः' 'एकः सन बहुधा विचारः' 'त्वमेकोऽसि बहूननुप्रविष्टः' 'अजायमानो बहुधा विजायते' इति। तथा च मोक्षधर्मे— 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्' इति। तथा च याज्ञवल्क्यः— 'आकाशमेकं हि यथा घटादिषु पृथग्भवेत्। तथात्मैकोऽप्यनेकश्च जलाधारेष्विवांशुमान्' इति। तथा च कावषेयगीतासु— 'एकश्च सूर्यो बहुधा जलाधारेषु दृश्यते। आभाति परमात्मापि सर्वोपाधिषु संस्थितः॥ ब्रह्म सर्वशरीरेषु बाह्ये चाभ्यन्तरे स्थितम्। आकाशमिव कुम्भेषु बुद्धिगम्यो न चान्यथा' इति। तथा चाह परमेश्वरः—'नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः। एकः सन्भिद्यते शक्त्या मायया सर्वभावतः' इति। यस्मादेकस्यैव मायया बहुरूपत्वम्, तस्मात्स एव कारणात्मा परमेश्वरः कार्यात्मानं जीवात्मानं नियुङ्क्ते कृतप्रयत्नापेक्षः सन्मायया, न परमार्थतः संसरति संसारयति वा। तथा चोक्तं

कावषेयगीतासु— 'न जायते न म्रियते न वध्यो न च घातकः । न बद्धो बन्धकारी वा न मुक्तो न च मोक्षदः ॥ पुरुषः परमात्मा तु यत्ततोऽन्यदसच्च तत्' इति । तथा चाह् भगवान्परमेश्वरः— 'अहं प्रशास्ता सर्वस्य मायातीतस्वभावतः । न चाप्ययं संसरति न च संसारयेत्प्रभुः' इति । किंच, मायानिमित्तभेदेऽभ्युपगम्यमाने अस्य परमात्मनः कार्यकारणात्मना अवस्थितस्यापि आधिक्यं स्वरूपाधिक्यं नापैति किंचित् किंचिदपि, मायात्मकत्वात्संसारस्य पूर्ववत्कूटस्थ एव भवतीत्यर्थः । यस्मादेवं तस्मात् अनादियोगेन अनाद्यविद्यायोगेन भवन्ति पुंसः पुमांसो जीवाः बहवो भवन्ति । अथवा, पुंसः पुरुषस्य पूर्णस्य परमात्मनो या माया अनादिसिद्धा तद्योगेन बहवो भवन्ति । तथा चैतत्सर्वमनुगीतासु स्पष्टमाह—

अज्ञानगुणरूपेण तत्त्वरूपेण च स्थितम् ।
ममत्वे यदि संसारो नोच्छिद्येत कथंचन ॥
अविद्याशक्तिसंपन्नः सर्वयोनिषु वर्तते ।
तत्त्याज्यं सर्वविदुषां मोहनं सर्वदेहिनाम् ॥
तन्नाशेन महानात्मा राजते नात्र संशयः ।
अहंकारस्य विजये ह्यात्मा सिद्धो भविष्यति ॥
सिद्धे चात्मनि निर्दुःखी पूर्णबोधो भविष्यति ।
र्णबोधं परानन्दमनन्तं लोकभावनम् ॥

भजत्यव्यभिचारेण परमात्मानमच्युतम् ।
तद्भक्तस्तत्प्रसादेन ज्ञानानलसमन्वितः ॥
अखिलं कर्म दग्ध्वान्यैर्विष्णवाख्यममृतं शुभम् ।
प्राप्नोति सर्वसिद्धार्थमिति वेदानुशासनम् ॥ इति ।

तथाहि भगवान्परमगुरुः पराशरः आत्मव्यतिरिक्तस्य सर्वस्य मिथ्यात्वं दर्शयति—

ज्ञानस्वरूपमत्यन्तनिर्मलं परमार्थतः ।
तमेवार्थस्वरूपेण भ्रान्तिदर्शनतः स्थितम् ॥
ज्ञानस्वरूपमखिलं जगदेतदबुद्धयः ।
अर्थस्वरूपं पश्यन्तो भ्राम्यन्ते मोहसंप्लवे ॥
ये तु ज्ञानविदः शुद्धचेतसस्तेऽखिलं जगत् ।
ज्ञानात्मकं प्रपश्यन्ति त्वद्रूपं परमेश्वर ॥

ज्ञानस्वरूपो भगवान्यतोऽसा-
वशेषमूर्तिर्न तु वस्तुभूतः ।
ततो हि शैलाब्धिधरादिभेदा-
ञ्जानीहि विज्ञानविजृम्भितानि ॥

यदा तु शुद्धं निजरूपि सर्व-
कर्मक्षये ज्ञानमपास्तदोषम् ।
तदा हि संकल्पतरोः फलानि
भवन्ति नो वस्तुषु वस्तुभेदाः ॥

वस्त्वस्ति किं कुत्रचिदादिमध्य-
पर्यन्तहीनं सततैकरूपम् ।
यच्चान्यथात्वं द्विज याति भूयो
न तत्तथा तस्य कुतो हि तत्त्वम् ॥

मही घटत्वं घटतः कपालिका
कपालिका चूर्णरजस्ततोऽणुः ।
जनैः स्वकर्मस्तिमितात्मनिश्चयै-
रालक्ष्यते ब्रूहि किमत्र वस्तु ॥

तस्मान्न विज्ञानमृतेऽस्ति किंचि-
त्क्वचित्कदाचिद्द्विज वस्तुजातम् ।
विज्ञानमेकं निजकर्मभेद-
विभिन्नचित्तैर्बहुधाभ्युपेतम् ॥

ज्ञानं विशुद्धं विमलं विशोकमशेषदोषादिनिरस्तसङ्गम् ।
एकं सदैकं परमः परेशः स वासुदेवो न यतोऽन्यदस्ति ॥

सद्भाव एष भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यमन्यत् ।
एतत्तु यत्संव्यवहारभूतमत्रापि चोक्तं भुवनाश्रयं ते ॥

परमार्थस्तु भूपाल संक्षेपाच्छ्रूयतां मम ।
एको व्यापी समः शुद्धो निर्गुणः प्रकृतेः परः ॥

जन्मवृद्ध्यादिरहितो ह्यात्मा सर्वगतोऽव्ययः ।
परज्ञानमयोऽसद्भिर्नामजात्यादिभिर्विभुः ॥

न योगवान्न युक्तोऽभून्नैव पार्थिव योक्ष्यति ।

तस्यात्मपरदेहेषु सतोऽप्येकमयं हि तत् ॥

विज्ञानं परमार्थोऽसौ द्वैतिनोऽतथ्यदर्शिनः ।
तदेतदुपदिष्टं ते संक्षेपेण महामते ॥

परमार्थसारभूतं यत्तदद्वैतमशेषतः ।
सितनीलादिभेदेन यथैकं दृश्यते नभः ॥
भ्रान्तिदृष्टिभिरात्मापि तथैकः सन्पृथक्कृतः ॥

एकः समस्तं यदिहास्ति किंचि-
त्तदच्युतो नास्ति परं ततोऽन्यत् ।
सोऽहं स च त्वं स च सर्वमेत-
दात्मस्वरूपं त्यज भेदमोहम् ॥

इतीरितस्तेन स राजवर्यस्तत्याज भेदं परमार्थदृष्टिः ।
स चापि जातिस्मरणाप्रबोधस्तत्रैव जन्मन्यपवर्गमाप ॥

ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ॥

विस्तारः सर्वभूतस्य विष्णोर्विश्वमिदं जगत् ।
द्रष्टव्यमात्मनस्तस्मादभेदेन विचक्षणैः ॥

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति ॥

तद्भावभावमापन्नस्तदासौ परमात्मना ।
भवत्यभेदी भेदश्च तस्याज्ञानकृतो भवेत् ॥

ज्ञानमेव परं ब्रह्म ज्ञानं बन्धाय चेष्यते ।
ज्ञानात्मकमिदं सर्वं न ज्ञानाद्विद्यते परम् ॥
विद्याविद्ये च मैत्रेय ज्ञानमेवोपधारय ॥ इति ।

तथा चैतत्सर्वं स्पष्टमाह भगवान् सनत्सुजातः ब्रह्माण्ड-पुराणे कावषेयगीताप्रसङ्गे— 'वेदान्पठध्वं विधिवद्व्रतानि कृत्वा विवाहं च मखैर्यजध्वम् । उत्पाद्य पुत्रान्वयसो विरामे देहं त्यजध्वं नियतास्तपोभिः' इति । 'किमद्य नश्चाध्ययनेन कार्यं किमर्थवन्तश्च मखैर्यजामः । प्राणं हि वाप्यनले जोहवीमः प्राणानले जोहवीमीति वाचम्' इति कृतकृत्यत्वेन यज्ञाद्यनुष्ठानेन आत्मनः प्रयोजनाभावं दर्शयित्वा 'स्वर्गात्तु वेश्यागृहसंनिवेशात्पुण्यक्षयान्ते पतनं स्यादवश्यम् । मनुष्यलोके विजरा विदुःखम् ...' इति यज्ञादिसाध्यस्य लोकस्यानित्यत्वादिदोषदुष्टत्वेन हेयत्वं दर्शयित्वा यजुर्वेदोपनिषदि 'सत्यं परं परम्' इत्यारभ्य सत्यादीनां माहात्म्यं दर्शयित्वा 'न्यासः' इत्यारभ्य 'तानि वा एतान्यवराणि तपाꣳसि न्यास एवात्यरेचयत्' इत्यन्तेन नित्यसिद्धनिरतिशयानन्द-ब्रह्मप्राप्तिसाधनस्य तत्साधनत्वेन अपरादनित्यफलसाधनाद्यज्ञादेः सर्वस्मादुत्कृष्टत्वं संन्यासस्योक्तं तत्रैव श्रूयते— 'न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । परेण नाकं नि-

हितं गुहायां विभ्राजते यद्यतयो विशन्ति । वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः । ते ब्रह्मलोकेषु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इति । तथा च बृहदारण्यके सर्वकर्मसंन्यासं दर्शयति— 'एतं वैतमात्मानं विदित्वा ब्राह्मणाः पुत्रेषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति' इति । तथा च भगवान्वासुदेवः सर्वकर्मसंन्यासं दर्शयति—'निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः । शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः । सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ॥ यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति । शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः । सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥ असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः । नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ॥ सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः' इति । तथा चानुगीतासु कर्मणि प्रयोजनाभावं दर्शयति भगवान्— 'नैव धर्मी न चाधर्मी न चैव हि शुभाशुभी । यः स्यादेकासने लीनस्तूष्णीं किंचिदचिन्तयन्' इति । 'प्रवृत्ति-

लक्षणो योगो ज्ञानं संन्यासलक्षणम् । तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान्' इति । तथा च शान्तिपर्वणि शुकं प्रत्युपदिष्टवान्भगवान्व्यासः— 'कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते । तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ एषा वै विहिता वृत्तिः पुरस्ताद्ब्रह्मणा स्वयम् । एषा पूर्वतरैः सद्भिराचीर्णा परमर्षिभिः ॥ प्रव्रजेच्च परं स्थानं पारिव्राज्यमनुत्तमम् । तद्भावानेवमभ्यस्य वर्ततां श्रूयतां तथा' इति । तथा च सर्वकर्मसंन्यासं दर्शयति भगवान्नारदः— संन्यस्य सर्वकर्माणि संन्यस्य विपुलं तपः । संन्यस्य विविधा विद्याः सर्वं संन्यस्य चैव हि ॥ शक्यं त्वेकेन मुक्तेन कृतकृत्येन सर्वशः । पिण्डमात्रमुपाश्रित्य चरितुं सर्वतोदिशम् ॥ हित्वा गुणमयं पाशं कर्म हित्वा शुभाशुभम् । उभे सत्यानृते त्यक्त्वा एवं भवति निर्गुणः ॥ परिग्रहं परित्यज्य भव तात जितेन्द्रियः । अशोकस्थानमातिष्ठ इह चामुत्र चाभयम्' इति । तथा च सर्वकर्मसंन्यासिन एव ज्ञाने अधिकारः नेतरस्येत्याह भगवान्बृहस्पतिः— 'प्रसृतैरिन्द्रियैर्दुःखी तैरेव नियतः सुखी । रागवान्प्रकृतिं ह्येति विरक्तो ज्ञानमाप्नुयात्' इति । तथा चाश्वमेधिके ब्रह्मणा सम्यगुक्तं मुनीन्प्रति सर्वाश्रमिणां सर्वकर्मसंन्यासे अधिकार इति— 'गृहस्थो ब्रह्म-

चारी वा वानप्रस्थोऽथ वा पुनः। य इच्छेन्मोक्षमास्थातुमुत्तमां वृत्तिमाश्रयेत्' इति। 'एतत्तु ब्राह्मणं वृत्तमाहुरेकपदं सुखम्। एषा गतिर्विरक्तानामेष धर्मः सनातनः' इति। यस्मादेवं तस्माद्विविदुषोर्मुमुक्षोश्च सर्वकर्मसंन्यास एवाधिकारः॥

एवं तावदेकस्यैव परमात्मनोऽनादिमायायोगेन बहुरूपत्वमुक्तम्। इदानीं यदीश्वरस्य जगत्कारणत्वं तदपि मायोपाधिकमित्याह—

यदेतदद्धा भगवान्स नित्यं
विकारयोगेन करोति विश्वम्।
तथा च तच्छक्तिरिति स्म मन्ये
तदर्थयोगे च भवन्ति वेदाः॥ २१॥

यदेतत् अद्धा परमार्थभूतो भगवान् ऐश्वर्यादिसमन्वितः सः परमेश्वरो नित्यं विकारयोगेन ईक्षणादिपूर्वकं विश्वं करोति इति तत्सर्वं तथा तच्छक्तिः परमात्मनः शक्तिः मायैव करोति न परमात्मा अपूर्वादिलक्षणः इति स्म मन्ये। न स्वतः चिदानन्दाद्वितीयस्य कारणत्वम्, किंतु मायावेशवशादित्यर्थः। किं तर्ह्यस्य तथाभूतशक्तियोगे प्रमाणमिति चेत्,

तत्राह—तदर्थयोगे तस्य परमात्मनो जगदुपादानभूतमायार्थ-योगे च भवन्ति वेदाः । तस्य मायासद्भावे वेदाः प्रमाणं भवन्तीत्यर्थः । तथा च श्रुतिः—'इन्द्रो मायाभिः पुरुरूप ईयते' 'अस्मान्मायी सृजते विश्वमेतत्' 'मायिनं तु महे-श्वरम्' 'देवात्मशक्तिं स्वगुणैर्निगूढाम्' इति । तथा चाह भ-गवान्वासुदेवः—'दैवी ह्येषा गुणमयी मम माया दुरत्यया । अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन । प्रकृतिं स्वा-मधिष्ठाय संभवाम्यात्ममायया ॥ मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्' इति । तथा च— 'माया तवेयमज्ञातपदार्थान-तिमोहिनी । अनात्मन्यात्मविज्ञानं यया मूढोऽधिरोहति ॥ इय-मस्य जगद्धातुर्माया कृष्णस्य गह्वरी । धार्यधारकभावेन यया संपीडितं जगत् ॥ अहो स्म दुस्तरा विष्णोर्मायेयमतिगह्वरी । यया मोहितचित्तस्तु न वेत्ति परमेश्वरम्' इति ॥

एवं तावत् 'प्रमादं वै मृत्युमहं ब्रवीमि' इत्यादिना मृत्योः स्वरूपं तस्य कार्यात्मनावस्थानं तन्निमित्तं चानेकानर्थं दर्शयि-त्वा केन तर्ह्यस्य विनाश इत्याशङ्क्य 'एवं मृत्युं जायमानं विदित्वा ज्ञानेन तिष्ठन्न बिभेति मृत्योः' इत्यादिना आत्मज्ञा-नादेवाभयप्राप्तिं दर्शितां श्रुत्वा प्रासङ्गिके चोद्यद्वये परिहृते, कर्मस्वरूपविज्ञानाय प्राह धृतराष्ट्रः—

धृतराष्ट्र उवाच—

यस्माद्धर्मानाचरन्तीह केचि-
त्तथाधर्मान्केचिदिहाचरन्ति ।
धर्मः पापेन प्रतिहन्यते वा
उताहो धर्मः प्रतिहन्ति पापम् ॥ २२॥

यस्माद्धर्मान् अग्निहोत्रादीन् आचरन्ति इह लोके केचित् । तथा अधर्मानिहाचरन्ति । कि तेषां धर्मः पापेन प्रतिहन्यते वा? उताहो स्विन् धर्मः प्रतिहन्ति पापम्? अथवा तुल्यबलत्वेनान्यतरेण अन्यतरस्यापि नाशः? इति ॥

अविदुष उभयोरनुभव एव, नान्यतरेणान्यतरस्य नाशः । विदुषः पुनरुभयोरपि ज्ञानाग्निना नाश इत्युत्तरमाह—

सनत्सुजात उवाच—

तस्मिन्स्थितो वाप्युभयं हि नित्यं
ज्ञानेन विद्वान्प्रतिहन्ति सिद्धम् ।
अथान्यथा पुण्यमुपैति देही
तथागतं पापमुपैति सिद्धम् ॥ २३ ॥

एवं पृष्टः प्राह भगवान् सनत्सुजातः—

तस्मिन् पुण्यापुण्यात्मके कर्मणि स्थितोऽपि कुर्वन्नपि उभयं पुण्यापुण्यलक्षणं कर्म नित्यं नियमेन विद्वान् ज्ञानेन प्रतिहन्ति विनाशयति । कथमेतदवगम्यते ज्ञानेन विद्वान्प्रतिहन्तीति ? तत्राह— सिद्धं प्रसिद्धं ह्येतच्छ्रुतिस्मृतीतिहासपुराणेषु । तथा च श्रुतिः— 'भिद्यते हृदयग्रन्थिः' इत्यादिः ; 'यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते' इति ; 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते' इति 'तथा विद्वान्पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति' इति । 'अश्व इव रोमाणि विधूय पापम्' इति । 'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन' इति । अथान्यथा ज्ञानविहीनश्चेत् पुण्यमुपैति देही तथागतं पापमुपैति तत्फलं चोपभुङ्क्ते । कथमेतदवगम्यत इति चेत्, तत्राह— सिद्धं प्रसिद्धं ह्येतदपि श्रुतिस्मृतीतिहासपुराणादिषु । तथा च श्रुतिः— 'इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः । नाकस्य पृष्ठे सुकृतेन भूत्वेमं लोकं पुनरेवाविशन्ति' इति । 'अनन्दा नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः' इति ॥ तथैव वासुदेवः— 'त्रैविद्या माम्' इति, 'ते तं भुक्त्वा स्वर्गलोकं विशालम्' इति च ॥

किमविदुषः अनुभव एवोभयोः, उतान्यतरेणान्यतरनाश इति, तत्राह—

गत्वोभयं कर्मणा भुज्यतेऽस्थिरं
शुभस्य पापस्य स चापि कर्मणा ।
धर्मेण पापं प्रणुदतीह विद्वा-
न्धर्मो बलीयानिति तस्य विद्धि ॥ २४ ॥

गत्वा परलोकं प्राप्य उभयं पुण्यापुण्यसाध्यं फलं पुण्यापुण्यलक्षणेन कर्मणा भुज्यते अस्थिरम् । श्रूयते च बृहदारण्यके—'यो वा एतदक्षरं गार्ग्यविदित्वास्मिँल्लोके जुहोति' इति । 'अथ येऽन्यथातो विदुरन्यराजानस्ते क्षय्यलोका भवन्ति' इति च्छान्दोग्ये। स चापि सोऽपि विद्वान् कर्मणा धर्मेण पापं प्रणुदति विनाशयति इह लोके विद्वान् वक्ष्यमाणलक्षणो विनियोगज्ञ ईश्वरार्थं कर्मानुतिष्ठन् । तथा च वक्ष्यति—'तदर्थमुक्तं तप एतदिज्या ताभ्यामसौ पुण्यमुपैति विद्वान् । पुण्येन पापं विनिहत्य पश्चात्स जायते ज्ञानविदीपितात्मा ॥ ज्ञानेन चात्मानमुपैति विद्वानथान्यथा स्वर्गफलानुकाङ्क्षी । अस्मिन्कृतं तत्परिगृह्य सर्वममुत्र भुङ्क्ते पुनरेति मार्गम्' इति । 'येषां धर्मे च विस्पर्धा न तद्विज्ञानसाधनम् । येषां धर्मे न

च स्पर्धा तेषां तज्ज्ञानसाधनम्' इति । यश्चैवं विनियोगज्ञ ईश्वरार्थं कर्मानुतिष्ठति, तस्य विदुषो धर्मः पापान् बलीयान् इति विद्धि विजानीहि । तस्य पुनः केवलकर्मिणो न बलीयान् ; तस्योभयोरनुभव एव नान्यतरेणान्यतरस्य विनाशः ॥

केषां तर्हि स्वर्गादिसाधनम्, केषां वा चित्तशुद्धिद्वारेण ज्ञानसाधनम्? इति ; तत्राह श्लोकद्वयेन—

येषां धर्मेषु विस्पर्धा
बले बलवतामिव ।
ते ब्राह्मणा इतः प्रेत्य
स्वर्गे यान्ति प्रकाशताम् ॥ २५ ॥

येषां धर्मे न च स्पर्धा
तेषां तज्ज्ञानसाधनम् ।
ते ब्राह्मणा इतो मुक्ताः
स्वर्गं यान्ति त्रिविष्टपम् ॥ २६ ॥

येषां विषयपराणां स्वर्गादिवासे ऊर्वश्यादिभोगश्रवणात्तत्साधनभूतेषु ज्योतिष्टोमादिषु धर्मेषु विस्पर्धा संघर्षो वर्तते अस्मादहमुत्कृष्टतरं धर्मं कृत्वा अस्मादपि सुखी भूयासमिति ।

वले वलवतामिव, यथा बलवतो राज्ञः वलवन्तं राजानं दृष्ट्वा अहमस्मादपि बलवत्तां संपाद्यैनं जित्वा अस्मादपि सुखी भूयासमिति संघर्षो वर्तते तद्वत्। ते फलसङ्गसहिताः ब्राह्मणा यज्ञाधिकारिण इतः प्रेत्य धूमादिमार्गेण गत्वा स्वर्गे नक्षत्रादिरूपेण यान्ति प्राप्नुवन्ति प्रकाशताम्। श्रूयते च—'अथ य इमे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति' इत्यारभ्य 'एष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते' इति। येषां विषयानाकृष्टचेतसामनित्यफलसाधनज्योतिष्टोमादौ धर्मे न च स्पर्धा संघर्षो न वर्तते तेषां फलनिरपेक्षमीश्वरार्थं कर्मानुतिष्ठतां तत् यज्ञादिकं कर्म शुद्धिद्वारेण ज्ञानसाधनम्। वक्ष्यति च स्वयमेव भगवान् शुद्धिद्वारेणैव ज्ञानसाधनत्वम्—'पुण्येन पापं विनिहत्य पश्चात्स जायते ज्ञानविदीपितात्मा' इति। ये यज्ञादिभिः विशुद्धसत्त्वाः परमात्मानमात्मत्वेनावगच्छन्ति, ते ब्राह्मणा इतः अस्मात्कार्यकारणलक्षणाल्लोकात्प्रेत्य मुक्ताः स्वर्गं सुखलक्षणं पूर्णानन्दं ब्रह्म यान्ति प्राप्नुवन्ति। इतरस्मात्स्वर्गादस्य वैलक्षण्यमाह—त्रिविष्टपमिति। त्रिभिराध्यात्मिकादितापैः, सत्त्वादिभिर्वा, जाग्रदादिभिर्वा विमुक्तं स्वरूपाविष्टं पातीति त्रिविष्टपम्। अथवा, तैर्विष्टमधिकारिणं पातीति त्रिविष्टपम्॥

इदानीं ब्रह्मचर्यादेव सर्वाणि कर्माणि संन्यस्य वेदान्तश्रवणादिकं कृत्वा स्वे महिम्नि व्यवस्थितस्य परमहंसपरिव्राजकाचार्यस्य विदुषः समाचारमाह—

तस्य सम्यक्समाचारमाहुर्वेदविदो जनाः ।
नैनं मन्येत भूयिष्ठं बाह्यमाभ्यन्तरं जनम् ॥

तस्य विरक्तस्य विदुषः सम्यक्समाचारमाहुर्वेदविदो जनाः नैनं योगिनं मन्येत चिन्तयेत् भूयिष्ठं बहु बाह्यमाभ्यन्तरं जनं पुत्रमित्रकलत्रादि आभ्यन्तरम. इतरद्बाह्यम् । यथा पुत्रमित्रादयो न गृह्णन्ति, तथा तेषामगोचर एव वर्तते इत्यर्थः ॥

कीदृशे देशेऽस्य वास इत्याह—

यत्र मन्येत भूयिष्ठं प्रावृषीव तृणोदकम् ।
अन्नपानं च ब्राह्मणस्तज्जीवेन्नानुसंज्वरेत् ॥

यत्र यस्मिन् मृगगोचरादिपीडारहिते देशे अन्नपानादि भूयिष्ठं बहुलं विद्यत इति मन्येत प्रावृषीव वर्षाकाले तृणोदकं बहुलं विद्यते तद्वत् । तृणोलपमिति केचित्— 'तृणोलपमिति ख्यातो मुनिभोज्यौदनादिषु' इति वदन्ति । पूज्यदूर्वाविशेष इति केचित् । तत्र स्थित्वा तत् अन्नपानादिकमुपजीवेत् ।

नानुसंज्वरेत् संतप्तो न भवेत्, अन्यथा अन्नपानादिरहिते देशे कथं नाम देहयात्रा सिध्येदिति संतप्तो भवेत्; ततश्च न योगसिद्धिः ॥

तत्राप्येवंविधजनसमीपे वास इत्याह—

यत्राकथयमानस्य प्रयच्छत्यशिवं भयम् ।
अतिरिक्तमिवाकुर्वन्स श्रेयान्नेतरो जनः ॥

यत्र यस्मिन्देशे अकथयमानस्य तूष्णींभूतस्य स्वमाहात्म्यं प्रच्छादयतो येन केनचिदाच्छन्नस्य येन केनचिदाशितस्य यत्र क्वचनशायिन आत्मानमेव लोकं पश्यतः जडमूकबालपिशाचादिवत्संचरतः परमहंसपरिव्राजकाचार्यस्य प्रयच्छत्यशिवं भयम् अकल्याणमवमानादिकं प्रयच्छति । तथा अतिरिक्तमिवाकुर्वन् यथा कश्चिन् स्थितप्रज्ञलक्षणज्ञो ब्रह्मविदिति ज्ञात्वा प्रणिपातनमस्कारादिपूर्वकमीश्वरबुद्धया पूजयति तद्वदज्ञाततया अतिरिक्तं ब्राह्मणजातिमात्रप्रयुक्तपूजातिरिक्तं पूजान्तरं ब्रह्मविदनुरूपमकुर्वन् अवमानादिकमेव कुर्वन् यो जनः, सः अस्य विदुषः श्रेयान्, नेतरः यः प्रणिपातादिपूर्वकमीश्वरबुद्धया संपूजयति । तथा चाह भगवान्मनुः— 'संमानाद्ब्राह्मणो विद्वानुद्विजेत विषादिव । अमृतस्येव चाकाङ्क्षेदवमा-

नस्य सर्वदा' इति । तथा चाह भगवान्पराशरः— 'संमानना परां हानिं योगर्द्धेः कुरुते यतः । जनेनावमतो योगी योगसिद्धिं च विन्दति इति ॥

कीदृशस्य तर्ह्यन्नं भोज्यमिति, अत्राह—

यो वाकथयमानस्य ह्यात्मानं नानुसंज्वरेत् ।
ब्रह्मस्वं नोपहन्याद्वा तदन्नं संमतं सताम् ॥

यो वा अकथयमानस्य तूष्णीं भूतस्य सर्वोपसंहारं कृत्वा पूर्णानन्दात्मना अवस्थितस्य आत्मानं नानुसंज्वरेत् न तापयेत् ब्रह्मस्वं नोपहन्याद्वा ब्रह्मनिष्ठासाधनभूतं चेलाजिनकुशपुस्तकादिकं नोपहन्याद्वा । तथा चोक्तम्— 'रत्नहेमादिकं नास्य योगिनः स्वं प्रचक्षते । कुशवल्कलचेलाद्यं ब्रह्मस्वं योगिनो विदुः' इति । अन्यदपि ब्रह्मस्वं ब्राह्मणस्वं नोपहन्याद्वा तदन्नं तस्यान्नं संमतं सतां भोज्यत्वेन ॥

पुनरपि तस्यैव समाचारमाह—

नित्यमज्ञातचर्या म इति मन्येत ब्राह्मणः ।
ज्ञातीनां तु वसन्मध्ये नैव विन्देत किंचन ॥

नित्यं नियमेन अज्ञातचर्या गूढचर्या मे मम कर्तव्येति

मन्येत ब्राह्मणः ब्रह्मवित् । ज्ञातीनां पुत्रमित्रकलत्रादीनां मध्ये संनिधौ वसन नैव विन्देत न प्रतिपद्येत किंचन किंचिदपि । कश्चनेति केचित् । योगी नैव विन्देत पुत्रमित्रकलत्रादिकं परित्यज्य केवलं स्वात्मनिष्ठो गूढचर्यो भवेदित्यर्थः । तथा च श्रुतिः— 'कुटुम्बं पुत्रदारांश्च वेदाङ्गानि च सर्वशः । यज्ञं यज्ञोपवीतं च त्यक्त्वा गूढश्चरेन्मुनिः' इति । तथा चाह भगवान्वसिष्ठः— 'यन्न सन्तं न चासन्तं नाश्रुतं न बहुश्रुतम् । न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मणः ॥ जानन्नपि च मेधावी जडवल्लोक आचरेत्' इति ॥ ईदृशस्यैव ज्ञाननिष्ठाप्राप्तिलक्षणो मोक्षः नान्यस्य, विक्षेपबाहुल्यादिति भावः । अथवा, 'नित्यमज्ञातचर्या मे अज्ञाते चक्षुराद्यविषयभूते वाचामगोचरे अनुदितानस्तमितज्ञानात्मनावस्थिते अशनायाद्यसंस्पृष्टे पूर्णानन्दस्वरूपे सर्वान्तरे प्रत्यग्भूते ब्रह्मणि चर्या निष्ठा समाधिलक्षणा मे मम कर्तव्या, न परागभूतदेहेन्द्रियपुत्रमित्रकलत्रादौ स्थूलोऽहं कृशोऽहं गच्छामि तिष्ठामि क्लीबः काणः मूको बधिरः अमुष्य पुत्रोऽस्य नप्ता ब्राह्मणोऽहं क्षत्रियोऽहं भार्या मे पुत्रो मे विभवो मे स्निग्धबन्धुसुहृदः इत्येवमात्मिका कर्तव्या' इति मन्येत ब्राह्मणो ब्रह्मवित् । तथा च श्रुतिः— 'यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यति, तदेव

ब्रह्म' इति । यस्मादेवमज्ञात एव ब्रह्मणि निष्ठा कर्तव्या, तस्मात् ज्ञातीनाम् 'क्रोधमानादयो दोषा विषयाश्चेन्द्रियाणि च । एत एव समाख्याता ज्ञातयो देहिनस्तव' इतीन्द्रियादीनां ज्ञातिशब्देनोक्तत्वात् इन्द्रियादीनां मध्ये वसन पश्यन शृण्वन स्पृशन् जिघ्रन् गच्छन् अश्नन मन्यमानो विजानन्नपि नैवमात्मानं प्रमात्रादिरूपेण विन्देत प्रतिपद्येत. तत्साक्षित्वादात्मनः । तथा च श्रुतिः—'अथ यो वेदेदं जिघ्राणीति स आत्मा' इति । देहद्वयतद्धर्मानात्मत्वेन न गृह्णीयादित्यर्थः ॥

कस्मात्पुनरेवं न गृह्यत इति, अत्राह—

को ह्येवमन्तरात्मानं ब्राह्मणो मन्तुमर्हति ।
निर्लिङ्गमचलं शुद्धं सर्वद्वन्द्वविवर्जितम् ॥

को हि निर्लिङ्गं स्थूलसूक्ष्मविवर्जितम् अचलं क्रियाकर्त्रादिशून्यं शुद्धम् अविद्यादोषरहितं सर्वद्वन्द्वविवर्जितम् अशनायापिपासाशोकमोहजरामृत्युशीतोष्णसुखदुःखादिधर्मविवर्जितम अन्तरात्मानं सर्वान्तरं प्रमात्रादिसाक्षिणमात्मानं मानाविषयभूतं एवम् उक्तेन प्रकारेण देहद्वयतद्धर्मतया 'स्थूलोऽहं कृशोऽहं गच्छामि पश्यामि मूको बधिरः काणः सुख्यहं दुःख्यहम्' इति ब्राह्मणः सन् अर्हति मन्तुम् । तथा सति ब्राह्मणत्वमेव हीयेतेत्यर्थः । वक्ष्यति च—'य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया' इति ॥

यस्त्वेवं मनुते स पापीयानित्याह—

योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥

योऽन्यथा सन्तमात्मानं ज्ञानात्मना निर्लिङ्गममलं शुद्धं सर्वद्वन्द्वविवर्जितं चित्सदानन्दाद्वितीयब्रह्मात्मना सन्तं स्वमात्मानम्, अन्यथा देहद्वयतद्धर्मात्मतया 'कर्ता भोक्ता सुखी दुःखी स्थूलोऽहं कृशोऽहं अमुष्य पुत्रोऽस्य नप्ता ब्राह्मणोऽहं क्षत्रियोऽहम्' इत्येवमात्मना प्रतिपद्यते, किं तेन मूर्खेणानात्मविदा आत्मचोरेणात्मापहारिणा न कृतं पापम्। महापातकादि सर्वं तेनैव कृतमित्यर्थः। तथा च श्रुतिः—'असुर्या नाम ते लोका अन्धेन तमसा वृताः। तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः' इति। तथा चोक्तम्—'ब्राह्मण्यं प्राप्य लोकेऽस्मिन्न मूको बधिरो भवेत्। नापक्रामति संसारात्स खलु ब्रह्मघातकः' इति। तस्माद्विषयभूतदेहेन्द्रियादिषु आत्मभावं परित्यज्य अज्ञात एव वागाद्यगोचरे परमात्मनि निष्ठा कर्तव्येत्यर्थः ॥

अन्यथा देहेन्द्रियतद्धर्मानुपश्यतः किं भवतीत्यत आह—

अश्रान्तः स्यादनादाता
संमतो निरुपद्रवः ।

शिष्टो न शिष्टवत्स स्या-
द्ब्राह्मणो ब्रह्मवित्कविः ॥ ३४ ॥

यः अनादाता अनात्मभूतदेहेन्द्रियतद्धर्मानात्मत्वेन नोपादत्ते, स पुरुषः अश्रान्तः स्यात् संसारश्रमयुक्तो न भवेत्. अशनायादेर्देहादिधर्मत्वात् । तथा च श्रुतिः— 'अशनायापिपासे प्राणस्य शोकमोहौ मनसो जरामरणे शरीरस्य' इति । देहद्वयाध्यासे हि तद्धर्माध्यासो भवति। एवमश्रान्ततया निरुपद्रवः भवति । क्रोधहर्षलोभमोहादयोऽन्तराया उपद्रवाः. तद्धीनो निरुपद्रवः, स संमतः शिष्टत्वेन विद्वद्भिः संमतः शिष्टवन्न स्यात् नाचरेत् जडवच्चरेत् ब्राह्मणो ब्रह्मवित्कविः ॥

इदानीमगूढचारिणं कुत्सयन्नाह—

ये यथा वान्तमश्नन्ति बाला नित्यमभूतये ।
एवं ते वान्तमश्नन्ति स्ववीर्यस्योपभोजनात् ॥

'मूढो बाल इति प्रोक्तः श्वा च बाल इति स्मृतः' इति दर्शनात् यथा बालाः श्वानो वा मूढा वा वान्तम् उद्गीर्णमश्नन्ति, एवं ये शिष्टा ब्रह्मविदः स्वमाहात्म्यं ख्यापयन्तः अगूढचारिणो वर्तन्ते, ते वान्तम् उद्गीर्णम् अश्नन्ति स्ववीर्यस्योपभोजनात् । यदिदं वान्ताशनं तदिदम् अभूतये अनर्थायैवेत्यर्थः । तस्माद्गूढः सन्नशिष्टवदेव समाचरेदित्यर्थः ॥

इदानीं योगिनं प्रशंसन्नाह—

अनाढ्या मानुषे वित्ते आढ्या वेदेषु ये द्विजाः ।
ते दुर्धर्षा दुष्प्रकम्प्या विद्यात्तान्ब्रह्मणस्तनुम् ॥

अनाढ्या अबहुमता असक्तात्मानः मानुषे वित्ते जायापुत्रवित्तादिषु आढ्या वेदेषु वेदप्रतिपाद्याहिंसासत्यास्तेयापरिग्रहब्रह्मचर्यसमाधिसाधनेषु ये द्विजाः, ते दुर्धर्षा दुष्प्रकम्प्या विद्यात्तान्ब्रह्मणः तनुं ब्रह्मस्वरूपभूतां विद्यात् इत्यर्थः ॥

किंच ब्रह्मविन्माहिमैषः—

सर्वान्स्विष्टकृतो देवान्विद्याद्य इह कश्चन ।
न समानो ब्राह्मणस्य यस्मिन्प्रयतते स्वयम् ॥

सर्वान् अग्न्यादीन् स्विष्टकृतः सुष्ठु इष्टं कुर्वन्तीति । तथा च श्रुतिः— 'स्विष्टं कुर्वन्स्विष्टकृत्' इति । देवान् प्रत्येकमुद्दिश्य त्यागार्थं विद्यात् य इह कश्चन सर्वदेवतायाज्यपि ब्राह्मणस्य न समानः ब्राह्मणेन ब्रह्मविदा न समान इत्यर्थः । नैतदाश्चर्यम्, यस्मिन् देवताविशेषे हविष उद्देशत्यागेन फलार्थं प्रयतते स्वयं यजमानः 'इदमग्नये इदमिन्द्राय' इति सोऽपि हविष्प्रतियोगी देवताविशेषो न समानो ब्रह्मविदा, किमु वक्तव्यं देवपशुर्यजमानो न समान इति । तथा च मोक्षधर्मे—'ब्राह्मणस्य न सादृश्ये वर्तते सोऽपि किं पुनः । इज्यते

येन मन्त्रेण यजमानो द्विजोत्तमः' इति । तथा चाह भगवान्मनुः—'ब्रह्मविद्ब्रुवः परं भूतं न किंचिदिह विद्यते' इति ॥

पुनरपि तस्यैव समाचारमाह—

यमप्रयतमानं तु मानयन्ति स मानितः ।
न मान्यमानो मन्येत नावमाने विसंज्वरेत् ॥

यं ब्रह्मविदम् अप्रयतमानं तूष्णीं भूतं सर्वोपसंहारं कृत्वा स्वे महिम्नि व्यवस्थितं ब्रह्मचर्यादेः कृतसंन्यासिनं वेदान्तविज्ञानसुनिश्चितार्थं परमहंसपरिव्राजकाचार्यं गूढचारिणं केचिद्विद्वांसः स्थितप्रज्ञलक्षणज्ञाः ब्रह्मविदिति मत्वा मानयन्ति पूज्यन्ति चेत्, सः तैः पूजितो विद्वान् न मान्यमानः अहमिति न मन्येत । तथा स्थितप्रज्ञलक्षणानामनभिज्ञाः जड इति मत्वा अवमानं कुर्वन्ति इति चेत्, तस्मिन् अवमाने निमित्ते नानुसंज्वरेत् नानुतपेत् ॥

कथं तर्हि मानितेनावमानितेन वा भवितव्यमित्याह श्लोकद्वयेन—

लोकस्वभाववृत्तिर्हि निमित्तोन्मेषवत्सदा ।
विद्वांसो मानयन्तीह इति मत्वेत मानितः ॥

अधर्मविदुषो मूढा लोकतत्त्वानभिज्ञिताः ।
न मान्यं मानयिष्यन्ति इति मत्वेदमानितः ॥

यदिदं विद्वांसो ब्रह्मविदं मानयन्ति इति तत्तेषां निमेषोन्मेषवत् स्वभाववृत्तिः स्वाभाविकी प्रवृत्तिः इति मन्येत। तथा, अवमानितो जनैरवज्ञातो विद्वानेवं मन्येत— अधर्मविदुषो मूढाः विवेकहीनाः लोकशास्त्रविवर्जिताः न मान्यं मानार्हं मानयिष्यन्ति मान्यमपि न मानयिष्यन्ति इत्येतदविदुषां स्वभावः इति मन्येत अमानितः अपूजितो विद्वान ॥

इदानीं मानमौनयोर्भिन्नाविषयत्वमाह—

न वै मानश्च मौनं च सहितौ वसतः सदा।
अयं मानस्य विषयो ह्यसौ मौनस्य तद्विदुः ॥

न वै मानश्च मौनं च सहितौ एकत्र वसतः; सदा अयं हि प्रत्यक्षादिगोचरो लोको लोक्यत इति प्रपञ्चो मानस्य विषयः इत्यर्थः। असौ परलोको मौनस्य कोऽसौ तन् विदुः तदिति ब्रह्मणो नाम। तथाह भगवान— 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' इति। तथा चानुगीतासु— 'ॐ तत्सद्विष्णवे चेति सायुज्यादिप्रदानि वै' इति। तच्छब्दवाच्यं ब्रह्म मौनस्य विषय इत्यर्थः। एतदुक्तं भवति— मानात्संसारप्राप्तिः, मौनेन ब्रह्मप्राप्तिः इति। उक्तं च हैरण्यगर्भे— 'अन्नाङ्गनादिभोगेषु भावो मान इति स्मृतः। ब्रह्मानन्दसुखप्राप्तिहेतुर्मौनमिति स्मृतः' इति ॥

इदानीं मानार्थसंवासे अपवर्गाभावं दर्शयति—

श्रीर्हि मानार्थसंवासा-
त्सा चापि परिपन्थिनी ।
ब्राह्मी सुदुर्लभा श्रीर्हि
प्रज्ञाहीनेन क्षत्रिय ॥ ४२ ॥

हे क्षत्रिय, मानार्थसंवासात् मानविषयसंवासात् मानगोचरप्रपञ्चे परिवर्तमानस्य स्वर्गपश्वन्नाद्यादिसाधनभूतं कर्मानुतिष्ठतो विषयविषान्धस्य श्रीर्हि भवति । सा चापि श्रीः परिपन्थिनी श्रेयोमार्गविरोधिनी । तथा च मोक्षधर्मे— 'निबन्धिनी रज्जुरेषा या ग्रामे वसतो रतिः । छित्त्वैनां सुकृतो यान्ति नैनं छिन्दन्ति दुष्कृतः ' इति । य एवं श्रियाभिभूतो मूढः सन्विषयेषु प्रवर्तते, तेन प्रज्ञाहीनेन विद्याहीनेन ब्राह्मी ब्रह्मानन्दलक्षणा श्रीः सुदुर्लभा । तथा च हैरण्यगर्भे— 'या नित्या चिद्घनानन्दा गुणरूपविवर्जिता । आनन्दाख्या परा शुद्धा ब्राह्मी श्रीरिति कथ्यते ' इति । सा च सुदुर्लभा श्रवणायापि न शक्या । तथा च श्रुतिः ' श्रवणायापि बहुभिर्यो न लभ्यः ' इति ॥

इदानीं ब्रह्मलक्ष्मीप्रवेशद्वाराणि दर्शयति—

द्वाराणि सम्यक्प्रवदन्ति सन्तो
बहुप्रकाराणि दुराचराणि ।
सत्यार्जवे ह्रीर्दमशौचविद्याः
षण्मानमोहप्रतिबन्धकानि ॥ ४३ ॥

इति श्रीमत्सनत्सुजातीये प्रथमोऽध्यायः ॥

द्वाराणि ब्रह्मलक्ष्मीप्रवेशद्वाराणि सम्यक्प्रवदन्ति सन्तः बहुप्रकाराणि दुराचराणि दुःखाचरणानि । कानि तानि? सत्यार्जवे सत्यं यथार्थसंभाषणं भूतहितं च । आर्जवम् अकौटिल्यम् । ह्रीः अकार्यकरणे लज्जा । दमशौचविद्याः दमः अन्तःकरणोपरतिः । बहिःकरणोपरतिरिति केचित् । शौचं कल्मषप्रक्षालनम् । विद्या ब्रह्मविद्या । षट् एतानि मानमोहप्रतिबन्धकानि ॥

इति सनत्सुजातीयभाष्ये प्रथमोऽध्यायः ॥





॥ श्रीः ॥

सनत्सुजातीयभाष्ये

द्वितीयोऽध्यायः ।

द्वितीयोऽध्यायः ॥



यं मानस्य इत्यादिना मौनमाहात्म्यं प्रदर्शितं श्रुत्वा प्राह धृतराष्ट्रः—

धृतराष्ट्र उवाच—

कस्यैष मौनः कतरन्नु मौनं
प्रब्रूहि विद्वन्निह मौनभावम् ।
मौनेन विद्वानुपयाति मौनं
कथं मुने मौनमिहाचरन्ति ॥ १ ।

कस्य कीदृशस्य एषः पुर्वोक्तो वागाद्युपरतिलक्षणो मौन. भवति । कतरन्नु एतयोरसंभाषणात्मस्वरूपयोः मौनं प्रब्रूहि हे विद्वन्, इह मौनभावं मौनस्य स्वभावं मौनेन तूष्णींभावेन विद्वानुपयाति मौनं ब्रह्म, आहोस्विदन्येन ? कथं मुने मौनमिहाचरन्ति ॥

एवं पृष्टः प्राह भगवान—

सनत्सुजात उवाच—

यतो न वेदा मनसा सहैन-
मनुप्रविश्यन्ति ततोऽथ मौनम् ।
यत्रोत्थितो वेदशब्दस्तथायं
स तन्मयत्वेन विभाति राजन् ॥ २ ॥

यतः यस्मात् वेदा मनसा सह एनं परमात्मानं नानुप्रविश्यन्ति । तथा च श्रुतिः—'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह' इति । ततः तस्मादेव कारणात् स एव वाचामगोचरः परमात्मा मौनम् । यद्येवं किंलक्षणस्तर्हि परमात्मा ? तत्राह—यत्रोत्थितो वेदशब्दः यस्मिन् अर्थे निमित्तभूते समुत्थितो वेदशब्दः शास्त्रादिकारणं ब्रह्मेत्यर्थः । अथवा, यस्मिन् संवेदनाख्ये उत्थितो वाचकत्वेन प्रयुक्तो वेदशब्द इत्यर्थः । तथा वेदशब्दप्रतिपाद्यः संविद्रूपः अयं परमात्मा । यदि वाचामगोचरः परमात्मा, कथमेतदवगम्यते संविद्रूपः परमात्मेति ? तत्राह—स परमात्मा तन्मयत्वेन ज्योतिर्मयत्वेनास्माकं विभाति राजन् । एवमेवास्माकमनुभवः नात्राविश्वासः कर्तव्य इत्यर्थः । अथवा, श्रुतिस्मृतीतिहासपुराणादिषु ज्योतिर्मयत्वेन प्रतीयते । तथा च श्रुतिः— 'तं देवा ज्योतिषां ज्योतिः' 'अन्तःशरीरे ज्योतिर्मयो हि शुभ्रो यं पश्यन्ति यतयः

क्षीणदोषाः' इति । तथा च भगवान्—' ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते' इति ॥

इदानीं वेदस्वभावपरिज्ञानाय प्राह धृतराष्ट्रः—

धृतराष्ट्र उवाच—

ऋचो यजूंष्यधीते यः सामवेदं च यो द्विजः ।
पापानि कुर्वन्पापेन लिप्यते न स लिप्यते ॥

यः पापानि कुर्वन ऋगादिवेदम् अधीते स तेन वेदाध्ययनेन पूयते न वा? एतद्वक्तुमर्हसीत्यभिप्रायः ॥

एवं पृष्टः प्राह भगवान्—

सनत्सुजात उवाच—

नैनं सामान्यृचो वापि यजूंषि च विचक्षण ।
त्रायन्ते कर्मणः पापान्न ते मिथ्या ब्रवीम्यहम् ॥

यः पापानि कुर्वन ऋगादिवेदमधीते, नैनं प्रतिषिद्धचारिणम् ऋगादयो वेदाः पापात् कर्मणः त्रायन्ते न रक्षन्ति । न ते मिथ्या ब्रवीम्यहम् एवमेवैतत्, नात्राविश्वासः कर्तव्य इत्यर्थः ॥

किं कुर्वन्तीति चेत्, तत्राह—

न च्छन्दांसि वृजिनात्तारयन्ति
मायाविनं मायया वर्तमानम् ।
नीडं शकुन्ता इव जातपक्षा-
श्छन्दांस्येनं प्रजहन्त्यन्तकाले ॥ ५ ॥

न च्छन्दांस्येनं वृजिनात् अधर्मात् नास्तिकं पापकारिणम् अधीतवेदम् अधीतवेदार्थं मायाविनं धर्मध्वजिनं मायया वर्तमानं मिथ्याचारिणं तारयन्ति न रक्षन्ति । किं करिष्यन्तीति चेत्— यथा शकुन्ताः पक्षिणः जातपक्षाः नीडं स्वाश्रयं परित्यजन्ति, एवं छन्दांसि अन्तकाले मरणकाले एनं स्वाश्रयभूतं प्रजहन्ति परित्यजन्ति, न पुरुषार्थाय भवन्तीत्यर्थः ॥

एवमुक्ते प्राह धृतराष्ट्रः—

धृतराष्ट्र उवाच—

न चेद्वेदा वेदविदं त्रातुं शक्ता विचक्षण ।
अथ कस्मात्प्रलापोऽयं ब्राह्मणानां सनातनः ॥

'कर्मोदये' इत्यादिना नित्यानां काम्यानां च पितृलोकादिप्राप्तिहेतुत्वेन संसारानर्थहेतुत्वस्य दर्शितत्वात् प्रतिषिद्धस्य कर्मणः नरकहेतुत्वेनानर्थहेतुत्वस्य दर्शितत्वात् न वेदा वेदविदं त्रातुं शक्ताश्चेत्, अथ कस्मात् हेतोः अयं प्रलापः सना-

तनः चिरंतन इत्यर्थः । संसारानर्थहेतुत्वेन वेदाध्ययनतदर्थविचारतदनुष्ठानानि न कर्तव्यानीत्यर्थः ॥

भवेदयं प्रलापः यद्येष एव वेदार्थः स्यात्, अन्य एव स्वर्गादेः परमपुरुषार्थो मोक्षाख्यो वेदार्थः; इतरस्य च कर्मणश्चोपासनायाश्च तत्प्राप्तिसाधनज्ञानसाधनान्तःकरणशुद्धिसाधनत्वेन पारम्पर्येण पुरुषार्थत्वादेव वेदप्रतिपाद्यत्वम् । तथाहि— तमेव परमात्मानं परमपुरुषार्थं दर्शयति वेदः— 'अनन्दा नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति अविद्वांसोऽबुधा जनाः' इति । स्वर्गादिलोकानामपुरुषार्थत्वमनानन्दात्मकत्वमविद्यावद्विषयत्वेन दर्शयित्वा — 'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्' इत्यात्मविदः कृतकृत्यतां दर्शयित्वा— 'इहैव सन्तोऽथ विद्मस्तद्वयं न चेदिहावेदीन्महती विनष्टिः । य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति' इत्यात्मविदोऽमृतत्वप्राप्तिमनात्मविदः आत्मविनाशमनर्थप्राप्तिं च दर्शयित्वा— 'यदैतमनुपश्यत्यात्मानं देवमञ्जसा । ईशानं भूतभव्यस्य न ततो विजुगुप्सते' इत्यादिभिर्वाक्यैस्तत्स्वरूपतदर्थदर्शनतत्फलानि भूयो भूयो दर्शयित्वा कथमेनं मकरादिभिरिव रागादिभिरितस्ततः समाकृष्यमाणं

विषयाभिभूतं पापकारिणं मोक्षयित्वा परमपदे परमात्मनि पूर्णानन्दे स्वाराज्ये मोक्षाख्ये स्थापयिष्यामीति मत्वा तत्प्राप्तिसाधनज्ञानसाधनविविदिषासाधनत्वेन यज्ञादीन्विनियुङ्क्ते— 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन' इति। तस्मात्तदर्थत्वेनैव यज्ञादीनां पुरुषार्थत्वम्। इतरत्र तु पुनः स्वर्गादौ श्येनादीनामिवापुरुषार्थत्वम्, संसारानर्थहेतुत्वात्। तथा च श्रुतिः— 'प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्यू ते पुनरेवापि यन्ति' इति। यस्मादेवं मोक्षतत्साधनप्रतिपादकत्वेन संसारानर्थनिवृत्तिहेतुत्वं वेदानाम्, तस्माद्वेदाः वेदविदं त्रातुं शक्ता एवेत्येतत्सर्वमभिप्रेत्याह श्लोकत्रयेण— तत्र प्रथमेन नित्यापरोक्षं परमपुरुषार्थं परमात्मानं दर्शयति—

सनत्सुजात उवाच—

तस्यैव नामादिविशेषरूपै-
रिदं जगद्भाति महानुभाव।
निर्दिश्य सम्यक्प्रवदन्ति वेदा-
स्तद्विश्ववैरूप्यमुदाहरन्ति ॥ ७ ॥

तस्यैव परमात्मनो मायापरिकल्पितैः नामादिविशेषरूपैः इदं जगद्भाति हे महानुभाव । कथमेतदवगम्यते तस्यैव नामादिविशेषरूपैरिदं जगद्भातीति ? 'इन्द्रो मायाभिः पुरुरूप ईयते' इति मायानिर्मितं बहुरूपं निर्दिश्य तस्यैव सम्यग्रूपम् 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्' इति प्रवदन्ति वेदाः । तथा च—'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च' इत्यादिना तस्यैव मूर्तामूर्तात्मकमात्मवज्जगत्स्वरूपं निर्दिश्य तस्य सम्यग्रूपम् 'नेति नेति' इत्यादिना प्रवदन्ति वेदाः । तथा— 'आत्मन आकाशः संभूतः' इति वियदादिधरित्र्यन्तं तस्यैव कार्यं निर्दिश्य कोशोपन्यासमुखेन तस्यैव सम्यग्रूपम्, 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह' इत्यादिना प्रवदन्ति वेदाः । 'अधीहि भगव इति होपससाद' इत्यादिना नामादिप्राणान्तं तस्यैव मायानिमित्तं जगन्निर्दिश्य 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' इत्यादिना तस्यैव सम्यग्रूपं भूमानं तमसः पारं स्वे महिम्नि व्यवस्थितं प्रवदन्ति वेदाः । न केवलं वेदाः प्रवदन्ति, अपि तु मुनयोऽपि तत् ब्रह्म विश्ववैरूप्यं विश्वरूपविपरीतरूपम् उदाहरन्ति । तथा चाह भगवान्पराशरः— 'प्रत्यस्तमितभेदं यत्सत्तामात्रमगोचरम् ।

मनसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥ तच्च विष्णोः परं रूपमरूपाख्यमनुत्तमम् । तद्विश्वरूपवैरूप्यलक्षणं परमात्मनः' इति । इदानीम् ईश्वरार्थमनुष्ठीयमानानां तत्प्राप्तिसाधनज्ञानापेक्षितशुद्धिद्वारेण पारम्पर्येण पुरुषार्थत्वम्, अन्येषां संसारानर्थहेतुत्वेनापुरुषार्थत्वं च दर्शयति श्लोकद्वयेन—

तदर्थमुक्तं तप एतदिज्या
ताभ्यामसौ पुण्यमुपैति विद्वान् ।
पुण्येन पापं विनिहत्य पश्चा-
त्स जायते ज्ञानविदीपितात्मा ॥

ज्ञानेन चात्मानमुपैति विद्वा-
न्न चान्यथा वर्गफलानुकाङ्क्षी ।
अस्मिन्कृतं तत्परिगृह्य सर्व-
ममुत्र भुङ्क्ते पुनरेति मार्गम् ॥ ९ ॥

यद्विश्वरूपविपरीतरूपं ब्रह्म तदर्थमुक्तं वेदेन । किम्? तपः कृच्छ्रचान्द्रायणादि, इज्या ज्योतिष्टोमादि । किं ततो भवतीति चेत्— ताभ्याम् इज्यातपोभ्याम् असौ विद्वान् पूर्वोक्तविनियोगज्ञः ईश्वरार्थं कर्मानुतिष्ठन् पुण्यम् उपैति प्राप्नोति

कर्मजन्यापूर्वसंयुक्तो भवति । तेन पुण्येन पापं विनिहत्य क्षपयित्वा पश्चात् उत्तरकालं क्षपिताशेषकल्मषो जायते ज्ञानविदीपितात्मा ज्ञानप्रकाशितचित्सदानन्दाद्वितीयब्रह्मस्वरूपो भवति । ज्ञानेन चात्मानं परमात्मानम् उपैति प्राप्नोति विद्वान् आत्मवित् । अन्यथा पुनरीश्वरार्थं कर्मानुष्ठानेनाक्षपिताशेषकल्मषो न ज्ञानी भवति । तदा वर्गफलानुकाङ्क्षी इन्द्रियफलानुकाङ्क्षी स्वर्गादिफलानुकाङ्क्षी सन् अस्मिन् लोके कृतं तत् यज्ञादिकं परिगृह्य सर्वम् अमुत्र परलोके तत्फलमुपभुङ्क्ते । ततः कर्मशेषेण पुनरेति मार्गं संसारमार्गम् । तथा च श्रुतिः— 'तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते ॥

इदानीं विद्वदविद्वदपेक्षया कर्मणां फलवैषम्यमाह—

अस्मिँल्लोके तपस्तप्तं फलमन्यत्र भुज्यते ।
ब्राह्मणानां तपः स्वृद्धमन्येषां तावदेव तत् ॥

अस्मिन् लोके यत् तपस्तप्तं तस्य फलम् अन्यत्र अमुष्मिन् लोके भुज्यते इति सर्वेषां समानम् । ब्राह्मणानां ब्रह्मविदां पुनरयं विशेषः— तपः स्वृद्धम् अतीव समृद्धं भवति फलवृद्धिहेतुर्भवतीत्यर्थः । तथा च श्रुतिः— 'यदेव विद्यया

करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' इति । अन्येषाम् अनात्मविदां वैषयिकाणां तावदेव तत् न समृद्धं भवति ; यस्य कर्मणो यत्फलं श्रुतं तावन्मात्रफलसाधनं न फलसमृद्धिहेतुर्भवतीत्यर्थः ॥

श्रुत्वैवमाह धृतराष्ट्रः—

धृतराष्ट्र उवाच—

कथं समृद्धमत्यर्थं तपो भवति केवलम् ।
सनत्सुजात तद्ब्रूहि कथं विद्यामहं प्रभो ॥

ऋज्वेतत् ॥

एवं पृष्टः प्राह भगवान्—

सनत्सुजात उवाच—

निष्कल्मषं तपस्त्वेतत्केवलं परिचक्षते ।
एतत्समृद्धमत्यर्थं तपो भवति नान्यथा ॥ १२ ॥

यदेतन्निष्कल्मषं तपः, तत्केवलं परिचक्षते केवलं बीजमित्युक्तम् । सर्वस्यास्य प्रपञ्चस्य बीजं निमित्तं यत् , तत्केवलमित्युक्तम् । आहोशना—'गुणसाम्ये स्थितं तत्त्वं केवलं त्विति कथ्यते । केवलादेतदुद्भूतं जगत्सदसदात्मकम्' इति । तत् एतत् एव केवलं तपः समृद्धमत्यर्थं च भवति नान्यथा यदा निष्कल्मषं

न भवति सकल्मषं स्यात् तदा समृद्धमत्यर्थं च न भवति ॥

एतदेव प्रशंसति—

तपोमूलमिदं सर्वं यन्मां पृच्छसि क्षत्रिय ।
तपसा वेदविद्वांसः परं त्वमृतमाप्नुयुः ॥ १३ ॥

स्पष्टार्थः श्लोकः ॥

श्रुत्वैवमाह राजा—

धृतराष्ट्र उवाच—

कल्मषं तपसो ब्रूहि श्रुतं निष्कल्मषं तपः ।
सनत्सुजात येनेदं विद्यां गुह्यं सनातनम् ॥

'निष्कल्मषं तपस्त्वेतत्केवलं परिचक्षते' इति श्रुतस्य तपसः कल्मषं ब्रूहि हे सनत्सुजात, येन निष्कल्मषेण तपसा इदं ब्रह्म गुह्यं सनातनं विद्याम् ॥

एवं पृष्टः प्राह भगवान्—

सनत्सुजात उवाच—

क्रोधादयो द्वादश यस्य दोषा-
स्तथा नृशंसानि च सप्त राजन् ।
ज्ञानादयो द्वादश चाततानाः
शास्त्रे गुणा ये विदिता द्विजानाम् ॥

क्रोधादयो द्वादश यस्य तपसो दोषाः तथा नृशंसानि च सप्त हे राजन, यस्य तपसो दोषाः; तथा ज्ञानादयो द्वादश च आतताना: विस्तीर्यमाणाः शास्त्रे वेदशास्त्रे ये विदिता गुणाः द्विजानां तानेतान् गुणान् दोषांश्च वक्ष्यामीत्यभिप्रायः ॥

क्रोधादीन् दर्शयति—

क्रोधः कामो लोभमोहौ विवित्सा
कृपासूया मानशोकौ स्पृहा च ।
ईर्ष्या जुगुप्सा च महागुणेन
सदा वर्ज्या द्वादशैते नरेण ॥ १६ ॥

क्रोधो नाम कामप्रतिघातादुत्पद्यमानः ताडनाक्रोशनादिहेतुः कामहानिहेतुकश्च अन्तःकरणविक्षेपो गात्रस्वेदकम्पनादिलिङ्गः । कामः स्त्र्याद्यभिलाषः । लोभः परद्रव्येच्छा, आर्जितस्य द्रव्यस्य तीर्थे विनियोगासामर्थ्यं च । मोहः कृत्याकृत्यविवेकशून्यता । विवित्सा विषयरसान्वेत्तुमिच्छा । अकृपा निष्ठुरता । असूया गुणेषु दोषाविष्करणम्, परगुणादिष्वक्षमा वा । मानः आत्मबहुमानित्वम् । शोकः इष्टार्थवियोगजोऽन्तःकरणविक्षेपः रोदनचिन्तनादिलिङ्गोऽप्रतीकारविषयः । स्पृहा विषयभोगेच्छा । ईर्ष्या परश्रियामसहिष्णुता । जुगुप्सा पर-

गुणानपह्नोतुमिच्छा वीभत्सा वा । एते क्रोधादयो दोषाः तपसः कल्मषरूपाः सदा वर्ज्याः महागुणेन ब्राह्मणेन । ब्राह्मणानामुत्कृष्टगुणयोगः स्वभावसिद्धः । तथा चोक्तं भगवता—'शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च । ज्ञानं विज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभावजम्' इति । अथवा, महागुणो ब्रह्मप्राप्तिगुणः, तेन ब्रह्मप्राप्तिलक्षणेन महागुणेन समन्वितेन सदा वर्जनीया इत्यर्थः । उक्तं च नाममहोदधौ— 'महान्ब्रह्मेति च प्रोक्तो महत्त्वान्महतामपि । तत्प्राप्तिगुणसंयुक्तो महागुण इति स्मृतः' इति ॥

तेषां सदा वर्ज्यत्वे हेतुमाह—

एकैकमेते राजेन्द्र मनुष्यं पर्युपासते ।
लिप्समानोऽन्तरं तेषां मृगाणामिव लुब्धकः ॥

यथा मृगाणाम् अन्तरं छिद्रं लिप्समानो रन्ध्रान्वेषणपरो लुब्धको मृगयुरनुवर्तते, यथा च तच्छिद्रं लब्ध्वा तान् हन्ति; तथा तेषां मनुष्याणां रन्ध्रान्वेषणपरा एते क्रोधादयः एकैकं मनुष्यं पर्युपासते । अथवा, मनुष्यान् पर्युपासते इति पाठः, तस्मिन् एकैकं पृथक् पृथक् मनुष्यान पर्युपासते इति योजना । तथा च्छिद्रं लब्ध्वा तान् घ्नन्ति । तस्मादेतेष्वेकोऽपि

दोषो विनाशकारणम्। यस्मादेवं तस्मात्सदा वर्ज्या इत्यर्थः। उक्तं च हैरण्यगर्भे— 'यथा पान्थस्य कान्तारे सिंहव्याघ्रमृगादयः। उपद्रवकरास्तद्वत्क्रोधाद्या दुर्गुणा नृणाम्' इति ॥

इदानीं नृशंससप्तकमाह—

संभोगसंविद्विषमेधमानो
दत्तानुतापी कृपणोऽबलीयान्।
वर्गप्रशंसी वनितां च द्वेष्टा
एते परे सप्त नृशंसरूपाः ॥ १८ ॥

संभोगे विषयसंभोगे संविद्बुद्धिर्यस्य वर्तते स संभोगसंवित् विषमेधमानः विषमिव परेषामुपद्रवं कृत्वा एधमानः वर्धमानः; अथवा, द्विषमेधमान इति पाठान्तरम्; द्विषं द्वेष्यं कर्म कृत्वा प्राणिनां तद्द्वारेणैव वर्धमानः। दत्तानुतापी यः पूर्वं धर्मबुद्ध्या धनादिकं दत्त्वा पश्चान् किमर्थमहं दत्तवानिति तप्तो भवति स दत्तानुतापी। कृपणः यत्किंचिदर्थलवलाभमात्रलोभात्सर्वावमानं सहते यः, स कृपणः। अबलीयान् ज्ञानबलवर्जितः। वर्गप्रशंसी इन्द्रियवर्गप्रशंसी। वनितां च द्वेष्टा अनन्यशरणां भार्यां यो द्वेष्टि सः। एते परे पूर्वोक्तेभ्यः क्रोधादिभ्यः सप्त नृशंसरूपाः ॥

इदानीं ज्ञानादयो द्वादश गुणा उच्यन्ते—

ज्ञानं च सत्यं च दमः श्रुतं च
अमात्सर्यं ह्रीस्तितिक्षानसूया ।
यज्ञश्च दानं च धृतिः शमश्च
महाव्रता द्वादश ब्राह्मणस्य ॥ १९ ॥

ज्ञानं तत्त्वार्थसंवेदनम् । सत्यं यथार्थसंभाषणं भूतहितं च । दमो मनसो दमनम् । श्रुतम् अध्यात्मशास्त्रश्रवणम् । मात्सर्यं सर्वभूतेष्वसहमानता, तदभावः अमात्सर्यम् । ह्रीः अकार्यकरणे लज्जा । तितिक्षा द्वन्द्वसहिष्णुता । अनसूया परदोषानाविष्करणम् । यज्ञः अग्निष्टोमादिः, महायज्ञश्च । दानं ब्राह्मणेभ्यो धनादिपरित्यागः । धृतिः विषयसंनिधावपि इन्द्रियनिग्रहः । शमः अन्तःकरणोपरतिः, बहिःकरणोपरतिरिति केचित् । एते ज्ञानादयो महाव्रताः परपुरुषार्थसाधनभूताः ब्राह्मणस्य ॥

ये 'ज्ञानादयो द्वादश चाततानाः' इति पूर्वत्र प्रस्तुताः, ते वर्णिताः । इदानीं गुणस्तुतिं करोति—

यस्त्वेतेभ्योऽप्रवसेद्वादशभ्यः
सर्वामिमां पृथिवीं स प्राशिष्यात् ।

त्रिभिर्द्वाभ्यामेकतो वा विमुक्ताः
क्रमाद्विशिष्टा मौनभूता भवन्ति ॥ २० ॥

यस्तु एतेभ्यः पूर्वोक्तेभ्यः अप्रवसेन् प्रवासं न करोति तैरेव समन्वितो भवेत्, स सर्वामिमां पृथिवीं प्रशिष्यात् प्रशास्ति आत्मवश्यां करोति । य एतेषां मध्ये त्रिभिर्द्वाभ्याम् एकतः एकस्मात् वा अविमुक्ताः, एतेषामन्यतमेनापि समन्वितास्ते एते क्रमेण विशिष्टा ज्ञानिनो भूत्वा मौनभूताः ब्रह्मभूता भवन्ति ॥

इदानीं दमदोषानाह श्लोकत्रयेण—

दमोऽष्टादशदोषः स्यात्प्रतिकूलं कृते भवेत् ।
अनृतं पैशुनं तृष्णा प्रातिकूल्यं तमोऽरतिः ॥

लोकद्वेषोऽभिमानश्च विषादः प्राणिपीडनम् ।
परिवादोऽतिवादश्च परितापोऽक्षमा धृतिः ॥

असिद्धिः पापकृत्यं च हिंसा चेति प्रकीर्तिताः ।
एतैर्दोषैर्विमुक्तो यः स दमः सद्भिरुच्यते ॥

दमः अष्टादशदोषः स्यात् अष्टादशदोषसमन्वितो भवति । किमेतेषां दोषत्वमिति चेत्— प्रतिकूलं कृते भवेत् एतेषा-

मन्यतमे कृते दमस्य प्रतिकूलं कृतं भवेत् । के ते? अनृतम् अयथार्थवचनम् । पैशुनं परदूषणवचनम् । तृष्णा विषयेप्सा । प्रातिकूल्यं सर्वेषां प्रतिकूलता । तमः अज्ञानम् । अरतिः अयथालाभसंतुष्टिः । अथवा, रतिः स्त्रीभोगेष्वभिरतिः । लोकद्वेषः लोकानामुद्वेगाचरणम् । अभिमानः सर्वेषामप्रणतिभावः । विवादः जनकलहाचरणम् । प्राणिपीडनं स्वदेहपूरणाय प्राणिहिंसनम् । परिवादः समक्षे परदूषणाभिधानम् । अतिवादः निरर्थकोऽतिप्रलापः । परितापः वृथादुःखचिन्तनम् । अक्षमा द्वन्द्वासहिष्णुता । अधृतिः इन्द्रियार्थेषु चपलता । असिद्धिः धर्मज्ञानवैराग्याणाम् । पापकृत्यं प्रतिषिद्धाचरणम् । हिंसा अविहितहिंसा । इति इत्थं दमदोषाः प्रकीर्तिताः । एतैः अनृतादिभिः दोषैः विमुक्तो यो गुणः सः दम इति उच्यते सद्भिः ॥

इदानीं मददोषानाह—

मदोऽष्टादशदोषः स्यात्त्यागो भवति षड्विधः ।
विपर्ययाः स्मृता एते दमदोषा उदाहृताः ॥

मदोऽष्टादशदोषः स्यात् त्यागश्च षड्विधो भवति । विपर्ययाः स्मृता एते अनृतादिहिंसान्ताः ये दमदोषत्वेन स्मृताः,

त एते विपर्ययाः स्मृताः सत्यादिरूपत्वेन स्मृताः मददोषाः मदनाशकराः उदाहृताः । के ते? सत्यापैशुनातृष्णाप्रातिकूल्यातमोऽरतिलोकाद्वेषानभिमानाविवादाप्राणिहिंसापरिवादानतिवादापरितापक्षमाधृतिसिद्ध्यपापंकृत्याहिंसा इत्येते मदनाशकरा उदाहृताः ॥

'त्यागो भवति षड्विधः' इत्युक्तम् । तत्राह—

श्रेयांस्तु षड्विधस्त्यागस्तृतीयस्तत्र दुष्करः ।
तेन दुःखं तरन्त्येव तस्मिंस्त्यक्ते जितं भवेत् ॥

श्रेयान् तु षड्विधस्त्यागः; तत्र एतेषु षड्विधत्यागेषु मध्ये तृतीयः त्यागो दुष्करो भवति दुःखसंपाद्यः । तेन तृतीयेन त्यागेन दुःखम् आध्यात्मिकादिभेदभिन्नं तरन्त्येव तस्मिन् त्यागे कृते सति सर्वं जितं भवेत् ॥

त्यागषट्कं दर्शयति—

अर्हते याचमानाय पुत्रान्वित्तं ददाति यत् ।
इष्टापूर्तं द्वितीयं स्यान्नित्यं वैराग्ययोगतः ॥२६॥

कामत्यागश्च राजेन्द्र स तृतीय इति स्मृतः ।
अप्रमादी भवेदेतैः स चाप्यष्टगुणो मतः ॥२७॥

अर्हते योग्याय याचमानाय पुत्रान् वित्तं ददाति इति यत् तदेतत्त्यागद्वयं षण्णां मध्ये प्रथमम् । इष्टापूर्तं द्वितीयं स्यात् इष्टं श्रौते कर्मणि यद्दानम् । पूर्तं स्मार्तकर्मणि । इष्टं देवेभ्यो दत्तम्, पूर्तं पितृभ्य इति केचित् । नित्यं वैराग्ययोगतः विशुद्धसत्त्वस्थानित्यत्वादिदोषदर्शिनः ततो विरक्ततया धनादिपरित्यागः कामत्यागश्च राजेन्द्र, स तृतीय इति स्मृतः । किमेतैर्भवतीत्यत आह—अप्रमादीति । अप्रमादिनां कामो नश्यति । उक्तं राजधर्मेषु— 'अपध्यानमलो धर्मो मलोऽर्थस्य निगूहनम् । अप्रमादमलः कामो भूयः स गुणवर्धनः' । य एतैः षड्भिः समन्वितः त्यागैः, सः अप्रमादी भवेत् । सः अप्रमादः अष्टगुणः अष्टभिर्गुणैः समन्वितो भवति ॥

के ते ? तान् दर्शयति—

सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च ।
अस्तेयो ब्रह्मचर्यं च तथासंग्रह एव च ॥ २८ ॥

सत्यं यथार्थसंभाषणम् । ध्यानं चेतसः कस्मिंश्चिच्छुभाश्रये मण्डलपुरुषादौ तैलधारावत्संतत्यवच्छेदिनी प्रवृत्तिः । समाधानं प्रणवेन विश्वाद्युपसंहारं कृत्वा स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मनावस्थानम् । चोद्यम् 'कोऽहं कस्य कुतो

वा' इत्यादि । वैराग्यं दृष्टानुश्रविकविषयवितृष्णता । अस्तेयः अचौर्यमात्मनो द्रव्यस्य वा । आत्मचौर्यमुक्तम्—'योऽन्यथा सन्तमात्मानम्' इति। ब्रह्मचर्यम् अष्टाङ्गमैथुनत्यागः। तथा चोक्तम्— 'स्मरणं कीर्तनं केलिर्वीक्षणं गुह्यभाषणम् । संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च ॥ एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः । विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्' इति । असंग्रहः अपरिग्रहः पुत्रदारक्षेत्रादीनाम् । एतान्परिपालयेत् ॥

दोषान् विवर्जयेदित्याह—

एवं दोषा दमस्योक्तास्तान्दोषान्परिवर्जयेत् ।
दोषत्यागेऽप्रमादः स्यात्स चाप्यष्टगुणो मतः ॥

दमोऽष्टादशदोषः स्यादिति ये दोषा उक्ताः, तान् दोषान् परिवर्जयेत् । कस्मादित्याह— तेषु दोषेषु त्यक्तेषु प्रमादी न भवेदित्यर्थः । सोऽपि अप्रमादः अष्टगुणो मतः; 'सत्यं ध्यानम्' इत्यादिना पूर्वमेवोद्दिष्टत्वादित्यर्थः ॥

इदानीं सत्यस्तुतिः क्रियते—

सत्यात्मा भव राजेन्द्र सत्ये लोकाः प्रतिष्ठिताः ।
तांस्तु सत्यमुवानाहुः सत्ये ह्यमतमाहितम् ॥

सत्यात्मा सत्यस्वरूपो भव हे राजेन्द्र, सत्ये लोकाः प्रतिष्ठिताः तांस्तु सत्यमुखान सत्यप्रधानान सत्याधीनात्मलाभान् आहुः । सत्ये हि अमृतमाहितम् ; अमृतं मोक्षः ॥

निवृत्तेनैव दोषेण तपोव्रतमिहाचरेत् ।
एतद्धात्रा कृतं वित्तं सत्यमेव सतां वरम् ॥

निवृत्तेनैव दोषेण 'क्रोधादयः' इत्यादिना पूर्वोक्तदोषरहितः सन तपोव्रतमिहाचरेत् । एतत् धात्रा परमेश्वरेण कृतं वित्तं सत्यमेव सतां वरम् ॥

इदानीम 'कथं समृद्धमत्यर्थम' इत्यनेन उपक्रान्तमर्थमुपसंहरति—

दोषैरेतैर्वियुक्तं तु गुणैरेतैः समन्वितम् ।
एतत्समृद्धमत्यर्थं तपो भवति केवलम् ॥ ३२ ॥

दोषैरेतैः 'क्रोधादयः' इत्यादिना पूर्वोक्तैः वियुक्तं तु गुणैरेतैः ज्ञानादिभिश्च समन्वितं यत् एतत्समृद्धमत्यर्थं तपो भवति केवलम् ॥

किं बहुना—

यन्मां पृच्छसि राजेन्द्र संक्षेपात्तद्ब्रवीमि ते ।
एतत्पापहरं शुद्धं जन्ममृत्युजरापहम् ॥ ३३ ॥

हे राजेन्द्र, यन्मां पृच्छसि तत् संक्षेपात् समासतः ब्रवीमि ते, एतत् वक्ष्यमाणं पापहरं शुद्धं जन्ममृत्युजरापहम् ॥

किं तदिति चेत्, तत्राह—

इन्द्रियेभ्यश्च पञ्चभ्यो मनसश्चैव भारत ।
अतीतानागतेभ्यश्च मुक्तश्चेत्स सुखी भवेत् ॥

हे भारत, इन्द्रियेभ्यः सविषयेभ्यः पञ्चभ्यः वर्तमानेभ्यः मनसश्चैव तथा अतीतेभ्यः अनागतेभ्यश्च मुक्तश्चेत्, स सुखी भवेत् मुक्त एव भवेदित्यर्थः ॥

एवमुक्ते, प्राह धृतराष्ट्रः—

धृतराष्ट्र उवाच—

आख्यानपञ्चमैर्वेदैर्भूयिष्ठं कत्थ्यते जनः ।
तथा चान्ये चतुर्वेदास्त्रिवेदाश्च तथापरे ॥ ३५ ॥
द्विवेदाश्चैकवेदाश्च अनृचश्च तथापरे ।
एतेषु मेऽधिकं ब्रूहि यमहं वेद ब्राह्मणम् ॥

आख्यानं पुराणं पञ्चमं येषां वेदानां ते आख्यानपञ्चमाः । श्रूयते च्छान्दोग्ये—'इतिहासपुराणं पञ्चमम्' इति । तैः आख्यानपञ्चमैः वेदैः भूयिष्ठम् अत्यर्थं कत्थ्यते श्लाघ्यते

बहुमन्यते सर्वस्मादधिकोऽहमिति । कथ्यते इति केचित्पठन्ति । आख्यानपञ्चमैर्वेदैः कश्चिज्जनः पञ्चवेदीति कथ्यत इत्यर्थः । तथा चान्ये चतुर्वेदाः त्रिवेदाः अपरे द्विवेदाः एकवेदाश्च अनृचश्च तथा अपरे परित्यक्तऋगादिवेदाः अपरे । एतेषु मनुष्येषु अधिकं श्रेष्ठं ब्रूहि, यमहं ब्राह्मणं वेद विद्याम् ॥

य एव स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मनावस्थितः, स एव ब्राह्मण इति दर्शयिष्यन तद्व्यतिरिक्तस्य सर्वस्य तदज्ञानमूलत्वं दर्शयति—

एकवेदस्य चाज्ञानाद्वेदास्ते बहवोऽभवन् ।
सत्यस्यैकस्य राजेन्द्र सत्ये कश्चिदवस्थितः ॥

एकस्य वेदस्य— वेद्यमिदंरूपम् अनिदंरूपम्, वेदनं वेदः— एकस्याद्वितीयस्य संविद्रूपस्येत्यर्थः । तस्य एकवेदस्य ब्रह्मणोऽनवगमाद्दगादयो वेदाः बहवोऽभवन् । अत्र ऋगादयो वेदाः तत्प्रतिपत्त्यर्थं विचारं कुर्वन्ति इति वेदाख्यानमवापुः । अथवा, सद्भावं साधयन्तीति वेदाः । विदन्ति वेदनसाधनभूता इति वा वेदाः । अथवा, ब्रह्माधीनमात्मानं लभन्त इति वा वेदाः । अथवा, ब्रह्मण आत्मतया लाभहेतव इति वा वेदाः । विद विचारणे, विद सत्तायाम्, विद

ज्ञाने, विद्ल लाभे, एतेषां धातूनां विषये वर्तन्ते यस्मात्, ततो वेदा इत्युक्ताः। तदेकवेदस्वरूपं किमिति चेत्, 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः। तस्मात् सत्यस्य एकवेदस्वरूपस्य ब्रह्मणोऽनवगमाद्वेदा बहवो व्याख्याताः सर्वे वेदास्तदर्थदर्शनहेतवः। हे राजेन्द्र, त्वमपि किमेवं ज्ञात्वा सत्येव ब्रह्मणि स्थितोऽसि? कश्चित् पुनः सत्ये अवस्थितः प्रतिष्ठित इति॥

भूयो मे शृणु—

य एनं वेद तत्सत्यं प्राज्ञो भवति नित्यदा।
दानमध्ययनं यज्ञो लोभादेव प्रवर्तते॥ ३८॥

किमर्थम्? नो चेत्, तत्र यद्भवति तच्छृणु—

सत्यात्प्रच्यवमानानां
संकल्पा वितथाभवन्।
ततः कर्म प्रतायेत
सत्यस्यानवधारणात्॥ ३९॥

सत्यात् सत्यज्ञानादिलक्षणात् ब्रह्मणः प्रच्यवमानानां स्वाभाविकब्रह्मभावपरित्यागेन अनात्मनि देहादावात्मभावमापन्नानां संकल्पा वितथा अभवन व्यर्था भवन्ति, स्वाभावि-

कसत्यसंकल्पादयो न सिध्यन्तीत्यर्थः । ततः कर्म यज्ञादिकं प्रतायेत विस्तृतं भवेत् । तदेतत्सर्वं सत्यस्य सत्यादिलक्षणस्य ब्रह्मणः अनवधारणात् अनवगमात् आत्माज्ञाननिमित्तत्वात् संसारस्य यावत्परमात्मानमात्मत्वेन साक्षान्न विजानाति, तावदयं तापत्रयाभिभूतो मकरादिभिरिव रागादिभिरितस्ततः समाकृष्यमाणो मोमुह्यमानोऽसत्यसंकल्पः स्वर्गपश्वन्नादिहेयसाधनेषु वर्तत इत्यर्थः ॥

इदानीं ब्राह्मणलक्षणमाह—

विद्याद्बहुपठं तं तु बहुवागिति ब्राह्मणम् ।
य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया ॥

बहुपठं तम् आख्यानपञ्चमवेदाध्यायिनं बहुवागिति विद्यात् न साक्षात् ब्राह्मणमिति । कस्तर्हि मुख्यो ब्राह्मण इति चेत्— य एव सत्यात् सत्यादिलक्षणात् नापैति, स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मनैवावतिष्ठत इत्यर्थः । सः एव ज्ञेयो ब्राह्मणस्त्वया, नेतरः, यः सत्यात्प्रच्युतोऽकृतार्थः सन् कर्मणि प्रवर्तते । तथा च ब्रह्मविदमेव ब्राह्मणं दर्शयति श्रुतिः— 'मौनं चामौनं च निर्विद्याथ ब्राह्मणः स ब्राह्मणः' इति, 'विपापो विरजोऽविचिकित्सो ब्राह्मणो भवति' इति च ॥

भवेदेतदेवं यदि, तदेव ब्रह्म सिध्येत्; न च सिध्यति, अन्यपरत्वाद्वेदस्य इति; तत्राह—

छन्दांसि नाम द्विपदां वरिष्ठ
स्वच्छन्दयोगेन भवन्ति तत्र ।
छन्दोविदस्तेन च तानधीत्य
गता हि वेदस्य न वेद्यमार्याः ॥ ४१ ॥

हे द्विपदां वरिष्ठ, छन्दांसि वेदाः स्वच्छन्दयोगेन, स्वच्छन्दता स्वाधीनता, यथाकाममित्यर्थः । तत्र परमात्मनि भवन्ति तत्रैव प्रमाणं भवन्ति । श्रूयते च— 'सर्वे वेदा यत्पदमामनन्ति' इति । वेदैश्च सर्वैरहमेव वेद्यः' इति च । पुरुषार्थपर्यवसायित्वाद्वेदस्य तद्व्यतिरिक्तस्य सर्वस्य अनित्याशुचिदुःखानुविद्धत्वेन पुरुषार्थत्वाभावात् तत्स्वरूपतज्ज्ञानतत्साधनप्रतिपादकत्वेन वेदानां प्रामाण्यमित्यर्थः । यस्मात् वेदाः स्वच्छन्दयोगेन तत्रैव परमात्मनि प्रमाणं भवन्ति, तेन च हेतुना तान वेदान् अधीत्य अधिगम्य वेदान्तश्रवणादिकं कृत्वा गताः प्राप्ताः वेदस्य संविद्रूपस्य परमात्मनः स्वरूपं न वेद्यं प्रपञ्चम् आर्याः पण्डिता ब्रह्मविदः ॥

एवं तर्हि वेदवेद्यत्वे 'अन्यदेव तद्विदितादथो अविदिता-

दधि' 'यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह' इत्यादिश्रुतिविरोधः प्रसज्येतेत्याशङ्क्याह—

न वेदानां वेदिता कश्चिदस्ति
वेदेन वेदं न विदुर्न वेद्यम् ।
यो वेद वेदं स च वेद वेद्यं
यो वेद वेद्यं न स वेद सत्यम् ॥ ४२ ॥

न वेदानाम् ऋगादीनां मध्ये कश्चिदपि वेदः परमात्मनो वाचामगोचरस्य संविद्रूपस्य वेदिता अस्ति । कस्मात्? यस्मान् वेदेन ऋगादिरूपेण जडेन वेदं संविद्रूपं परमात्मानं न विदुः न वेद्यं प्रपञ्चमपि वेद्यं न विदुः, संविदधीनत्वात्सर्वसिद्धेः । यस्मात् संविदधीना सर्वसिद्धिः तस्मात् यो वेद जानाति वेदं संविद्रूपं परमात्मानम्, स च वेद वेद्यम् इदं सर्वम् । तथा च श्रुतिः—'आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्' इति । यो वेद वेद्यम् इति रूपं न स वेद न जानाति सत्यं सत्यादिलक्षणं परमात्मानम् ॥

नन्वेवं तर्हि 'वेदेन वेदं न विदुर्न वेद्यम्' इति वदता अनात्मविदः प्रपञ्चासिद्धिरेवेत्युक्तं भवति इत्याशङ्क्याह—

यो वेद वेदान्स्म च वेद वेद्यं
न तं विदुर्वेदविदो न वेदाः ।
तथापि वेदेन विदन्ति वेदं
ये ब्राह्मणा वेदविदो भवन्ति ॥ ४३ ॥

यो वेद जानाति वेदान ऋगादीन्, स च वेद वेद्यं सोऽपि अनात्मविदेव भिन्नेन संवेदनेन वेद्यं प्रपञ्चं वेद । नन्वेवं तर्हि वेद्यवत् परमात्मानमपि जानीयादित्याशङ्क्याह— न तं परमात्मानं वाचामगोचरं विदुः वेदविदो न वेदाः वेदा अपि न तं विदुः न तं विषयीकुर्वन्तीत्यर्थः । नन्वेवं तर्हि कथमौपनिषदं ब्रह्म स्यादित्याशङ्क्याह— तथापि वेदेन विदन्ति वेदं परमात्मानं यद्यपि वागाद्यविषयं ब्रह्म, तथापि वेदेन ऋगादिना विदन्ति विजानन्ति वेदं संविद्रूपं परमात्मानम् । के ते? ये ब्राह्मणा वेदविदो भवन्ति वेदानां वेदप्रतिपादनप्रकारं जानन्तीत्यर्थः ॥

कथं तर्ह्यविषयमेव ब्रह्म वेदाः प्रतिपादयन्तीत्याशङ्क्याह—

यामांशभागस्य तथा हि वेदा
यथा हि शाखा च महीरुहस्य ।

संवेदनेऽप्येवमथामनन्ति
तस्मिन्हि नित्ये परमात्मनोऽर्थे ॥ ४४ ॥

यामांशभागस्य 'त्रियामश्चन्द्रः' इति श्रुतेः चन्द्रांशभागस्य प्रतिपच्चन्द्रकलादर्शने यथा महीरुहस्य वृक्षस्य शाखा हेतुर्भवति, तथा हि वेदाः तथैव परमात्मनः स्वरूपभूते संवेदने नित्ये अविनाशिनि अर्थे परमपुरुषार्थस्वरूपे पूर्णानन्दरूपे हेतवो भवन्ति, न पुनः साक्षाद्वाचामगोचरं परमात्मानं प्रतिपादयन्तीत्येवम् आमनन्ति ॥

य एवं वेदानां वेदरूपात्मप्रतिपादनप्रकारमवगम्य व्याचष्टे, सोऽपि ब्राह्मण इत्याह—

अभिजानामि ब्राह्मण-
माख्यातारं विचक्षणम् ।
एवं योऽभिविजानाति
स जानाति परं हि तत् ॥ ४५ ॥

यो वेदप्रतिपादनप्रकारं व्याचष्टे, तम् आख्यातारं विचक्षणं ब्राह्मणं अभिजानामि । ननु बाल्यं पाण्डित्यादिकं निर्विद्यावस्थितमेव ब्रूते ब्राह्मणम् 'अथ ब्राह्मणः' इति. कथमुच्यते

अभिजानामि ब्राह्मणमाख्यातारं विचक्षणम् इति ? तत्राह— एवं वेदानां वेदनरूपात्मप्रतिपादनप्रकारं मयोक्तं योऽभिविजानाति, स जानाति परं हि तत् परं ब्रह्म जानाति इत्येव । यो हि पाण्डित्यं निर्विद्य व्यवस्थितः, सः क्षिप्रं बाल्यादिकं निर्विद्य ब्राह्मणो भवतीत्यर्थः ॥

यस्मात्सत्यनिष्ठस्यैव ब्राह्मणत्वप्रसिद्धिः, तस्मात् विषयपरो न भवेदित्याह—

नास्य पर्येषणं गच्छे-
त्प्रत्यर्थिषु कदाचन ।
अविचिन्वन्निमं वेदे
ततः पश्यति तं प्रभुम् ॥ ४६ ॥

'विषयाश्चेन्द्रियाण्येव देहोऽहंकार एव च । बाह्या आभ्यन्तरा घोराः शत्रवो योगिनः स्मृताः' इति दर्शनात् नास्य आत्मनः प्रत्यर्थिषु प्रतिपक्षभूतेषु देहेन्द्रियशब्दादिविषयेषु पर्येषणं परित एषणं गच्छेत् विषयान्वेषणपरो न भवेदित्यर्थः । अविचिन्वन विषयसंचयमकुर्वन इमं प्रत्यगात्मानं वेदे उपनिषत्सु तत्त्वमस्यादिवाक्येषु ततः पश्चात् पश्यति तं प्रभुं परमा-

त्मानम् आत्मत्वेन जानातीत्यर्थः । अथवा, नास्यात्मनः पर्येषणम् अन्वेषणं गच्छेत् प्रत्यर्थिषु प्रतिपक्षभूतदेहेन्द्रियादिषु, देहेन्द्रियतद्धर्मानात्मत्वेन न गृह्णीयादित्यर्थः । अविचिन्वन् देहेन्द्रियतद्धर्मानात्मत्वेनासंचिन्वन तत्साक्षिणमात्मानमेव प्रतिपद्यमानः तत्त्वंपदार्थशोधनानन्तरम् इमं प्रमात्रादिसाक्षिणं परमात्मानं पश्यति, देहेन्द्रियतद्धर्मानात्मत्वेनाप्रतिपद्यमानस्तत्त्वमस्यादिवाक्यैः परमात्मानमात्मत्वेन पश्यतीत्यर्थः ॥

तूष्णींभूत उपासीत
न चेच्छेन्मनसा अपि ।
अभ्यावर्तेत ब्रह्मास्मै
बह्वनन्तरमाप्नुयात् ॥ ४७ ॥

यस्मात् सर्वविषयपरित्यागेनैव आत्मदर्शनसिद्धिः, तस्मात् तूष्णींभूतः सर्वकर्मसंन्यासं कृत्वा स्वात्मव्यतिरिक्तं सर्वं परित्यज्य केवलो भूत्वा स्वात्मानमेव लोकम् उपासीत, न चेच्छेन्मनसा अपि विषयेच्छां न कुर्यात् । यस्तूष्णींभूतः विषयोपसंहारं कृत्वा स्वात्मानमेव लोकम् उपास्ते, अस्मै तूष्णींभूताय ब्राह्मणाय ब्रह्म अपूर्वादिलक्षणम् अभ्यावर्तेत

अभिमुखीभवेदित्यर्थः। श्रूयते च— 'यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्' इति। अनन्तरं आविर्भूतस्वरूपः सन् बहु भूमानं तमसः पारं परम आत्मानं आप्नुयात् इत्यर्थः॥

मुनिरप्येष एवेत्याह—

मौनाद्धि मुनिर्भवति
नारण्यवसनान्मुनिः।
अक्षरं तं तु यो वेद
स मुनिश्रेष्ठ उच्यते॥ ४८॥

मौनात् पूर्वोक्तात् तूष्णींभावादेव मुनिर्भवति, न पुनः अरण्यवसनमात्रात् मुनिः भवति। तेषामपि तूष्णींभूतानां मध्ये यस्तु पुनः अक्षरं अविनाशिनं तं परमात्मानं वेद 'अयमहमस्मि' इति साक्षाज्जानाति, स मुनिश्रेष्ठ उच्यते। श्रूयते च— 'एतमेव विदित्वा मुनिर्भवति' इति॥

वैयाकरणोऽप्येष एवेत्याह—

सर्वार्थानां व्याकरणाद्वैयाकरण उच्यते।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा॥

सर्वार्थानां व्याकरणात् वैयाकरण उच्यते । न पुनः शब्दैकदेशव्याकरणात् वैयाकरणो भवति । भवतु सर्वार्थानां व्याकरणात् वैयाकरणत्वम्, ततः किमिति चेत्. तन्मूलतो व्याकरणं पूर्वोक्ताद्दक्षराद्धि सर्वस्य नामरूपप्रपञ्चस्य व्याकरणम् । श्रूयते च— 'अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि' इति । तस्माद्ब्रह्मण एव साक्षाद्वैयाकरणत्वम् । व्याकरोतीति तत्तथा असावपि विद्वान तत् ब्रह्म तथैव व्याकरोतीति वैयाकरणः ॥

सर्वज्ञोऽप्येष एवेत्याह—

प्रत्यक्षदर्शी लोकानां
सर्वदर्शी भवेन्नरः ।
सत्ये वै ब्रह्मणि तिष्ठं-
स्तद्विद्वान्सर्वविद्भवेत् ॥ ५० ॥

प्रत्यक्षदर्शी लोकानां यः प्रत्यक्षेण भूरादीन लोकान् पश्यति, स सर्वदर्शी नरो भवेत् सर्वरूपं परमात्मानं पश्यति । असौ पुनः सत्ये सत्यादिलक्षणे ब्रह्मणि तिष्ठन् मनः समादधाति । तद्विद्वान सत्यादिलक्षणं ब्रह्म विद्वान आत्मत्वेन जानन सर्वविद्भवेत् सर्वं जानातीत्यर्थः । तस्मादेष एव

साक्षात् सर्वज्ञः, न अनात्ममात्रदर्शी ॥

'यस्त्वेतेभ्यः' इत्यादिना उक्तमेवार्थं पुनरपि दर्शयति अवश्यकर्तव्यत्वप्रदर्शनार्थम्—

ज्ञानादिषु स्थितोऽप्येवं क्षत्रिय ब्रह्म पश्यति ।
वेदानां चारपूर्वेण चैतद्विद्वन्ब्रवीमि ते ॥ ६१ ॥

इति श्रीमत्सनत्सुजातीयभाष्ये द्वितीयोऽध्यायः ॥

ज्ञानादिषु 'ज्ञानं च' इत्यादिना पूर्वोक्तेषु स्थितोऽप्येवं यथा सत्ये तिष्ठन ब्रह्म पश्यति एवमेव ब्रह्म पश्यति । वेदानां चारपूर्वेण वेदान्तश्रवणपूर्वकमित्यर्थः । अथवा, गुणान्तरविधानमेतत्— ज्ञानादिषु स्थितोऽपि न केवलं तावन्मात्रेण पश्यति; अपि तु एवमेव वक्ष्यमाणप्रकारेण वेदान्तविचारपूर्वेण वेदान्तश्रवणादिपूर्वकमेव पश्यति ब्रह्म । एतत् वेदान्तानां विचारप्रकारं हे विद्वन , ब्रवीमि ते वक्ष्यामीत्यभिप्रायः ॥

इति सनत्सुजातीयभाष्ये द्वितीयोऽध्यायः ॥





॥ श्रीः ॥

सनत्सुजातीयभाष्ये

तृतीयोऽध्यायः ।

तृतीयोऽध्यायः ॥

—*—



इदानीं ब्रह्मचर्यादिसाधनानन्तरं तत्प्राप्यं च ब्रह्म प्रतिपादयितुं तृतीयचतुर्थावारभ्येते । तत्र तावद्ब्रह्मचर्यादि साधनं श्रुत्वा तद्ब्रह्मवेदनाकाङ्क्षी प्राह धृतराष्ट्रः—

धृतराष्ट्र उवाच—

सनत्सुजात यदिमां परार्थां
ब्राह्मीं वाचं वदसि हि विश्वरूपाम् ।
परां हि कार्येषु सुदुर्लभां कथां
प्रब्रूहि मे वाक्यमेवं कुमार ॥ १ ॥

हे सनत्सुजात, यत् यस्मात् इमां परार्थाम् उत्कृष्टार्थां ब्राह्मीं ब्रह्मसंबन्धिनीं वाचं वदसि हि विश्वरूपां नानारूपां पराम् उत्तमां कार्येषु कार्यवर्गेषु प्रपञ्चेषु सुदुर्लभां श्रवणायाप्यशक्यां कथां प्रब्रूहि मे वाक्यमेवंभूतं कुमार, यस्मात्त्वं ब्राह्मीं वाचं परमपुरुषार्थसाधनभूतां सुदुर्लभां वदसि, तस्मात्त्वमेव वक्तुमर्हसीत्यभिप्रायः ॥

एवं पृष्टः प्राह भगवान—

सनत्सुजात उवाच—

नैतद्ब्रह्म त्वरमाणेन लभ्यं
यन्मां पृच्छस्यभिषङ्गेण राजन् ।
बुद्धौ प्रलीने मनसि प्रचिन्त्या
विद्या हि सा ब्रह्मचर्येण लभ्या ॥ २ ॥

नैतद्ब्रह्म त्वरमाणेन पुरुषेण लभ्यं यत् ब्रह्म मां पृच्छस्यभिषङ्गेण राजन । कथं तर्हि लभ्यमित्याह—बुद्धौ अध्यवसायात्मिकायां प्रलीने मनसि प्रचिन्त्या विद्या हि सा, यदा पुनः संकल्पविकल्पात्मकं मनो विषयेभ्यः परावृत्य स्वात्मन्येव निश्चलं भवतीत्यर्थः । येयं बुद्धौ प्रलीने मनसि प्रचिन्त्या, सा विद्या ब्रह्मचर्येण वक्ष्यमाणेन लभ्या ॥

किं च—

आद्यां विद्यां वदसि हि सत्यरूपां
या प्राप्यते ब्रह्मचर्येण सद्भिः ।
यां प्राप्यैनं मर्त्यभावं त्यजन्ति
या वै विद्यागुरुवृद्धेषु नित्या ॥ ३ ॥

आद्यां सर्वादिभूतब्रह्मविषयां विद्यां वदसि हि सत्यरूपां

परमार्थरूपां मे ब्रूहीति । यद्वा, आद्याम् अकार्यभूतां असत्यप्रपञ्चाविषयां विद्यां वदसि । तस्मादत्वरमाणेन ब्रह्मचर्यादिसाधनोपेतेन उपसंहृतान्तःकरणेनैव लभ्येत्यर्थः । या प्राप्यते ब्रह्मचर्येण सद्भिः यां प्राप्यैनं मर्त्यभावं त्यजन्ति या वै विद्यागुरुवृद्धेषु गुरुणा विद्याप्रदानादिना वर्धितेषु शिष्येषु नित्या नियता ॥

एवमुक्ते ब्रह्मचर्यविज्ञानायाह धृतराष्ट्रः—

धृतराष्ट्र उवाच—

ब्रह्मचर्येण या विद्या शक्या वेदितुमञ्जसा ।
तत्कथं ब्रह्मचर्यं स्यादेतद्विद्वन्ब्रवीहि मे ॥ ४ ॥

या विद्या ब्रह्मचर्येण वेदितुं शक्या, तत् साधनभूतं ब्रह्मचर्यं कथं स्यात् । एतत् ब्रह्मचर्यं विद्वन्, ब्रवीहि मे ॥

एवं पृष्टः प्राह भगवान्—

सनत्सुजात उवाच—

आचार्ययोनिमिह ये प्रविश्य
भूत्वा गर्भं ब्रह्मचर्यं वदन्ति ।
इहैव ते शास्त्रकारा भवन्ति
विहाय देहं परमं यान्ति सत्यम् ॥ ५ ॥

आचार्ययोनिमिह ये प्रविश्य आचार्यसमीपं गत्वेत्यर्थः । भूत्वा गर्भम् उपसदनादिना शिष्या भूत्वा ब्रह्मचर्यं गुरुशुश्रूषादिकं चरन्ति कुर्वन्ति, इहैव अस्मिन् लोके ते शास्त्रकारा भवन्ति; शास्त्रकर्तारः पण्डिताः; ततो बाल्यादिकं निर्विद्य ब्राह्मणा भूत्वा आरब्धकर्मक्षये विहाय देहं परमं यान्ति सत्यं सत्यादिलक्षणं परमात्मानं प्राप्नुवन्ति ॥

किंच—

अस्मिँल्लोके विजयन्तीह कामा-
न्ब्राह्मीं स्थितिमनुतितिक्षमाणाः ।
त आत्मानं निर्हरन्तीह देहा-
न्मुञ्जादिषीकामिव धीरभावात् ॥ ६ ॥

अस्मिन लोके विजयन्तीह कामान् ब्राह्मीमेव स्थितिं ब्रह्मण्येव स्थितिम् अनुतितिक्षमाणाः अनुदिनं क्षममाणाः ते आत्मानं देहेन्द्रियादिभ्यो निष्कृष्य तत्साक्षिणं चिन्मात्रं निर्हरन्ति पृथक्कुर्वन्ति । किमिव? मुञ्जादिषीकामिव यथा मुञ्जादिषीकामन्तःस्थां निर्हरन्ति, एवं कोशपञ्चकेभ्यो निष्कृष्य सर्वात्मानं प्रतिपद्यन्त इत्यर्थः । केन—धीरभावात् धैर्येण । श्रूयते च कठवल्लीषु—'अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा

जनानां हृदये संनिविष्टः । तं स्वाच्छरीरात्प्रवृहेन्मुञ्जादिवेषीकां धैर्येण तं विद्याच्छुक्रममृतम्' इति ॥

'आचार्ययोनिमिह' इत्यत्र आचार्यस्य योनित्वं दर्शितम् । तत्कथं मातापितृव्यतिरेकेणाचार्यस्य योनित्वमित्याशङ्क्य स एव साक्षाज्जनयितेत्याह—

शरीरमेतौ कुरुतः पिता माता च भारत ।
आचार्यतस्तु यज्जन्म तत्सत्यं वै तथामृतम् ॥

शरीरम् इह अस्य एतौ मातापितरौ कुरुतः, नात्मानं स्वरूपेण जनयतः । यदिदं देहद्वयात्मना जन्म तदसत्यम् । आचार्यतः तु यत् इदं चित्सदानन्दाद्वितीयब्रह्मात्मना जन्म, तत्सत्यं परमार्थभूतं तथा एव अमृतं विनाशवर्जितम् । तस्मात्स एव जनयितेत्यर्थः । श्रूयते च प्रश्नोपनिषदि—'त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि' इति । तथा चाहापस्तम्बः—'स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म शरीरमेव मातापितरौ जनयतः' इति ॥

यस्मादाचार्याधीना परमपुरुषार्थसिद्धिः, तस्मात्—

स आवृणोत्यमृतं संप्रयच्छं-
स्तस्मै न द्रुह्येत्कृतमस्य जानन् ।

गुरुं शिष्यो नित्यमभिवादयीत
स्वाध्यायमिच्छेच्च सदाप्रमत्तः ॥ ८ ॥

स आवृणोति आपूरयति अमृतं पूर्णानन्दं ब्रह्म आत्मत्वेन संप्रयच्छेन तस्मै आचार्याय न द्रुह्येत् द्रोहं नाचरेत् । तथा च श्रुतिः—'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' । तथा चापस्तम्बः—'तस्मै न द्रुह्येत्कदाचन । स हि विद्यातस्तं जनयति' इति । कृतमस्य जानन्—अस्येति तृतीयार्थे षष्ठी—अनेनात्मनः कृतमुपकारं विजानन । किं तर्हि कर्तव्यमित्याह—गुरुं शिष्यो नित्यमभिवादयीत देवमिवाचार्यमुपासीत । तथा च श्रुतिः—'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ' इति । तथा—स्वाध्यायमिच्छेच्च श्रवणादिपरो भवेत् सदा अप्रमत्तः अप्रमादी सन ॥

इदानीं चतुष्पाद्ब्रह्मचर्यमाह श्लोकचतुष्टयेन—

शिष्यवृत्तिक्रमेणैव विद्यामाप्नोति यः शुचिः ।
ब्रह्मचर्यव्रतस्यास्य प्रथमः पाद उच्यते ॥ ९ ॥

शिष्यवृत्तिक्रमेणैव 'आचार्ययोनिमिह' इत्यादिनोक्तक्रमेण शुचिः विद्यामाप्नोति यत्, तत् ब्रह्मचर्यं तस्यास्य प्रथमः

पाद उच्यते ॥

यथा नित्यं गुरौ वृत्तिर्गुरुपत्न्यां तथाचरेत् ।
तत्पुत्रे च तथा कुर्वन्द्वितीयः पाद उच्यते ॥

स्पष्टार्थः श्लोकः । तथा चोक्तम्— 'आचार्यवदाचार्यदारेषु वृत्तिः' 'आचार्यवदाचार्यपुत्रे वृत्तिश्च' इति ॥

आचार्येणात्मकृतं विजान-
ञ्ज्ञात्वा चार्थं भावितोऽस्मीत्यनेन ।
यन्मन्यते तं प्रति हृष्टबुद्धिः
स वै तृतीयो ब्रह्मचर्यस्य पादः ॥ ११ ॥

आचार्येणात्मकृतम् आत्मनः कृतम् उपकारं विजानन् ज्ञात्वा अर्थं वेदार्थं परमपुरुषार्थं ज्ञात्वा च अवगम्य भावितोऽस्मीत्यनेन भावितोऽस्मीति स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मना यथावदुत्पादितोऽस्मीति चिन्तयन् तम् आचार्यं प्रति हृष्टबुद्धिः सन् यत् आत्मनः कृतार्थत्वं मन्यते, स वै तृतीयो ब्रह्मचर्यस्य पादः ॥

आचार्याय प्रियं कुर्यात्प्राणैरपि धनैरपि ।
कर्मणा मनसा वाचा चतुर्थः पाद उच्यते ॥

इदानीं चतुष्पदीं विद्यां दर्शयति—

कालेन पादं लभते तथायं
तथैव पादं गुरुयोगतश्च ।
उत्साहयोगेन च पादमृच्छे-
च्छास्त्रेण पादं च ततोऽभियाति ॥

अत्र क्रमो न विवक्षितः । प्रथमं गुरुयोगतः ततः उत्साहयोगेन बुद्धिविशेषप्रादुर्भावेन ततः कालेन बुद्धिपरिपाकेण ततः शास्त्रेण सहाध्यायिभिस्तत्त्वविचारेण । तथा चोक्तम्— 'आचार्यात्पादमादत्ते पादं शिष्यः स्वमेधया । कालेन पादमादत्ते पादं सब्रह्मचारिभिः' इति ॥

ज्ञानादीनामाचार्यसंनिधाने फलसिद्धिरित्याह—

ज्ञानादयो द्वादश यस्य रूप-
मन्यानि चाङ्गानि तथा बलं च ।
आचार्ययोगे फलतीति चाहु-
र्ब्रह्मार्थयोगेन च ब्रह्मचर्यम् ॥ १४ ॥

ज्ञानादयः 'ज्ञानं च' इत्यादिना पूर्वोक्ता द्वादश गुणा यस्य पुरुषस्य, सः ज्ञानादयः रूपं अन्यानि चाङ्गानि 'श्रेयांस्तु षड्विधस्त्यागः' 'सत्यं ध्यानम्' इति श्लोकद्वयोक्तानि,

तथा बलं च तद्धर्मपरिपालनसामर्थ्यं च सर्वम् आचार्ययोगे एव फलति, नाचार्ययोगं विना फलति । श्रूयते च—'आचार्याद्धैव विद्या विदिता' इति, 'आचार्यवान्पुरुषो वेद' इति च । ब्रह्मार्थयोगेन च ब्रह्मचर्यं यदिदं गुरुसंनिधौ शुश्रूषाद्याचरणम्, तद्ब्रह्मचर्यं ब्रह्मार्थयोगेन फलति स्वात्मनः चित्सदानन्दाद्वितीयब्रह्मैक्यसंपादनद्वारेण फलतीत्यर्थः ॥

ब्रह्मचर्यस्तुतिं करोति द्वाभ्याम्—

एतेन ब्रह्मचर्येण देवा देवत्वमाप्नुवन् ।
ऋषयश्च महाभागा ब्रह्मचर्येण चाभवन् ॥१५॥

एतेनैव सगन्धर्वा रूपमप्सरसोऽजयन् ।
एतेन ब्रह्मचर्येण सूर्य अह्नाय जायते ॥ १६ ॥

देवा देवत्वमेतेन प्राप्नुवन । ऋषयोऽपीह ऋषित्वमेतेन प्राप्ताः । सगन्धर्वाः गन्धर्वैः सह वर्तमानाः रूपमप्सरसोऽजयन् रूपाणि रमणीयानि एतेन ब्रह्मचर्येण अजयन । अह्नो दीप्तिसमूहः, अह्नाय जगतां द्योतनाय सूर्यश्च जायते । उक्तं च—'अह्नो दीप्तिश्च कथ्यते' इति ॥

कथमेकस्य ब्रह्मचर्यस्यानेकविधफलसाधकत्वमित्यत आह—

आकाङ्क्षार्थस्य संयोगाद्रसभेदार्थिनामिव ।
एवं ह्येतत्समाज्ञाय तादृग्भावं गता इमे ॥१७॥

यथा चिन्तामण्यादयो रसभेदार्थिनामिव आकाङ्क्षार्थस्य संयोगात् तत्तदाकाङ्क्षितमर्थं प्रयच्छन्ति, एवम् एतत् ब्रह्मचर्यमाकाङ्क्षार्थस्य संयोगात्तत्तदाकाङ्क्षितं प्रयच्छतीति ज्ञात्वा तत्तत्फलार्थं ब्रह्मचर्यं चरित्वा तादृग्भावं तादृशं भावं गतास्तु इमे देवादयः । यस्मादाचार्यसंनिध्यनुष्ठितात् ब्रह्मचर्यात् परमपुरुषार्थप्राप्तिः, तस्मादाचार्ययोनिं प्रविश्य गर्भो भूत्वा ब्रह्मचर्यं चरेदित्यर्थः ॥

नन्वेवं ज्ञाननिष्ठता यदि ज्ञानस्यैव पुरुषार्थत्वं भवेत्; अपि तु कर्मण एवेत्याशङ्क्याह—

अन्तवन्तः क्षत्रिय ते जयन्ति
लोकास्तवनाः कर्मणा निर्मितेन ।
ज्ञानेन विद्वांस्तेज अभ्येति नित्यं
न विद्यते ह्यन्यथा तस्य पन्थाः ॥१८॥

हे क्षत्रिय, अन्तवन्तः अन्तवतो लोकान् पितृलोकदेवलोकादीन् ते जयन्ति, नानन्तं स्वात्मभूतं परमात्मानं लोकं जयन्ति । केन तर्ह्यनन्तलोकप्राप्तिरित्याशङ्क्याह— ज्ञानेन

विद्वान तेज अभ्येति नित्यं नित्यमविनाश्यात्मभूतमेव अभ्येति तेजः ज्योतिः. न कर्मणा । कस्मात्पुनर्ज्ञानेनैवाभ्येति ? तत्राह— न विद्यते ह्यन्यथा तस्य पन्थाः तस्य पूर्णानन्दज्योतिषो ज्ञानमेकं मुक्त्वा अन्यः पन्था मार्गो नास्त्येव । श्रूयते च— 'तमेवं विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' इति ॥

ज्ञानेन विद्वान यद्ब्रह्म पश्यति, तत्किमिवाभातीति प्राह धृतराष्ट्रः—

धृतराष्ट्र उवाच—

आभाति शुक्लमिव लोहितमिवाथो
कृष्णमथार्जुनं काद्रवं वा ।
यद्ब्राह्मणः पश्यति यत्र विद्वा-
न्कथंरूपं तदमृतमक्षरं परम् ॥ १९ ॥

ज्ञानेन यद्विद्वान पश्यति ब्रह्म, तत् किं शुक्लमिव आभाति, लोहितमिव आभाति, कृष्णमिव अर्जुनं काद्रवमिव आभाति; यत्र देशे भाति कथंरूपं तदमृतमक्षरं परं ब्रह्म ॥

एवं पृष्टः प्राह भगवान—

सनत्सुजात उवाच—

नाभाति शुक्लमिव लोहितमिवाथो
कृष्णमथार्जुनं वा काद्रवं वा ।
न पृथिव्यां तिष्ठति नान्तरिक्षे
नैतत्समुद्रे सलिलं बिभर्ति ॥ २० ॥

न एतत् ब्रह्म शुक्लादिरूपत्वेन अवभासते, अरूपत्वाद्ब्रह्मणः । श्रूयते च— 'ततो यदुत्तरतरं तदरूपमनामयम्' इति, 'अशब्दमस्पर्शमरूपम्' इति च । तथा न पृथिव्यां तिष्ठति नान्तरिक्षे । तथा च श्रुतिरन्यत्रानवस्थानं दर्शयति— 'स भगवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नि' इति । कस्मात्पुनः कारणात्पृथिव्यादिषु न तिष्ठतीति? तत्राह— नैतत्समुद्रे सलिलं बिभर्ति पञ्चभूतात्मकं देहं बिभर्ति । सलिलशब्दो भूतपञ्चकोपलक्षणार्थः, यथा— 'अप एव ससर्जादौ तासु वीर्यमपासृजत्' इत्यत्र अप्शब्दो भूतपञ्चकोपलक्षणार्थः । श्रूयते च— 'पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' इति अपामेव पुरुषशब्दवाच्यत्वम् । एतदुक्तं भवति—यदि ब्रह्मणः संसारान्तर्वर्तित्वं भवेत्, तदा संसारानुप्रविष्टत्वात् घटादिवदीदृग्रूपादिमत्त्वमन्यस्मिंश्चावस्थानं भवेत् । इदं पुनरपूर्वादिलक्षणत्वात्संसारानुप्रविष्टमेव ब्रह्म.

तस्माद्रूपादिरहितमेव तदिति ॥

तर्हि न कस्य कुत्राप्युपलभ्यते इत्याह—

नैवर्क्षु तन्न यजुःषु नाप्यथर्वसु
न दृश्यते वै विमलेषु सामसु ।
रथन्तरे बार्हते वापि राजन्
महाव्रतस्यात्मनि दृश्यते तत् ॥ २१ ॥

'ज्ञानं च सत्यं च' इत्युपक्रम्य 'महाव्रता द्वादश ब्राह्मणस्य' इति ये गुणा उक्ताः, तत्संयुक्तस्यात्मनि दृश्यते तत् परं ब्रह्म । न घटादिवदिदंतया सिध्यति, अपि त्वात्मन्येवात्मतया सिध्यतीत्यर्थः ॥

इदानीं तत्स्वरूपं तद्दर्शनं तत्फलं च निर्दिशति श्लोकद्वयेन—

अवारणीयं तमसः परस्ता-
त्तदन्ततोऽभ्येति विनाशकाले ।
अणीयरूपं च तथाप्यणीयसां
महत्स्वरूपं त्वपि पर्वतेभ्यः ॥ २२ ॥
तदेतदह्ना संस्थितं भाति सर्वं
तदात्मवित्पश्यति ज्ञानयोगात् ।

तस्मिञ्जगत्सर्वमिदं प्रतिष्ठितं
य एतद्विदुरमृतास्ते भवन्ति ॥ २३ ॥

इति श्रीमत्सनत्सुजातीये तृतीयोऽध्यायः ॥

यदिदं महाव्रतस्यात्मनि दृश्यते, तत् अवारणीयं ब्रह्म, सर्वगतत्वात् । तमसः अज्ञानात् परस्तात् । तत् ब्रह्म अन्ततः अभ्येति जगत् विनाशकाले प्रलयकाले—अणीयरूपं च तथाप्यणीयसां महत्त्वरूपं त्वपि पर्वतेभ्यः । श्रूयते च—'अणोरणीयान महतो महीयान' इति । दृश्यन्ते च येऽणुत्वमहत्त्वादयो लोके तदेतत् सर्वं जगत् अह्नो अह्नो रूपेण प्रकाशरूपेण ब्रह्मणि संस्थितं तदात्मनैव भाति । श्रूयते च— 'तस्य भासा सर्वमिदं विभाति' इति, 'येन सूर्यस्तपति तेजसेद्धः इति च । तत् ब्रह्म आत्मविद्पश्यति ज्ञानयोगात न कर्मयोगेन । तस्मिन एव परमात्मनि जगत्सर्वमिदं प्रतिष्ठितम । य एतद्विदुः अमृतास्ते भवन्ति ॥

इति श्रीसनत्सुजातीयभाष्ये तृतीयोऽध्यायः ॥





॥ श्रीः ॥

सनत्सुजातीयभाष्ये

चतुर्थोऽध्यायः ।

चतुर्थोऽध्यायः ॥



वारणीयं तमसः परस्तात्' इत्यादिना ब्रह्मणो रूपं निर्धार्य 'तदात्मवित्पश्यति ज्ञानयोगात्' इति ज्ञानयोगेनात्मदर्शनमुक्तम् । पुनरपि तस्य स्वरूपं दर्शयित्वा योगिनस्तद्रूपं पश्यन्तीत्याह—

यत्तच्छुक्रं महज्ज्योतिर्दीप्यमानं महद्यशः ।
यद्वै देवा उपासते यस्मादर्को विराजते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥१॥

यत् ब्रह्मवित्पश्यति ज्ञानयोगात्, यत् ज्ञात्वा अमृता भवन्ति, तत् शुक्रं शुद्धम् अविद्यादिदोषरहितं महज्ज्योतिः सर्वावभासकत्वात्; श्रूयते च—'तस्य भासा सर्वमिदं विभाति' इति । दीप्यमानं भ्राजमानं महद्यशः । श्रूयते च—'तस्य नाम महद्यशः' इति । यद्वै ब्रह्म देवाः इन्द्रादयः उपासते । श्रूयते च—'तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम्'

इति । यस्मात् परज्योतिषो ब्रह्मणः अर्कः आदित्यो विराजते, 'येन सूर्यस्तपति तेजसेद्धः' इति श्रुतेः । एवंभूतं परमात्मानं भगवन्तं सनातनं योगिन एव पश्यन्ति, न पुनर्ज्ञानयोगरहिताः ॥

इदानीं परस्मादेव ब्रह्मणो हिरण्यगर्भाद्युत्पत्तिं दर्शयति—

शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्धते ।
तच्छुक्रं ज्योतिषां मध्येऽतप्तं तपति तापनम् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥२॥

शुक्रात् शुद्धात् पूर्वोक्तात् ब्रह्मणो हिरण्यगर्भाख्यं ब्रह्म प्रभवति उत्पद्यते । अथोत्पन्नं ब्रह्म शुक्रेण वर्धते विराडात्मना । तच्छुक्रं शुद्धं ब्रह्म ज्योतिषाम् आदित्यादीनां मध्ये तैः अतप्तम् अप्रकाशितं सत् तपति स्वयमेव प्रकाशते, तेषामपि तापनं प्रकाशकम् । योऽन्यानवभास्यः सर्वावभासकः स्वयमेवावभासते, तं भगवन्तं योगिन एव पश्यन्ति ॥

इदानीं पूर्णवाक्यार्थं कथयति—

पूर्णात्पूर्णमुद्धरन्ति पूर्णात्पूर्णं प्रचक्षते ।
हरन्ति पूर्णात्पूर्णं च पूर्णेनैवावशिष्यते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥३॥

पूर्णात् देशतः कालतो वस्तुतश्चापरिच्छिन्नात् परमात्मनः पूर्णमेव उद्धरन्ति जीवरूपेण । यत् पूर्णात् पूर्णमुद्धृतं जीवात्मना अतः पूर्णात् उद्धृतत्वादेव इदमपि जीवस्वरूपं पूर्णमेव प्रचक्षते विद्वांसः । तथा हरन्ति पूर्णात् जीवात्मनावस्थितात् पूर्णम् आत्मस्वरूपमात्रं देहेन्द्रियाद्यनुप्रविष्टं देहेन्द्रियादिभ्यो निष्कृष्य तत्साक्षिणं सर्वान्तरं देहद्वयादुद्धरन्तीत्यर्थः । ततः उद्धृतेनैव मूलभूतेन पूर्णानन्देन अवशिष्यते तेनैव पूर्णानन्देन ब्रह्मणा संयुज्यते चित्सदानन्दाद्वितीयब्रह्मात्मना अवतिष्ठत इत्यर्थः । 'पूर्णमेवावशिष्यते' इति वा पाठः; यदा देहेन्द्रियादिभ्यो निष्कृष्य तत्साक्षिणं सर्वान्तरं देहद्वयादुद्धरन्ति, तदा पूर्णमेवावशिष्यत इत्यर्थः । तथा च श्रुतिः—'पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते' इति । अस्यायमर्थः—पूर्णम् अदः तच्छब्दवाच्यं जगत्कारणं ब्रह्म । पूर्णमिदं त्वंशब्दनिर्दिष्टं प्रत्यगात्मस्वरूपम् । अनयोस्तत्त्वंपदार्थयोः कथं पूर्णत्वमिति चेत्, तत्राह—पूर्णात् अनवच्छिन्नात् पूर्णमेवोदच्यते उद्रिच्यते जीवेश्वररूपेण यस्मात्, तस्मादनयोः पूर्णत्वमित्यर्थः । पूर्णस्य तत्त्वमात्मनावस्थितस्य पूर्णं रूपमादाय तत्त्वंपदार्थशोधनं कृत्वा शोधितपदार्थः सन्नित्यर्थः । पूर्णमेव ब्रह्म अवशिष्यते पूर्णमेव ब्रह्म

भवतीत्यर्थः । यः पूर्णस्वरूपः, तं परमात्मानं योगिन एव पश्यन्ति ॥

इदानीं द्वा सुपर्णेति मन्त्रार्थं कथयति—

आपोऽथाद्भ्यः सलिलं तस्य मध्ये
उभौ देवौ शिश्रियातेऽन्तरिक्षे ।
आदध्रीचीः सविषूचीर्वसाना-
वुभौ बिभर्ति पृथिवीं दिवं च ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

अस्मात्परमात्मनः आपः प्रथमं सृष्टाः । तथा चाह मनुः — 'अप एव ससर्जादौ' इति । भूतपञ्चकोपलक्षणार्थः अप्छब्दः । अनेन सूक्ष्मसृष्टिरभिहिता । अथ अनन्तरम् अद्भ्यः पूर्वसृष्टाभ्यः सलिलं भूतपञ्चकात्मकं स्थूलदेहादिकं सृष्टम् । तस्य सलिलस्य देहात्मनावस्थितस्य मध्ये अन्तरिक्षे हृदयाकाशे उभौ जीवपरमात्मानौ देवौ द्योतनस्वभावौ शिश्रियाते वर्तेते । न केवलमन्तरिक्ष एव शिश्रियाते आदध्रीचीः सविषूचीः वसानौ आभिमुख्येन ध्रियमाणा वा स्थिता वा अञ्चन्तीति आदध्रीच्यो दिशः; विषूच्य उपदिशः, विष्वग्गमनात्; ताभिः सह वर्तन्त इति सविषूच्यः प्राच्याद्याः

सर्वा दिशः वसानौ आच्छादयन्तौ उभौ बिभर्ति पृथिवीं दिवं च एको जीवः आत्मनः स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मतत्त्वमनवगम्यानात्मनि देहादावात्मभावमापन्नः पृथिवीं भूतभौतिकलक्षणं कर्मफलानुरूपं सुखदुःखात्मकदेहादिकं बिभर्ति । अपरो दिवं द्योतनात्मकं स्वात्मरूपं बिभर्ति । श्रूयते च— 'द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्योऽभिचाकशीति' इति । यः स्वात्ममायया स्वमात्मानं प्राणाद्यनन्तभेदं कृत्वान्तरानुप्रविश्य अभिपश्यन् आस्ते, तं भगवन्तं योगिन एव पश्यन्ति ॥

इदानीं ज्ञानिनः स्वात्मन्यवस्थानं दर्शयति—

चक्रे रथस्य तिष्ठन्तं ध्रुवस्याव्ययकर्मणः ।
केतुमन्तं वहन्त्यश्वास्तं दिव्यमजरं दिवि ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

ध्रुवस्याव्ययकर्मणः परमेश्वरस्य चेश्वरात्मनावस्थितस्य रथस्य शरीरस्य त्रैलोक्यात्मनावस्थितस्य चक्रे चङ्क्रमणात्मके देहे तिष्ठन्तं केतुमन्तं प्रज्ञावन्तम् अत एव च दिव्यम् अप्राकृतं जरामरणादिविवर्जितं दिवि द्योतनात्मके अनुदितान-

स्तमितज्ञानात्मनावस्थिते पूर्णानन्दे ब्रह्मणि वहन्त्यश्वाः इन्द्रियाणि । एतदुक्तं भवति— यद्यपीन्द्रियाणि स्वभावतो विषयेष्वेव वर्तन्ते, तथापि विज्ञानसारथिना समाकृष्यमाणानि केतुमन्तं पुरुषं दिव्येव वहन्ति, न परागविषय इति । तदुक्तं कठवल्लीषु— 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥ इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' इत्यादिना । यत्र परमात्मनि वहन्ति तपसा, तं भगवन्तं योगिन एव पश्यन्ति ॥

नानेन सदृशं किंचिद्विद्यत इत्याह—

न सादृश्ये तिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चिदेनम् ।
मनीषयाथो मनसा हृदा च
य एनं विदुरमृतास्ते भवन्ति ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

अस्य परमात्मनो रूपं न सादृश्ये तिष्ठति नान्येन सादृश्ये वर्तते, नानेन सदृशं किंचिद्वर्तत इत्यर्थः । श्रूयते च— 'न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः' इति । अत

एव उपमानाद्यविषयत्वम् । तथा न चक्षुषा पश्यति कश्चिन् अपि एनं सर्वान्तरं परमात्मानम् । कथं तर्हि पश्यन्ति? मनीषया अध्यवसायात्मिकया मनसा संकल्पविकल्पात्मकेन हृदा च हृदयेन च साधनभूतेन । हृदयं विना नान्यत्र परमात्मन उपलब्धिः संभवतीति मत्वा हृदा चेत्युक्तम् । अथवा, न केवलं मनोबुद्धिमात्रेण, अपि तु हृदा च हृदयस्थेन च परमेश्वरेणानुगृहीताः सन्तः । य एनं परमात्मानं विदुः अयमहमस्मीति, ते अमृताः अमरणधर्माणो भवन्ति । अथवा, हृदा हृदयेन परमात्मना । तथा च हृत्स्थे परमात्मनि हृदयशब्दं निर्वक्ति—'स एष आत्मा हृदि तस्यैतदेव निरुक्तं हृद्ययमिति तस्माद्धृदयमिति अहरहर्वा एवंवित्स्वर्गं लोकमेति' इति । तथा च श्रुतिः तदधीनात्मसिद्धिं दर्शयति—'यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ । तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः' इति । एवं यं विदित्वा अमृता भवन्ति, तं योगिन एव पश्यन्ति ॥

इदानीमिन्द्रियाणां विषयेषु प्रवृत्तिरनर्थाय भवतीत्याह—

द्वादश पूगाः सरितो देवरक्षिता मध्वीशते ।
तदनुविधायिनस्तदा संचरन्ति घोरम् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

ये द्वादश पूगाः कर्मज्ञानेन्द्रियाणि, एकादशं मनः, द्वादशी बुद्धिः, तेषामनेकपुरुषापेक्षया एकैकस्य पूगत्वमुच्यते। सरितः सरणशीलाः देवरक्षिताः देवेन परमात्मना रक्षिताः मधुवत् विषयं मधु ईशते नियमयन्ति असांकर्येण स्वं स्वं विषयमनुभवन्तीत्यर्थः। यदैवमनुभवन्ति, तदा तदनुविधायिनो विषयपराः संचरन्ति घोरं संसारम्। तस्मादिन्द्रियाणि विषयेभ्यः उपसंहृत्य स्वात्मन्येव वशं नयेदित्यर्थः। येन रक्षिता मध्वीशते, तं देवं योगिन एव पश्यन्ति॥

किंच, दृष्टान्तदार्ष्टान्तिकयोस्तत्राभिधानम्—

तदर्धमासं पिबति संचितं भ्रमरो मधु।
ईशानः सर्वभूतेषु हविर्भूतमकल्पयत्॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम्॥८॥

यथा मधुकरो भ्रमरः अर्धमासोपार्जितम् अर्धमासं संचितं मधु अर्धमासं पिबति, एवमसावपि भ्रमरः भ्रमणशील-
*त्वात्संसारी तद्विषयं मधु अर्धमाससंचितमर्धमासं पिबति; पूर्वजन्मसंचितं कर्म अन्यस्मिन् जन्मनि भुङ्क्ते इति यावत्। भवेदप्यैहिकफलात्कर्मणः फलसिद्धिः, कर्मानन्तरभावित्वात्; कथं पुनरामुष्मिकफलात्कर्मणः फलसिद्धिः स्यात्, कर्मणो वि-

नाशित्वादित्याशङ्क्याह—ईशान इति । भवेदयं दोषः यदि केवलात्कर्मणः फलसिद्धिः स्यात्; ईशानः परमेश्वरः कृतप्रयत्नापेक्षः सन् सर्वेषु प्राणिषु प्राणाग्निहोत्रस्येतरस्य च तत्कर्मानुसारेण हविर्भूतम् अन्नादिकम् अकल्पयत् । य ईशानः सर्वभूतेषु हविर्भूतमकल्पयत्, तं भगवन्तं योगिन एव पश्यन्ति ॥

किंच, किमेते मध्वाशिनो बम्भ्रम्यमाणाः परिवर्तन्त एव सर्वदा, किं वा ज्ञानं लब्ध्वा मुक्ता भवन्ति, इत्याशङ्क्याह—

हिरण्यपर्णमश्वत्थमभिपत्य ह्यपक्षकाः ।
तत्र ते पक्षिणो भूत्वा प्रपतन्ति यथासुखम् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥९॥

ये अपक्षकाः ज्ञानपक्षरहिताः मध्वाशिनः परिवर्तन्ते, ते हिरण्यपर्णमश्वत्थं हितं च रमणीयं चेति हिरण्यं हितं रमणीयं च पर्ण यस्याश्वत्थस्य । तथा च भगवान्वासुदेवः—'छन्दांसि यस्य पर्णानि' इति । ते हिरण्यपर्णमश्वत्थम् अभिपत्य आरुह्य वेदसंयोगिब्राह्मणादिदेहं प्राप्येत्यर्थः । तत्रैव ब्राह्मणादिदेहे पक्षिणो ज्ञानिनो भूत्वा । तथा च ब्राह्मणम्—'ये वै विद्वांसस्ते पक्षिणो ये अविद्वांसस्ते अपक्षाः' इति । प्रपतन्ति तथा सुखं मुक्ता भवन्तीत्यर्थः । यं ज्ञात्वा प्रपतन्ति,

तं योगिन एव पश्यन्ति ॥

इदानीं योगं दर्शयति—

अपानं गिरति प्राणः प्राणं गिरति चन्द्रमाः ।
आदित्यो गिरते चन्द्रमादित्यं गिरते परः ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

अपानं गिरति उपसंहरति प्राणः । प्राणं गिरति चन्द्रमाः मनः उपसंहरति । मनसश्चन्द्रमा अधिदैवतम् ; तस्माच्चन्द्रमः-शब्देन मन उच्यते । तं चन्द्रं मन आदित्यो बुद्धिः गिरते । बुद्धेश्चादित्योऽधिदैवतम् । तम् आदित्यं बुद्धिं गिरते परः परं ब्रह्म । एतदुक्तं भवति— समाधिवेलायामपानं प्राणे उपसंहृत्य प्राणं मनसि मनश्च बुद्धौ बुद्धिं परमात्मन्युपसंहृत्य स्वाभाविकचित्सदानन्दाद्वितीयब्रह्मात्मनैवावतिष्ठत इत्यर्थः ॥

इदानीं परस्य जीवात्मनावस्थानं दर्शयति—

एकं पादं नोत्क्षिपति सलिलाद्धंस उच्चरन् ।
तं चेत्सततमुत्क्षिपेन्न मृत्युर्नामृतं भवेत् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

हन्त्यविद्यां तत्कार्यं चेति हंसः परमात्मा भूतभौतिकलक्षणात्संसारात् सलिलात् उच्चरन ऊर्ध्वं चरन् संसाराद्बहिरेव

वर्तमानः एकं जीवाख्यं पादं नोत्क्षिपति नोद्धरति नोपसंहरति रूपं रूपं प्रतिरूपोऽवतिष्ठत इत्यर्थः । श्रूयते च कठवल्लीषु—'एकस्तथा सर्वभूतान्तरात्मा' इति । कस्मात्पुनरेकं पादं नोत्क्षिपतीत्यत आह—तं जीवाख्यं पादं सततं संततयायिनं यदि उत्क्षिपेत् स्वमायया स्वमात्मानं प्राणाद्यनन्तभेदं कृत्वा तेष्वनुप्रविश्य जीवात्मना यदि नावतिष्ठेत्, तदा न मृत्युः न जननमरणादिलक्षणोऽनर्थः संसारो भवेत् संसारिणो जीवत्वाभावात् । तथा अमृतम् अमृतत्वं मोक्षो न भवेत् अननुप्रविष्टस्य दर्शनासंभवात् । तथा च तदर्थमेव अनुप्रवेशं दर्शयति—'रूपं रूपम्' इति । तथा चाथर्वणी श्रुतिः—'एकं पादं नोत्क्षिपति सलिलाद्धंस उच्चरन् । स चेदुत्क्षिपेत्पादं न मृत्युर्नामृतं भवेत्' इति, 'एकं रूपं बहुधा यः करोति' इति च । यः पादरूपेण जीवात्मना त्रिपादरूपेण चित्सदानन्दाद्वितीयेन ब्रह्मात्मनावस्थितः, तं परमात्मानं योगिन एव पश्यन्ति ॥

केन तर्ह्युपाधिना परः पादात्मना अवतिष्ठत इत्याशङ्क्य परस्यैव लिङ्गोपाधिकं जीवात्मानं दर्शयति—

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
लिङ्गस्य योगेन स याति नित्यम् ।

तमीशमीड्यमनुकल्पमाद्यं
पश्यन्ति मूढा न विराजमानम् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

स एव सच्चिदानन्दाद्वितीयः अन्तरात्मा सर्वभूतान्तरात्मा पुरुषः पूर्णः परमात्मा लिङ्गस्य योगेन अङ्गुष्ठमात्रः अङ्गुष्ठमात्रपरिमाणपरिच्छिन्नः सन् याति संसरति नित्यम् । कस्मात्पुनः कारणात् लिङ्गयोगेन अङ्गुष्ठमात्रः संसरति? तत्राह—यो लिङ्गस्य योगेनाङ्गुष्ठमात्रः संसरति, तम् ईशं सर्वस्येशितारम् ईड्यं स्तुत्यम् अनुकल्पं सर्वमनुप्रविश्य आत्मना कल्पयतीत्यनुकल्पम् आद्यम् आदौ भवं विराजमानं दीप्यमानं यस्मात् मूढाः अविवेकिनो देहद्वयात्माभिमानिनो न पश्यन्ति, तस्मादेवात्मनो ब्रह्मभावानवगमात्संसरन्तीति । यमात्मानमपश्यन्तः संसरन्ति, तं योगिन एव पश्यन्ति ॥

इदानीम् इन्द्रियाणां च विषयाणां च अनर्थहेतुत्वं दर्शयति—

गूहन्ति सर्पा इव गह्वरेषु
क्षयं नीत्वा स्वेन वृत्तेन मर्त्यान् ।

ते विप्रमुह्यन्ति जना विमूढा-
स्तैर्दत्ता भोगा मोहयन्ते भवाय ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

यथा सर्पा गह्वरेभ्यो निष्क्रम्य स्वेन वृत्तेन विषप्रदानेन मर्त्यान् क्षयं नीत्वा गह्वरेषु गूहन्ति स्वमात्मानं प्रच्छादयन्ति, एवमिन्द्रियसर्पाः श्रोत्रादिषु शयानाः श्रोत्रादिभ्यो निर्गत्य स्वेन वृत्तेन विषयविषप्रदानेन मर्त्यान् क्षयं नीत्वा गह्वरेषु गूहन्ति स्वमात्मानं प्रच्छादयन्ति; ते विप्रमुह्यन्ति विषयविषाभिभूताः विशेषेण मुह्यन्ति, व्यतिरिक्तं किंचिन्न जानन्तीत्यर्थः । तथा च श्रुतिः— 'यथा प्रियया स्त्रिया संपरिष्वक्तः' इति । तैः इन्द्रियसर्पैः दत्ताः भोगाः विषकल्पाः विषयाः मर्त्यान् मोहयन्ते पुनः पुनर्मोहहेतवो भवन्ति । यदिदं विषयैर्मोहनम्, तत् भवाय गर्भजन्मजरामरणसंसाराय भवति । यमनवद्यम् अनुकल्पमाद्यम् अदृष्ट्वा विषयविषान्धाः मुह्यन्ति, तं योगिन एव पश्यन्ति ॥

ज्ञानिनां मोक्षस्वरूपमाह—

असाधना वापि ससाधना वा
समानमेतद्दृश्यते मानुषेषु ।

समानमेतदमृतस्येतरस्य
युक्तास्तत्र मध्व उत्सं समापुः ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

ये असाधनाः शमदमादिसाधनरहिताः, ये च शमादिसाधनयुक्ताः ससाधनाः, तेषु समानं साधारणम् आत्मस्वरूपं दृश्यते मानुषेषु । तथा समानम् अमृतस्य मोक्षस्य इतरस्य संसारस्य सति चासति च तेषां मध्ये ये युक्ताः शमदमादिसाधनयुक्ताः, ते तस्मिन् विष्णोः परमे पदे मध्वः मधुनः उत्सं समापुः पूर्णानन्दं ब्रह्म समाप्नुवन्तीत्यर्थः । यमुत्सं संपूर्णानन्दं युक्ताः प्राप्नुवन्ति, तं योगिन एव पश्यन्ति ॥

किंच—

उभौ लोकौ विद्यया व्याप्य याति
तदाहुतं चाहुतमग्निहोत्रम् ।
मा ते ब्राह्मी लघुतामादधीत
प्रज्ञानं स्यान्नाम धीरा लभन्ते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

उभौ लोकौ इहलोकपरलोकौ विद्यया ब्रह्मात्मत्वविषयया व्याप्य याति तत् पूर्णानन्दं ब्रह्म । यस्मादुभौ लोकौ विद्यया

व्याप्य याति, तस्मान् अहुतं चाग्निहोत्रम् अनेन आत्मज्ञानेन आहुतम् आभिमुख्येन हुतं भवति, सर्वमग्निहोत्रादिकर्मफलमनेनैव संपादितं भवतीत्यर्थः । यस्मादुभौ लोकौ विद्यया व्याप्य याति, यस्मादहुतं चाग्निहोत्रं हुतं भवति, तस्मात् मा ते तव ब्राह्मी ब्रह्मविषया विद्या लघुतां लघुत्वं मर्त्यभावं कर्मवत् आदधीत न करोति, अपि तु प्रज्ञानं तमसः पारं परमात्मानमात्मत्वेन संपादयति यदा ब्रह्मविद्याव्यापृतस्य परमात्मानमात्मत्वेनावगच्छतः प्रज्ञानम् इति नाम स्यात् ब्रह्मेति नाम भवतीत्यर्थः । तथा च श्रुतिः— 'प्रज्ञानं ब्रह्म' इति । तत्प्रज्ञानं ब्रह्म धीरा धीमन्तो लभन्ते । यत्प्रज्ञानं ब्रह्म धीरा लभन्ते, तं योगिन एव पश्यन्ति ॥

किंच—

एवंरूपो महानात्मा पावकं पुरुषो गिरन् ।
यो वै तं पुरुषं वेद तस्येहात्मा न रिष्यते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

य एवंरूपः प्रज्ञानैकरसब्रह्मस्वरूपः सन्नास्ते, स आत्मा महान् संपद्यते ब्रह्मैव संपद्यत इत्यर्थः । पावकम् अग्निं सर्वोपसंहर्तृरूपं कारणं सकारणं कार्यं गिरन् स्वात्मन्युपसंहरन् यो वै तं पुरुषं ज्ञानैकरसं पुरुषं पूर्णं पुरिशयं वेद 'अयमह-

मस्मि' इति साक्षाज्जानाति, तस्य प्रज्ञानरूपं परमात्मानम् आत्मत्वेनावगच्छतः इह अस्मिन्नेव देहे आत्मा न रिष्यते न विनश्यति, विदुष उत्क्रान्तेरभावात्, उत्क्रान्तिनिमित्तत्वाद्विनाशस्य। तथा च श्रुतिः प्रश्नपूर्वकमुत्क्रान्त्यभावं दर्शयति — 'उदस्मात्प्राणाः क्रामन्ति आहो नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते' 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन्ब्रह्माप्येति य एवं वेद' इति च। यं विदित्वा न रिष्यते, तं योगिन एव पश्यन्ति ॥

यस्मात्तद्विज्ञानादेव नात्मनो विनाशः—

तस्मात्सदा सत्कृतः स्या-
न्न मृत्युरमृतं कुतः।
सत्यानृते सत्यसमानुबन्धिनी
सतश्च योनिरसतश्चैक एव ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

सदा सर्वदा अहर्निशं सत्कृतः स्यात् सच्चिदानन्दाद्वितीयब्रह्मात्मत्वेनाभिमन्येत यः, स सदा सत्कृतो भवति; तस्य न मृत्युः जननमरणलक्षणः संसारो न भवेत्। अमृतं कुतः मृत्युसापेक्षत्वादमृतत्वस्य तदभावे कुतः प्रसक्तिः। तथा च

श्रुतिः—'मृत्युर्नास्यमृतं कुतः' इति । सत्यानृते च वर्तेते सत्यसमानुबन्धिनी परमार्थसत्यमेकमधिष्ठानमनुवध्य वर्तेते रज्ज्वामिव सर्पः । कथमेतदवगम्यते—सत्यानृते सत्यसमानुबन्धिनी इति ? तत्राह—सतश्च लौकिकस्य योनिः कारणम् असतश्च व्यावहारिकस्य रजतादेः एकमेव अद्वितीयं ब्रह्म यस्मात्प्रवदन्ति, तस्मात् सत्यानृते स्वकारणभूतसत्यसमानुबन्धिनी इति । यदात्मतत्त्वज्ञानात्मकारणान्मृत्योर्विनाशः, यमनुबध्य सत्यानृते प्रवर्तेते, तं योगिन एव पश्यन्ति ॥

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
न दृश्यतेऽसौ हृदये निविष्टः ।
अजश्चरो दिवारात्रमतन्द्रितश्च
स तं मत्वा कविरास्ते प्रसन्नः ॥ १८ ॥

आकाशादिदेहान्तं जगत्सृष्ट्वा हृदये निविष्टः अजः चरः चराचरात्मा सन् न दृश्यते स्वेनात्मना चित्सदानन्दाद्वितीयेन । तम् अहोरात्रम् अतन्द्रितो भूत्वा कोशपञ्चकेभ्यो निष्क्रम्य सर्वान्तरात्मानं मत्वा कविरास्ते प्रसन्नः कृतार्थः सन्नित्यर्थः ॥

तस्माच्च वायुरायातस्तस्मिंश्च प्रलयस्तथा ।
तस्मादग्निश्च सोमश्च तस्माच्च प्राण आगतः ॥

तत्प्रतिष्ठा तदमृतं लोकास्तद्ब्रह्म तद्यशः ।
भूतानि जज्ञिरे तस्मात्प्रलयं यान्ति तत्र च ॥

सर्वमिदं ब्रह्मणः सकाशादुद्भूतं तत्रैव लीयत इति श्लोकद्वयेनोक्तम्; तदेव विवृणोति—

उभौ च देवौ पृथिवीं दिवं च
दिशश्च शुक्रं भुवनं बिभर्ति ।
तस्माद्दिशः सरितश्च स्रवन्ति
तस्मात्समुद्रा विहिता महान्तः ॥२१॥

स्पष्टः श्लोकार्थः ॥

इदानीं ब्रह्मणोऽनन्तत्वं कथयति—

यः सहस्रं सहस्राणां पक्षानाहृत्य संपतेत् ।
नान्तं गच्छेत्कारणस्य यद्यपि स्यान्मनोजवः ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥

यः पुरुषः सहस्राणां सहस्रं पक्षानाहृत्य आत्मनः पक्षान कृत्वा संपतेत् अनेकशः कोटिकल्पमपि पुरुषो नान्तं गच्छेत् कारणस्य सर्वकारणस्य परमात्मनः, यद्यपि असौ मनोजवः स्यात्, तथापि तस्यान्तं न गच्छेत् । यस्मादन्तं न गच्छेत्, तस्मादनन्तः परमात्मेत्यर्थः । योऽनन्तः परमात्मा, तं योगि-

न एव पश्यन्ति ॥

किंच—

अदर्शने तिष्ठति रूपमस्य
पश्यन्ति चैनं सुसमिद्धसत्त्वाः ।
हीनो मनीषी मनसाभिपश्ये-
द्य एनं विदुरमृतास्ते भवन्ति ॥ २३ ॥

अदर्शने दर्शनायोग्ये विषये तिष्ठति रूपमस्य परमात्मनः । तथा च श्रुतिः—'न संदृशे तिष्ठति रूपमस्य' इति । पश्यन्ति चैनं सुसमिद्धसत्त्वाः यद्यपि दर्शनायोग्ये तिष्ठति, तथापि परमात्मानं पश्यन्ति ते । के? सुसमिद्धसत्त्वाः सुष्ठु समिद्धं सम्यग्दीप्तं यदन्तःकरणं यज्ञादिभिः विमलीकरणद्वारेण येषाम्, ते सुसमिद्धसत्त्वाः । यस्मादेवं तस्मात् हीनो रागद्वेषादिमलरहितो विशुद्धसत्त्वो मनीषी मनसाभिपश्येत् । ये एनं परमात्मानं विदुः अहमस्मीति, अमृता अमरणधर्माणो भवन्ति ते ॥

इमं यः सर्वभूतेषु आत्मानमनुपश्यति ।
अन्यत्रान्यत्र युक्तेषु स किं शोचेत्ततः परम् ॥

इमं सर्वान्तरं सर्वभूतेषु सर्वप्राणिषु आत्मानं यः अनुप-

श्यति । कथंभूतेष्वनुपश्यति— अन्यत्रान्यत्र देहेन्द्रियादियुक्तेषु शरीराद्यभिमानिषु । सः किं शोचेत् ततः परं सर्वभूतेषु स्वात्मानं पश्यन् ततः परं किमर्थमनुशोचति सर्वभूतस्थमात्मानमनुपश्यन कृतार्थत्वान्नानुशोचतीत्यर्थः । तथा च श्रुतिः—'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' इति ॥

तदेवाह—

यथोदपाने महति सर्वतःसंप्लुतोदके ।
एवं भूतेषु सर्वेषु ब्राह्मणस्य विजानतः ॥ २५ ॥

यथा सर्वतःसंप्लुतोदके महत्युदपाने कृतकृत्यस्य अर्थो नास्ति, एवं सर्वेषु भूतेषु आत्मानं पश्यतः ब्राह्मणस्य विशेषतः न किंचिदपि प्रयोजनं विद्यत इत्यर्थः । तथा चाह भगवान् वासुदेवः—'न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः' इति ॥

इदानीम् उक्तस्यार्थस्य द्रढिम्ने वामदेवादिवत्स्वानुभवं दर्शयति—

अहमेवास्मि वो माता पिता पुत्रोऽस्म्यहं पुनः ।
आत्माहमस्मि सर्वस्य यच्च नास्ति यदस्ति च ॥

हे धृतराष्ट्र, अहमेवास्मि वो युष्माकं माता जनयित्री

पिता अपि अहमेव । युष्माकं पुत्रोऽस्मि दुर्योधनादिरहमस्मि । किं बहुना ? आत्माहमस्मि सर्वस्य प्राणिजातस्य यच्च नास्ति यदस्ति च, तस्याहमेवात्मा ॥

एवं तावदाधिभौतिकपित्रादिकं दर्शितम् । अथेदानीमाधिदैविकपित्रादिभावं दर्शयति—

पितामहोऽस्मि स्थविरः पिता पुत्रश्च भारत ।
ममैव यूयमात्मस्था न मे यूयं न चाप्यहम् ॥

पितामहोऽस्मि स्थविरः वृद्ध इन्द्रादेः पितामहः अनादिसिद्धः परमात्मा सोऽप्यहमेव । यः पिता इन्द्रादेः हिरण्यगर्भः, सोऽप्यहमेव । तथा ममैव यूयमात्मस्थाः । एवं यूयं सर्वे परमार्थतो न मे आत्मनि व्यवस्थिताः ; न चाप्यहं युष्मासु व्यवस्थितः । तथा चाह भगवान—'मत्स्थानि सर्वभूतानि' इति ॥

यद्यपि न ममात्मनि यूयं व्यवस्थिताः, न चाप्यहं युस्मासु व्यवस्थितः, तथापि—

आत्मैव स्थानं मम जन्म चात्मा
ओतप्रोतोऽहमजरप्रतिष्ठः ।

अजश्चरो दिवारात्रमनन्द्रितोऽहं
मां विज्ञाय कविरास्ते प्रसन्नः ॥ २८ ॥

अणोरणीयान्सुमनाः सर्वभूतेष्ववस्थितः ।
पितरं सर्वभूतानां पुष्करे निहितं विदुः ॥ २९ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्या-
मुद्योगपर्वणि धृतराष्ट्रसनत्कुमारसंवादे

श्रीमत्सनत्सुजातीये चतुर्थोऽध्यायः ॥

आत्मैव स्थानम् आत्मैवाश्रयः जन्म चात्मा अस्मादेवात्मनः सर्वं समुत्पन्नम् । तथा च श्रुतिः—'आत्मैवेदं सर्वम्' इति । ओतप्रोतोऽहमेव ओतप्रोतरूपेण व्यवस्थितः जगदात्मा युष्माकं जनयिता अजरप्रतिष्ठः अजरे जरामरणवर्जिते स्वे महिम्नि तिष्ठतीत्यजरप्रतिष्ठः । तथा च श्रुतिः—'स भगवः कस्मिन्प्रतिष्ठितः स्वे महिम्नीति यदि वा न महिम्नि' इति ॥

अणोः सूक्ष्मात् अणीयान् सूक्ष्मतरः सुमनाः शोभनं राग-द्वेषमदमात्सर्यशोकमोहादिधर्मवर्जितं केवलं चित्सदानन्दाद्वितीयब्रह्मात्माकारं मनो यस्येति सुमनाः, सर्वभूतेषु सर्वेषु प्रा-

णिषु हृदयकमलमध्ये अहमेव अवस्थित आत्मतया ॥

एवं तावत्स्वानुभवो दर्शितः । इदानीं न केवलमस्माकमनुभव एवात्र प्रमाणम्; अन्येऽप्येवमेवावगच्छन्तीत्याह—पितरं सर्वभूतानां पुष्करे निहितं विदुः इति । येऽन्ये सनकसनन्दनवामदेवादयो ब्रह्मविदः, तेऽपि पितरं सर्वभूतानां सर्वप्राणिनां पिता जनयिता यः परमेश्वरः, तं पुष्करे हृत्पुण्डरीकमध्ये निहितं विदुः; परमात्मानमात्मत्वेनावगच्छन्तीत्यर्थः । तथा च श्रुतिस्तेषामनुभवं दर्शयति— 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्च' इति बृहदारण्यके । 'एतत्साम गायन्नास्ते' इति तैत्तिरीयके सामगानेन स्वानुभवो दर्शित आत्मनः कृतार्थत्वद्योतनार्थम् । तथा च्छान्दोग्येऽपि— 'तद्धास्य विजज्ञाविति' इति । तलवकारे च 'अहमन्नम्' इत्यादिना विदुषः स्वानुभवो दर्शितः । तत्रैते श्लोका भवन्ति—

नित्यशुद्धबुद्धमुक्तभावमीशमात्मना ।
भावयन्षडिन्द्रियाणि संनियम्य निश्चलः ॥ १॥


अस्ति वस्तु चिद्घनं जगत्प्रसूतिकारणम् ।
न नश्वरं तदुद्भवं जगत्तमोनुदं च यत् ॥ २ ॥

तत्पदैकवाचकं सदामृतं निरञ्जनम् ।
चित्तवृत्तिदृक्सुखं तदस्म्यहं तदस्म्यहम् ॥ ३ ॥

इति ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य श्रीमच्छंकरभगवतः कृतौ श्रीमत्सनत्सुजातीयभाष्ये चतुर्थोऽध्यायः ॥

इति श्रीमत्सनत्सुजातीयभाष्यं संपूर्णम् ॥





॥ श्रीः ॥

विष्णुसहस्रनामस्तोत्रम्

नामानुक्रमणिका

॥ श्रीः ॥

॥ नामानुक्रमणिका ॥

	पृष्ठम्		पृष्ठम्
अ		अतीन्द्रः	६५
अक्रूरः	१४८	अतीन्द्रियः	६६
अक्षरः	४६	अतुलः	८७
अक्षरम्	१००	अदृश्यः	८१
अक्षोभ्यः	१३४, १५८	अद्भुतः	१४५
अखण्डपरशुः	११०	अधाता	१५२
अग्रजः	१४५	अधिष्ठानम्	८३
अग्रणीः	७२	अधृतः	१३९
अग्राह्यः	५३	अधोक्षजः	९२
अचलः	१२८	अनघः	६४, १३८
अचिन्त्यः	१३८	अनन्तः	११८, १४५
अच्युतः	५८,८३	अनन्तजित्	८१
अजः	५८, ७०, १०५	अनन्तरूपः	१५१
अजितः	१०८	अनन्तश्रीः	१५१
अणुः	१३९	अनन्तात्मा	१०४

	पृष्ठम्		पृष्ठम्
अनन्दः	१०५	अन्नादः	१५६
अनयः	९१	अपराजितः	१२५, १४२
अनर्थः	९५	अपा निधिः	८३
अनलः	८०, १२५	अप्ययः	१४६
अनादिः	१५१	अप्रतिरथः	११७
अनादिनिधनः	५०	अप्रमत्तः	८३
अनामयः	१२२	अप्रमेयः	५१
अनिमिषः	७१	अप्रमेयात्मा	७५
अनियमः	१४२	अभिप्रायः	१४३
अनिरुद्धः	६८, ११७	अभूः	९५
अनिर्देश्यवपुः	६७, ११८	अमरप्रभुः	५१
अनिर्विण्णः	९५, १४५	अमानी	१२९
अनिलः	७३, १३५	अमितविक्रमः	१०४, ११७
अनिवर्ती	११३	अमिताशनः	८८
अनिवृत्तात्मा	१३१	अमूर्तिः	१३८
अनीशः	११६	अमूर्तिमान्	१२६
अनुकूलः	८५	अमृतः	६१
अनुत्तमः	५६	अमृतपः	१०३
अनेकमूर्तिः	१२६	अमृतवपुः	१३५
अन्तकः	१०४	अमृतांशूद्भवः	७९
अन्नम्	१५६	अमृताशः	१३५

	पृष्ठम्		पृष्ठम्
अमृत्युः	७०	असंमितः	५९
अमेयात्मा	५८, ६७	असत्	१००
अमोघः	५९, ६५	असाक्षी	१०४
अम्भोनिधिः	१०४	असुखदः	१४५
अयमः	१४२	अहः	५७
अरविन्दाक्षः	८६	अहःसवर्तकः	७३
अरौद्रः	१४७	**आ**	
अर्कः	१३३	आत्मयोनिः	१५७
अर्चितः	११६	आत्मवान्	५६
अर्चिष्मान्	११६	आदित्यः	५०, १०९
अर्थः	९५	आदिदेवः	८४, १०१
अर्हः	१४३	आधारनिलयः	१५२
अविज्ञाता	१००	आनन्दः	१०५
अविधेयात्मा	११५	आनन्दी	१०९
अविशिष्टः	८२	आवर्तनः	७२
अव्यक्तः	१२६	आश्रमः	१४१
अव्यङ्गः	६२	**इ**	
अव्ययः	४६, ४९	इज्यः	९६
अशोकः	८५	इन्द्रकर्मा	१३२
अश्वत्थः	१३७	इष्टः	८२
असंख्येयः	७५	**ई**	

	पृष्ठम्
ईशानः	५४
ईश्वरः	४९, ५६
उ	
उग्रः	९४
उत्तमम्	९७
उत्तरः	१०२
उत्तारणः	१५०
उदीर्णः	११६
उदुम्बरः	१३७
उद्भवः	८९, १३३
उपेन्द्रः	६५
ऊ	
ऊर्जितः	६५
ऊर्जितशासनः	१४७
ऊर्ध्वगः	१५२
ऋ	
ऋतुः	९४
ऋद्धः	७८, ८६
ए	
एकः	१२७
एकपात्	१३०
एकात्मा	१५३
ओ	
ओजः	७८
ओजस्तेजोद्युतिधरः	७८
औ	
औषधम्	७९
क	
कः	१२७
कथितः	१४१
कनकाङ्गदी	१०७
कपिः	१४६
कपिलः	१४६
कपिलाचार्यः	१०६
कपीन्द्रः	१०२
करणम्	८९
कर्ता	८२, ८९
कविः	६२
कान्तः	८०, ११८
कामः	८०
कामकृत्	८०
कामदेवः	११८

	पृष्ठम्		पृष्ठम्
कामपालः	११८	कृशः	१३९
कामप्रदः	८०	कृष्णः	५३, १०८
कामहा	८०	केशवः	४७, ११७
कामी	११८	केशिहा	११७
कारणम्	८९	क्रतुः	९६
कालः	९४	क्रमः	५६
कालनेमिनिहा	११७	क्रोधकृत्	८२
किम्	१२७	क्रोधहा	८२
कुण्डली	१४७	क्षमः	९५
कुन्दः	१३५	क्षमिणा वरः	१४८
कुन्दरः	१३५	क्षरम्	१००
कुमुदः	११२, १३५	क्षामः	९५, १४१
कुम्भः	११६	क्षितीशः	१५७
कुवलेशयः	११२	क्षेत्रज्ञः	४६
कृतकर्मा	१३२	क्षेमकृत्	११३
कृतज्ञः	५६, १०६	क्षोभणः	८९
कृतलक्षणः	१००	**ख**	
कृताकृतः	६३	खण्डपरशुः	११०
कृतागमः	११८, १३२	**ग**	
कृतान्तकृत्	१०६	गणेश्वरः	११५
कृतिः	५६	गतिसत्तमः	१०९

	पृष्ठम्		पृष्ठम्
गदाग्रजः	१३०	**च**	
गदाधरः	१५८	चक्रगदाधरः	१०७
गभस्तिनेमिः	१०१	चक्री	१४७, १५८
गभीरः	१०७	चतुरश्रः	१५१
गभीरात्मा	१५१	चतुरात्मा	६३. १३०
गरुडध्वजः	८६	चतुर्गतिः	१३०
गहनः	८९, १०७	चतुर्दंष्ट्रः	६३
गुणभृत्	१३९	चतुर्बाहुः	१३०
गुप्तः	१०७	चतुर्भावः	१३०
गुरुः	७१, १०१	चतुर्भुजः	६३
गुरुतमः	७१	चतुर्मूर्तिः	१३०
गुहः	८९	चतुर्वेदवित्	१३०
गुह्यः	१०७	चतुर्व्यूहः	६३, १३०
गोपतिः	१०२, ११२	चन्दनाङ्गदी	१२८
गोप्ता	१०२, ११२	चन्द्रांशुः	७८
गोविदा पतिः	६८	चलः	१२८
गोविन्दः	६८, १०७	चाणूरान्ध्रनिषूदनः	१३७
गोहितः	११२	**छ**	
ग्रामणीः	७२	छिन्नसशयः	११५
घ		**ज**	
घृताशीः	१२८	जगतः सेतुः	७९

	पृष्ठम्		पृष्ठम्
जगदादिजः	६४		
जनजन्मादिः	१५१	तत्	१२७
जननः	१५१	तत्त्वम्	१५३
जनार्दनः	६२	तत्त्ववित्	१५३
जनेश्वरः	८५	तन्तुवर्धनः	१३२
जन्ममृत्युजरातिगः	१५३	तारः	८५, १५५
जयः	१०३	तारणः	८५
जयन्तः	१३३	तीर्थकरः	१२२
जह्नुः	७३	तुष्टः	९०
जितक्रोधः	९८	तेजः	७८
जितमन्युः	१५१	तेजोवृषः	१२९
जितामित्रः	१०५	त्रिककुब्धामा	५३
जीवः	१०४	त्रिदशाध्यक्षः	१०६
जीवनः	१५०	त्रिपदः	१०६
जेता	६४	त्रिलोकधृक्	१२९
ज्ञानगम्यः	१०२	त्रिलोकात्मा	११७
ज्ञानमुत्तमम्	९७	त्रिलोकेशः	११७
ज्येष्ठः	५४	त्रिविक्रमः	१०५
ज्योतिः १०९, ११५, १४४		त्रिसामा	१११
ज्योतिरादित्यः	१०९	त्वष्टा	५२
ज्योतिर्गणेश्वरः	११५		

	पृष्ठम्		पृष्ठम्
दक्षः	९४, १४८	दुर्जयः	१३१
दक्षिणः	१४८	दुर्धरः	७७, १२५
दण्डः	१४२	दुर्मर्षणः	७०
दमः	१४२	दुर्लभः	१३१
दमनः	६९	दुष्कृतिहा	१५०
दमयिता	१४२	दृढः	१०८
दर्पदः	१२५	दृप्तः	१२५
दर्पहा	१२५	देवः	८९
दामोदरः	८८	देवकीनन्दनः	१५७
दारुणः	११०	देवभृद्गुरुः	१०१
दाशार्हः	१०३	देवेशः	१०१
दिवःस्पृक्	११०	द्युतिधरः	७८, १२९
दिशः	१५१	द्रविणप्रदः	११०
दीप्तमूर्तिः	१२६	**ध**	
दुःस्वप्ननाशनः	१५०	धनंजयः	११८
दुरतिक्रमः	१३१	धनुर्धरः	१४२
दुराधर्षः	५६	धनुर्वेदः	१४२
दुरारिहा	१३१	धनेश्वरः	९९
दुरावासः	१३१	धन्यः	१२९
दुर्गः	१३१	धन्वी	५६
दुर्गमः	१३१	धरणीधरः	७३

	पृष्ठम्		पृष्ठम्
धराधरः	१२९	नयः	९१
धर्मः	९१	नरः	७३
धर्मकृत्	१००	नहुषः	८२
धर्मगुप्	१००	नारसिंहवपुः	४७
धर्मयूपः	९५	नारायणः	७३
धर्मविदुत्तमः	९१	निग्रहः	१३०
धर्माध्यक्षः	६३	निधिरव्ययः	४९
धर्मी	१००	निमिषः	७१
धाता	५०, १५२	नियन्ता	१४२
धातुरुत्तमः	५०	नियमः	६५, १४२
धाम	७१	निर्गुणः	१३९
धुर्यः	८४	निर्वाणम्	१२१
धृतात्मा	६५	निवृत्तात्मा	७२, ११३
ध्रुवः	९०	निष्ठा	१११
न		नेता	७२
नक्षत्रनेमिः	९५	नेयः	९१
नक्षत्री	९५	नैकः	१२७
नन्दः	१०५	नैककर्मकृत्	९९
नन्दकी	१५८	नैकजः	१४५
नन्दनः	१०५	नैकमायः	८१
नन्दिः	११५	नैकरूपः	७७

	पृष्ठम्		पृष्ठम्
नैकशृङ्गः	१३०	पर्यवस्थितः	१५०
नैकात्मा	९९	पवनः	८०
न्यग्रोधः	१३७	पवित्रम्	५३
न्यायः	७२	पापनाशनः	१५७
प		पावनः	८०, १३५
पणः	१५२	पुण्डरीकाक्षः	५९
पदमनुत्तमम्	१२७	पुंण्यः	१२२, १५०
पद्मगर्भः	८६	पुण्यकीर्तिः	१२२
पद्मनाभः	५१, ६९, ८६	पुण्यश्रवणकीर्तनः	१४९
पद्मनिभेक्षणः	८५	पुनर्वसुः	६४
पद्मी	८५	पुरंदरः	८४
परमस्पष्टः	९०	पुरातनः	१०२
परमात्मा	४५	पुरुजित्	१०३
परमेश्वरः	८९	पुरुषः	४६, ९२
परमेष्ठी	९४	पुरोषोत्तमः	४७
परर्द्धिः	९०	पुरुसत्तमः	१०३
पराक्रमः	७९	पुष्कराक्षः	५०, १०८
परायणः	१११	पुष्टः	९०
परायणम्	१११	पुष्पहासः	१५२
परिग्रहः	९४	पूतात्मा	४५
पर्जन्यः	१३५	पूरयिता	१२२

	पृष्ठम्		पृष्ठम्
पूर्णः	१२२	प्रमाणम्	९५, १५३
पृथुः	९२	प्रमोदनः	१०५
पेशलः	१४८	प्रसन्नात्मा	७३
प्रकाशनः	७७	प्राशुः	६५
प्रकाशात्मा	७८	प्राग्वंशः	१३९
प्रग्रहः	१३०	प्राणः	५४, ८३, ९२
प्रजागरः	१५२	प्राणजीवनः	१५३
प्रजापतिः	५४, ६९	प्राणदः	५४, ८३, ९२, १५२
प्रजाभवः	५७	प्राणनिलयः	१५३
प्रणवः	९२, १५२	प्राणभृत्	१५३
प्रतर्दनः	५३	प्रियकृत्	१४३
प्रतापनः	७८	प्रियार्हः	१४३
प्रतिष्ठितः	८३	प्रीतिवर्धनः	१४३
प्रत्ययः	५७	**ब**	
प्रथितः	८३	बभ्रुः	६१
प्रद्युम्नः	११७	बहुशिराः	६१
प्रधानपुरुषेश्वरः	४७	बीजमव्ययम्	९५
प्रपितामहः	१५५	बृहत्	१३९
प्रभवः	४९	बृहद्भानुः	८४
प्रभुः	४९, ८०	बृहद्भाः	७७
प्रभूतः	५३	ब्रह्म	१२०

	पृष्ठम्		पृष्ठम्
ब्रह्मा	१२०	भास्करद्युतिः	७८
ब्रह्मकृत्	१२०	भिषक्	१११
ब्रह्मज्ञः	१२०	भीमः	८७, १५२
ब्रह्मण्यः	१२०	भीमपराक्रमः	१५२
ब्रह्मवित्	१२०	भुजगोत्तमः	६९
ब्रह्मविवर्धनः	१२०	भूः	९५
ब्रह्मी	१२०	भूगर्भः	५५
ब्राह्मणः	१२०	भूतकृत्	३३
ब्राह्मणप्रियः	१२०	भूतभव्यभवत्प्रभुः	३३
भ		भूतभव्यभवन्नाथः	८०
भक्तवत्सलः	१२७	भूतभावनः	३३
भगवान्	१०९	भूतभृत्	३३
भगहा	१०९	भूतमहेश्वरः	१०१
भयकृत्	१३८	भूतात्मा	३३
भयनाशः	१३८	भूतादिः	४९
भयापहः	१५१	भूतावासः	१२५
भर्ता	४९	भूतिः	११६
भानुः	६२, ७९	भूरिदक्षिणः	१०२
भारभृत्	१४१	भूर्भुवः	१५१
भावः	३३	भूर्भुवःस्वस्तरुः	१५५
भावनः	४९	भूर्भुवो लक्ष्मीः	१५१

	पृष्ठम्		पृष्ठम्
भूशयः	११६	महाक्षः	८६
भूषणः	११६	महागर्तः	१३४
भेषजम्	१११	महातपाः	६१
भोक्ता	६४, १०२, १४५	महातेजाः	१२१
भोजनम्	६४	महादेवः	१०१
भ्राजिष्णुः	६४	महाद्युतिः	६७
म		महाद्रिधृक्	६७
मङ्गलं परम्	५३	महाधनः	९५
मधुः	६६	महान्	१३९
मधुसूदनः	५५	महानिधिः	१३४
मनुः	५२	महाबलः	६६
मनोजवः	१२२	महाबुद्धिः	६७
मनोहरः	९८	महाभागः	८८
मन्त्रः	७८	महाभूतः	१३४
मरीचिः	६९	महाभोगः	९५
महर्द्धिः	८६	महामखः	९५
महर्षिः	१०६	महामनाः	१०८
महाकर्मा	१२१, १३२	महामायः	६६
महाकोशः	९५	महामूर्तिः	१२६
महाक्रतुः	१२१	महायज्ञः	१२१
महाक्रमः	१२१	महायज्वा	१२१

	पृष्ठम्		पृष्ठम्
महार्हः	१०५	मुकुन्दः	१०४
महावराहः	१०७	मुक्तानां परमा गतिः	४५
महावीर्यः	६७	मेदिनीपतिः	१०६
महाशक्तिः	६७	मेधजः	१२९
महाशनः	८१	मेधावी	५६
महाशृङ्गः	१०६	**य**	
महास्वनः	५०	यज्ञः	९६, १५५
महाहविः	१२१	यज्ञकृत्	१५६
महाह्रदः	१३४	यज्ञगुह्यम्	१५६
महीधरः	८२, ८८	यज्ञपतिः	१५५
महीभर्ता	६८	यज्ञभुक्	१५६
महेज्यः	९६	यज्ञभृत्	१५६
महेन्द्रः	७७	यज्ञवाहनः	१५५
महेष्वासः	६८	यज्ञसाधनः	१५६
महोत्साहः	६६	यज्ञाङ्गः	१५५
महोदधिशयः	१०४	यज्ञान्तकृत्	१५६
महोरगः	१२१	यज्ञी	१५६
माधवः	५५, ६६, १२७	यज्वा	१५५
मानदः	१२९	यत्	१२७
मान्यः	१२०	यदुश्रेष्ठः	१२४
मार्गः	८८, ९१	यमः	६५

	पृष्ठम्		पृष्ठम्
यमः	१४२	लक्ष्मीवान्	८७
युगादिकृत्	८१	लोकत्रयाश्रयः	११४
युगावर्तः	८१	लोकनाथः	१२७
योगः	४७	लोकबन्धुः	१२७
योगविदां नेता	४७	लोकसारङ्गः	१३२
योगी	१४१	लोकस्वामी	१२९
योगीशः	१४१	लोकाधिष्ठानम्	१४५
र		लोकाध्यक्षः	६३
रक्षणः	१५०	लोहिताक्षः	५३
रणप्रियः	१२२	व	
रत्नगर्भः	९०	वशवर्धनः	१३९
रत्ननाभः	१३३	वत्सरः	९०
रथाङ्गपाणिः	१५८	वत्सलः	९०
रविः	१४४	वत्सी	९०
रविलोचनः	१४४	वनमाली	१०९
रामः	९१	वरदः	८४
रुचिराङ्गदः	१५१	वराङ्गः	१२८
रुद्रः	६१	वरारोहः	६१
रोहितः	८८	वरुणः	१०८
ल		वर्धनः	७६
लक्ष्मीः	१५१	वर्धमानः	७६

	पृष्ठम्		पृष्ठम्
वषट्कारः	३३	विजयः	६४
वसुः	५९, ७७, १२३	विजितात्मा	११५
वसुदः	७७	विदारणः	९८
वसुप्रदः	१२२, १२३	विदिशः	१५१
वसुमनाः	५९, १२३	विद्वत्तमः	१४९
वसुरेताः	१२२	विधाता	५०, १००
वह्निः	७३	विनयः	१०३
वाग्मी	७७	विनयिता	१०४
वाचस्पतिरयोनिजः	११०	विनयितासाक्षी	१०४
वाचस्पतिरुदारधीः	७१	विभुः	७३, १४४
वाजसनः	१३३	विमुक्तात्मा	९७
वामनः	६५	विरतः	९१
वायुः	९२	विरामः	९१
वायुवाहनः	८४, १४१	विरोचनः	१४४
वारुणः	१०८	विविक्तः	७६
वासवानुजः	८३	विशिष्टः	७५
वासुदेवः	८४, १२३, १२५	विशुद्धात्मा	११६
विकर्ता	८९	विशोकः	११६
विक्रमः	५६	विशोधनः	११६
विक्रमी	५६, १४७	विश्रामः	९४
विक्षरः	८८	विश्रुतात्मा	७०

	पृष्ठम्		पृष्ठम्
विश्वकर्मा	५२	वृषः	८२
विश्वदक्षिणः	९४	वृषकर्मा	५९
विश्वधृक्	७३	वृषपर्वा	७६
विश्वबाहुः	८२	वृषप्रियः	११२
विश्वभुक्	७३	वृषभः	७६
विश्वम्	३३	वृषभाक्षः	११२
विश्वमूर्तिः	१२६	वृषाकपिः	५८
विश्वयोनिः	६१, ६४	वृषाकृतिः	५९
विश्वरेताः	५७	वृषाही	७६
विश्वात्मा	७२	वृषोदरः	७६
विषमः	१२८	वेगवान्	८८
विष्णुः	३३, ७६, ११८	वेदः	६२
विष्वक्सेनः	६२	वेदवित्	६२
विस्तारः	९५	वेदाङ्गः	६२
विहायसगतिः	१४४	वेद्यः	६६
वीतभयः	१४९	वेधाः	१०८
वीरः	९१, ११७, ११८	वैकुण्ठः	९२
वीरबाहुः	९८	वैखानः	१५७
वीरहा	६६, १२८, १५०	वैद्यः	६६
वृक्षः	१०८	व्यक्तरूपः	८१
वृद्धात्मा	८६	व्यग्रः	१३०

	पृष्ठम्		पृष्ठम्
व्यवसायः	९०	शरणम्	५७
व्यवस्थानः	९०	शरभः	८७
व्यादिशः	१५१	शरीरभूतभृत्	१०२
व्यापी	९९	शरीरभृत्	८६
व्याप्तः	९२	शर्म	५७
व्यालः	५७	शर्वः	४९
व्यासः	११०	शर्वरीकरः	१४७
श		शशविन्दुः	७९
शंभुः	५०	शान्तः	१११
शक्तिमता श्रेष्ठः	९१	शान्तिः	१११
शङ्खभृत्	१५८	शान्तिदः	११२
शतमूर्तिः	१२६	शार्ङ्गधन्वा	१५८
शताननः	१२६	शाश्वतः	५३
शतानन्दः	११५	शाश्वतस्थाणुः	६१
शतावर्तः	८५	शाश्वतस्थिरः	११६
शत्रुघ्नः	९२	शास्ता	७०
शत्रुजित्	१३७	शिखण्डी	८२
शत्रुतापनः	१३७	शिपिविष्टः	७७
शब्दसहः	१४७	शिवः	४९, ११३
शब्दातिगः	१४७	शिशिरः	१४७
शमः	१११	शिष्टकृत्	७५


	पृष्ठम्		पृष्ठम्
शिष्टेष्टः	८२	श्रीमान्	४७, ६७, ७२, ११४
शुचिः	६५, ७५	श्रीवत्सवक्षाः	११३
शुचिश्रवाः	६१	श्रीवासः	११३
शुभाङ्गः	११२, १३२	श्रीविभावनः	११४
शुभेक्षणः	९०	श्रीशः	११४
शून्यः	१२८	श्रुतिसागरः	७६
शूरः	८५	श्रेयः	११४
शूरजनेश्वरः	११७	श्रेष्ठः	५४
शूरसेनः	१२४	**स**	
शृङ्गी	१३३	सकर्षणः	१०८
शोकनाशनः	११६	सक्षमा	११३
शौरिः	८५, ११७	संग्रहः	६५
श्रमणः	१४१	सधाता	७०
श्रीकरः	११४	संधिमान्	७०
श्रीगर्भः	८९	सन्यासकृत्	१११
श्रीदः	११४	सप्रमर्दनः	७२
श्रीधरः	११४	सभवः	४९
श्रीनिधिः	११४	संवत्सरः	५७, ९४
श्रीनिवासः	६८, ११४	संवृतः	७२
श्रीपतिः	११३	संस्थानः	९०
श्रीमतां वरः	११३	सत्	१००

	पृष्ठम्		पृष्ठम्
सतां गतिः	६८, ९६	सद्भूतिः	१२४
सत्कर्ता	७३	सनात्	१४६
सत्कीर्तिः	११५	सनातनतमः	१४६
सत्कृतः	७३	सन्तः	१५०
सत्कृतिः	१२४	सन्निवासः	१२४
सत्ता	१२४	सप्तजिह्वः	१३८
सत्त्रम्	९६	सप्तवाहनः	१३८
सत्त्ववान्	१४३	सप्तैधाः	१३८
सत्त्वस्थः	१०१	समः	५९
सत्पथाचारः	१५२	समयज्ञः	८७
सत्परायणः	१२४	समात्मा	५९
सत्यः	५९, ७१, १४३	समावर्तः	१३१
सत्यधर्मपरायणः	१४३	सम्मितिजयः	८७
सत्यधर्मपराक्रमः	७९	समीरणः	७२
सत्यधर्मा	१०५	समीहनः	९५
सत्यपराक्रमः	७१	सर्गः	६५
सत्यमेधाः	१२९	सर्वः	४९
सत्यसंधः	१०३	सर्वकामदः	१४१
सदामर्षी	१४५	सर्वगः	६२
सदायोगी	६६	सर्वज्ञः	९७, १३५
सद्गतिः	१२४	सर्वतश्चक्षुः	११६

	पृष्ठम्		पृष्ठम्
सर्वतोमुख·	१३५	सहस्रमूर्धा	७२
सर्वदर्शनः	५७	सहस्राशुः	१००
सर्वदर्शी	९७	सहस्राक्षः	७२
सर्वदृक्	७० ११०,	सहस्रार्चिः	१३८
सर्वदृग्व्यासः	११०	सहिष्णुः	६४, १०९
सर्वप्रहरणायुधः	१५८	साक्षी	४६
सर्वयोगविनिःसृतः	५८	सात्वतां पतिः	१०३
सर्वलक्षणलक्षण्यः	८७	सात्त्विकः	१४३
सर्ववागीश्वरेश्वरः	१३४	साधुः	७३
सर्वविजयी	१३३	साम	१११
सर्वविद्भानुः	६२	सामगः	१११
सर्वशस्त्रभृता वरः	१२९	सामगायनः	१५७
सर्वसहः	१४२	सिंहः	७०, १०१
सर्वादिः	५८	सिद्धः	५८, १३७
सर्वासुनिलयः	१२५	सिद्धसंकल्पः	७५
सर्वेश्वरः	५८	सिद्धार्थः	७५
सवः	१२७	सिद्धिः	५८
सविता	१४४, १५५	सिद्धिदः	७५
सहः	८८	सिद्धिसाधनः	७५
सहस्रजित्	८१	सुखदः	९७, १४५
सहस्रपात्	७२	सुघोषः	९७

	पृष्ठम्		पृष्ठम्
सुतन्तुः	१३२	सुवर्णवर्णः	१२८
सुतपाः	६९	सुवीरः	१५१
सुदर्शनः	९४	सुव्रतः	९७, १३७
सुधन्वा	११०	सुषेणः	१०७
सुन्दः	१३३	सुहृत्	९७
सुन्दरः	१३३	सूक्ष्मः	९७
सुपर्णः	६९, १४१	सूर्यः	१४४
सुप्रसादः	७३	सोमः	१०३
सुभुजः	७७	सोमपः	१०३
सुमुखः	९७	स्कन्दः	८४
सुमेधाः	१२९	स्कन्दधरः	८४
सुयामुनः	१२४	स्तवप्रियः	१२२
सुराध्यक्षः	६३	स्तव्यः	१२२
सुरानन्दः	६८	स्तुतिः	१२२
सुरारिहा	७०	स्तोता	१२२
सुरुचिः	१४४	स्तोत्रम्	१२२
सुरेशः	५७	स्थविरो ध्रुवः	५२
सुरेश्वरः	७९	स्थविष्ठः	५२, ९५
सुलभः	१३७	स्थाणुः	४९
सुलोचनः	१३३	स्थानदः	९०
सुवर्णबिन्दुः	१३४	स्थावरस्थाणुः	९५

	पृष्ठम्		पृष्ठम्
स्थिरः	७०	स्वाङ्गः	१०८
स्थूलः	१३९	स्वापनः	९९
स्पष्टाक्षरः	७८	स्वाभाव्यः	१०५
स्रग्वी	७१	स्वास्थ्यः	१३९
स्रष्टा	११२, १५७	ह	
स्वक्षः	११५	हंसः	६९
स्वङ्गः	११५	हरिः	११७
स्वधृतः	१३९	हलायुधः	१०९
स्वयंजातः	१५७	हविः	१२३
स्वयंभूः	५०	हविर्हरिः	८७
स्ववशः	९९	हिरण्यगर्भः	५५, ९२
स्वस्ति	१४६	हिरण्यनाभः	६९
स्वस्तिकृत्	१४६	हुतभुक्	१४४, १४५
स्वस्तिदः	१४६	हृषीकेशः	५१
स्वस्तिदक्षिणः	१४६	हेतुः	८८
स्वस्तिभुक्	१४६	हेमाङ्गः	१२८



॥ श्रीः ॥

सनत्सुजातीयम्

श्लोकानुक्रमणिका

॥ श्रीः ॥

॥ श्लोकानुक्रमणिका ॥

	पृष्ठम्		पृष्ठम्
अ		अश्रान्तः स्यादनादाता	२२८
अङ्गुष्ठमात्रः पुरुषो०	३०५	असाधना वापि ससा०	३०१
अङ्गुष्ठमात्रः पुरुषो०	२०९	असिद्धिः पापकृत्य च	२५२
अणोरणीयान्सुमनाः	३१०	अस्मिँल्लोके तपस्तप्तं	२४५
अदर्शने तिष्ठति रूपमस्य	३०७	अस्मिँल्लोके विजयन्तीह	२७६
अधर्मविदुषो मूढाः	२३१	अहमेवास्मि वो माता	३०८
अनाढ्या मानुषे वित्ते	२३०	**आ**	
अन्तवन्तः क्षत्रिय ते	२८२	आकृष्टक्षार्थस्य सयोगात्	२८२
अपान गिरति प्राणः	२९८	आख्यानपञ्चमैर्वेदैः	२५८
अभिजानामि ब्राह्मणम्	२६५	आचार्ययोनिमिह	२७५
अभिध्या वै प्रथम	१९७	आचार्याय प्रियं कुर्यात्	२७०
अमन्यमानः क्षत्रिय	२००	आचार्येणात्मकृतं	२७०
अमृत्युः कर्मणा केचित्	१७७	आत्मैव स्थानं मम	३०९
अर्हते याचमानाय	२५४	आद्या विद्या वदसि	२७४
अवारणीयं तमसः	२८५	आपोऽथाद्भ्यः सलिलं	२०२

	पृष्ठम्
आभाति शुक्लमिव	२८३
आस्यादेष निःसरते	१९२
इ	
इन्द्रियेभ्यश्च पञ्चभ्यः	२५८
इम यः सर्वभूतेषु	३०७
उ	
उभे सत्ये क्षत्रियाद्य	१७८
उभौ च देवौ पृथिवी	३०६
उभौ लोकौ विद्यया	३०२
ऋ	
ऋचो यजूंष्यधीते यः	२३९
ए	
एक पादं नोत्क्षिपति	२९८
एकवेदस्य चाज्ञानात्	२५९
एकैकमेते राजेन्द्र	२४९
एतेन ब्रह्मचर्येण	२८१
एतेनैव सगन्धर्वाः	२८१
एव दोषा दमस्योक्ताः	२५६
एवं मृत्यु जायमानं	२०१
एवरूपो महानात्मा	३०३
एवं ह्यविद्वान्परियाति	२०३
क	
कथ समृद्धमत्यर्थं	२४६
कर्मोदये कर्मफला०	१९४
कल्मष तपसो ब्रूहि	२४७
कस्यैष मौनः कतरन्नु	२३७
कामत्यागश्च राजेन्द्र	२५४
कामानुसारी पुरुषः	१९९
कालेन पाद लभते	२८०
कोऽसौ नियुङ्क्ते तमज	२०५
को ह्येवमन्तरात्मान	२२७
क्रोधः कामो लोभमोहौ	२४८
क्रोधादयो द्वादश	२४७
ग	
गत्वोभयं कर्मणा भुज्यते	२२०
गूहन्ति सर्पा इव	३००
च	
चक्रे रथस्य तिष्ठन्त	२९३
छ	
छन्दांसि नाम द्विपदां	२६२
ज	
ज्ञान च सत्य च दमः	२५१

	पृष्ठम्
ज्ञानादयो द्वादश यस्य	२८०
ज्ञानादिषु स्थितोऽप्येवं	२७०
ज्ञानेन चात्मानमुपैति	२४४
त	
ततो राजा धृतराष्ट्रो	१७५
तत्प्रतिष्ठा तदमृत	३०६
तदर्थमुक्त तप एत०	२४४
तदर्धमास पिबति	२९६
तदेतदङ्गा सस्थित	२८५
तद्वै महामोहनमिन्द्रि०	१९५
तपोमूलमिद सर्व	२४७
तस्माच्च वायुरायातः	३०५
तस्मात्सदा सत्कृतः	३०४
तस्मिन्स्थितो वाप्युभय	२१८
तस्य सम्यक्समाचारम्	२२३
तस्यैव नामादिविशेष०	२४२
तूष्णीभूत उपासीत	२६७
ते मोहितास्तद्वशे	१९३
द	
दमोऽष्टादशदोषः स्यात्	२५२
देहोऽप्रकाशो भूताना	१९९
दोषैरेतैर्वियुक्त तु	२५७
दोषो महानत्र विभेद०	२०६
द्वादश पूगाः सरितो	२९५
द्वाराणि सम्यक्प्रवदन्ति	२३४
द्विवेदाश्चैकवेदाश्च	२५८
न	
न चेद्वेदा वेदविद	२४०
न च्छन्दासि वृजिनात्	२४०
न वेदाना वेदिता	२६३
न वै मानश्च मौन च	२३२
न सादृश्ये तिष्ठति	२९४
नाभाति शुक्लमिव	२८४
नास्य पर्येषण गच्छेत्	२६६
नित्यमज्ञातचर्या मे	२२५
निवृत्तेनैव दोषेण	२५७
निष्कल्मष तपस्त्वेतत्	२४६
नैतद्ब्रह्म त्वरमाणेन	२७४
नैन सामान्यृचो वापि	२३९
नैवर्क्षु तन्न यजुःषु	२८५
प	
पितामहोऽस्मि स्थविरः	३०९

	पृष्ठम्
पूर्णात्पूर्णमुद्धरन्ति	२९०
प्रत्यक्षदर्शी लोकाना	२६९
प्रमादाद्वा असुराः	१७९
ब	
ब्रह्मचर्येण या विद्या	२७५
म	
मदोऽष्टादशदोषः स्यात्	२५३
मौनाद्धि मुनिर्भवति	२६८
य	
यः सहस्र सहस्राणा	३०६
य एन वेद तत्सत्य	२६०
यतो न वेदा मनसा	२३८
यत्तच्छुक्रं महज्ज्योतिः	२८९
यत्र मन्येत भूयिष्ठ	२२३
यत्राकथयमानस्य	२२४
यथा नित्यं गुरौ वृत्तिः	२७९
यथोदपाने महति	३०८
यदेतदद्धा भगवान्स०	२१६
यन्मा पृच्छसि राजेन्द्र	२५७
यमं त्वेके मृत्युमतो०	१८१
यमप्रयतमानं तु	२३१
यस्त्वेतेभ्योऽप्रवसेत्	२५१
यस्माद्धर्मानाचरन्तीह	२१८
यानेवाहुरिज्यया साधु०	२०२
यामाशभागस्य तथाहि	२६४
ये यथा वान्तमश्नन्ति	२२९
येषां धर्मे न च स्पर्धा	२२१
येषां धर्मेषु विस्पर्धा	२२१
योऽन्यथा सन्तमात्मानम्	२२८
योऽभिध्यायन्नुत्पतिष्णून्	१०८
यो वाकथयमानस्य	२२५
यो वेद वेदान्स च	२६४
ल	
लोकद्वेष्योऽभिमानश्च	२५२
लोकस्वभाववृत्तिर्हि	२३१
व	
विद्याद्वहुपठ त तु	२६१
श	
शरीरमेतौ कुरुतः	२७७
शिष्यवृत्तिक्रमेणैव	२७८
शुक्राद्ब्रह्म प्रभवति	२९०
श्रीर्हि मानार्थसवासात्	२३३